॥ श्रीरस्तु ॥

॥ उमामहेश्वराभ्यां नमः ॥

# ॥ सकलागम - सार - सङ्ग्रहः ॥

(सकलशैवागम-प्रमाणवचन-संकलनरूपः)

*

# SAKALĀGAMA SĀRA SANGRAHA

A Collection of Essential Quotations
from
All Saiva Agamas
for
Temple Worship

*

Published by :
The South Indian Archaka Sangham
*Registered Office :*
10/11, Thambu Chetty Street, MADRAS-600001.
1974

*Copy-right reserved]* *[First Edition*

**Price Rs. 5**

॥ श्रीगुरुभ्यो नमः ॥

## ॥ प्रास्ताविकम् ॥

साक्षात श्रीपरमेश्वराधिष्ठितेषु शिवालयेषु महेश्वरस्य तत्परिवार-देवतानां च पूजाविधानं दर्शयितुं प्रवृत्तोऽयं ग्रन्थः । 'सकलागम-सारसंग्रह' इति नाम्नैव शैवेषु बहुष्वागमेषु शासितस्य शिवालयपूजा-क्रमस्य, तदनुबन्धिनां विविधानामंशानां च सङ्कलनभूतोऽयं ग्रन्थ इति स्पष्टम् । उत्तरत्र विद्यमानायाः विषयानुक्रमणिकायाः परिशीलनेना-प्ययमंशः सुस्पष्टो भविष्यति ।

अस्मिन् ग्रन्थे, सुप्रभेद-कालोत्तर-सहस्रतन्त्र-शिवधर्मोत्तर-सर्वज्ञानोत्तर-सन्तान - कारण-चिन्त्यविश्व - कामिक-अंशुमति-स्वायम्भुव-मतङ्ग - द्विशतिकालोत्तर-दीप्त - सूक्ष्म-मकुट-अजित - तन्त्रसार-मृगेन्द्र-किरण - बृहत्कालोत्तर - रौर-वातुल - स्कन्दकालोत्तर-पारमेश्वर-सहस्रधर-चन्द्रज्ञान-योगज-विजय-वीरतन्त्र-शिवागम-वातुलतन्त्र - निःश्वासकारिका-नामभ्यः त्रयस्त्रिंशत्संख्याकेभ्यः (33) शिवागमेभ्यः प्रमाणश्लोकाः सङ्कलिता विराजन्ते ।

किञ्च, सोमशम्भु — ज्ञानरत्नावली - स्मृतिरत्नावली-योगयाज्ञवल्क्य-मनुस्मृत्यादिभ्यः स्मृतिशास्त्रेभ्यः, तथा पाद्म-शैव-कूर्म-भारत-रामायण-

स्कान्दादिभ्यः पुराणेतिहासेभ्यश्च तत्तत्प्रकरणोपयोगिनः प्रमाणश्लोकाः समुपस्थापिता दृश्यन्ते ।

अस्मिन् ग्रन्थे (1) नित्यकर्मविधिः (2) शिवार्चनविधिः (3) शिवालयदर्शनविधिः (4) पाकविधिः इति चत्वारि प्रकरणानि वर्तन्ते । एकैकमपि प्रकरणं बहुतरप्रमाणोपबृंहितं सत् सकलविषय-विवरणपटिष्ठमित्यत्र नास्ति संशयलेशावकाशः ।

अतः सकलागम-पुराण-स्मृत्यादिवचन सङ्कलन-परिभूषितोऽयं ग्रन्थः शिवाचार्याणां, तत्सन्ततिजानां शिवाचार्यपदप्रेप्सूनां च विद्यार्थिनामत्यन्तोपकाराय भवेदिति विश्वसिमः ।

इत्थं,

मद्रपुरी
13-11-74
(आनन्दवत्सर-
दीपावलिसुदिनम्)

सकलास्तिकजनसेवकः
* **स्वामिनाथशिवाचार्यः**
कार्यदर्शी,
दक्षिणदेशीयार्चकसङ्घः

सकलागमसारसंग्रहः ॥

## विषयानुक्रमणिका ॥

प्रार्थना पुटम्

1· **नित्यकर्मविधिः** (1–58)

शौचाचमनलक्षणम् 1, ब्राह्ममुहूर्तलक्षणम् 2, प्रातःकालकर्मविधिः 3, शौचम् 4, आचमनम् 6, दन्तधावनविधिः 7, पञ्चस्नान विधिः 9, स्नानसङ्कल्पः 12, वस्त्रधारणविधिः 15, वस्त्रशौचविधिः 16, भस्मविधिः 20, भस्मधारणलक्षणम्, भस्मस्नानम् 21, भस्मपदव्युत्पत्तिः 27, आचमनम् 38, करन्यासः 40, अङ्गन्यासः 41, पञ्चब्रह्मषडङ्गानि 43, मन्त्रपल्लवाः 43, प्राणायामादिलक्षणम् 44, अङ्कुशमुद्रा, सुरभिमुद्रा 45, त्रिसन्ध्याकालदेवता 46, अर्घ्यम् 47, गायत्रीध्यानम् 48, देवतादितर्पणलक्षणम् 48, तर्पणम् 48, जपस्थानम् 50, देवतादिगृहस्थानम् 51, भूशोधनम् 51, पूजास्थलद्वारलक्षणम् 52, वेदिका 53, सौरपूजा 53, सौरप्राकारदेवतापूजा 54, नवग्रहपूजा 57 ॥

2· **शिवार्चनविधिः** (58–214)

शिवार्चनविधिक्रमः 58, पूजाकालः 59, पूजादिदेवतानिर्णयः 60, शिवपूजाविशेषः 60, नानाविधलिङ्गपूजाफलम् 62, ब्रह्मविष्णुशिवलिङ्गा-

र्चनविशेषः 68, शुद्धादित्रिविधपूजा 68, लिङ्गपूजासंख्या तत्फलम् 68, नवरत्नलिङ्गपूजाफलम् 69, रत्नलिङ्गमानम् 69, लोहजलिङ्गपूजाफलम् 70, शिलालिङ्गपूजाफलम् 70, वर्णभेदलिङ्गफलम् 71, लिङ्गदोषः 71, बाणलिङ्गोत्पत्तिस्थानम् 72, उत्तमादिबाणलिङ्गलक्षणम् 72, लिङ्गपीठम् 73, दुर्लक्षणफलम् 73, नानाविधदेवताराधनबाणलिङ्गम् 73, भोगमोक्षपूजालिङ्गम् 75, बाणलिङ्गपरीक्षा 75, लिङ्गपूजाकाल आशौचप्रायश्चित्तम् 76, नष्टलिङ्गप्रायश्चित्तम् 77, लिङ्गफलाधिकम् 77, चातुर्वर्णस्त्रीपुंलिङ्गपूजा 78, लिङ्गपीठप्रमाणम् 79, पूजाविधिः, तत्फलम् 79, द्वादशविधक्षणिकलिङ्गम् 80, क्षणिकलिङ्गपूजाफलम् 80, गृहीपूजाकालप्रमाणम् 81, रुद्राक्षत्रिपुण्ड्रधारणकालः 81, दीक्षाहीनस्य यजनं निष्फलम् 81, तत्प्रायश्चित्तम् 81, शिवपूजाफलम् 81, पूजाशब्दार्थः 81, रुद्राक्षधारणम् 82, रुद्राक्षोत्पत्तिः 83, नानाभेदरुद्राक्षधारणफलम् 83, धारणस्थानं, संख्या 86, मालिकाधारणफलम् 86, धारणवर्जितकालः 87, स्वरूपं, फलम् 87, मन्त्राः फलम् 88, वर्जितरुद्राक्षः 88, धारणस्थानफलम् 88, मालिकाप्रमाणं, फलम् 89, पूजाकाल आसनम् 90, द्वारपूजा 91, यागशालापूजा 93, स्नानतोयम् 94, नैवेद्यादिप्रमाणम् 94, स्नानपात्रफलादिकम् 95, देहशुद्धिभूतशुद्ध्यादि 95, तत्त्वशुद्धिः 96, कलाशुद्धिः 97, ईशानकलापञ्चकम् 99, तत्पुरुषकलाश्चतस्रः 99, अघोरकलाष्टकम् 100, वामदेवकलास्त्रयोदश 100, सद्योजातकलाष्टकम् 101, अक्षन्यासः 102, शिवध्यानम् 103, उपचारः 103, बहिः पूजास्थानशुद्धिः 105,

द्रव्यशुद्धिः, पात्रविशेषः 105, पात्रशुद्धिः 106, द्रव्यशुद्धिमन्त्रः 106, पाद्यम् 106, आचमनम् 107, अर्घ्यम् 107, तत्प्रमाणम् 107, शङ्खभेदः 108, कवचालङ्कारः 108, शंखशुद्धिः 108, तदधिदेवताः 109, ईक्षणादिशुद्धिमन्त्रः 109, तत्फलम् 109, आत्मपूजा 110, मन्त्रशुद्धिः 110, निर्माल्यविसर्जनम् 111, स्नानवेदी 111, लिङ्गशुद्धिः 112 ॥

पञ्चगव्यविधिः 114, तत्पात्रविशेषः 115, तन्मन्त्रः 115, गोवर्णः 116, प्रमाणं, स्थानम् च 116, अभिषेकद्रव्यप्रमाणं, स्थानम् 117, अभावकालद्रव्यं, प्रमाणम् 117, मन्त्रः 117, पञ्चगव्य संयोगः 118, अधिदेवताः 118, पञ्चगव्यफलम् 118, पञ्चगव्याभिषेककालः 119, पञ्चामृतविधिः 119, अभिषेकविधिः 120, फलोदकम् 120, कषायोदकम् 120, द्रव्याभिषेकस्थानम् 121, धूपदीपकालः 121, अभिषेकद्रव्यम् 121, अभिषेकफलम् 121, पीठशोधनम् 122, सहस्रधाराभिषेकविषयः 122, वस्त्रधारणं, बिम्बपूजा 123, पीठलक्षणम् 124, पूजाविषयः 124, कूर्मशिलापूजा 126, आसन-पादुकाः 126, धर्मादिस्वरूपम् 126, पूजाद्रव्यम् 126, मेखला 127, दलम् 127, केसरम् 128, पञ्चासननिर्णयः 129, आसनभेदकालः 130, अष्टत्रिंशत्कलान्यासः 130, ह्रस्वदीर्घे 131, आवाहनादिपूजा 133, पाद्यादिविनियोगस्थानम् 136, मन्त्रान्तरव्युत्पत्तिः 137, द्रव्यालाभे परिहारः 137,

वर्जितवस्त्रम् 137, नानावर्णवस्त्रधारणकालः 137, वस्त्रधारण-फलम् 138, उपवीतादिधारणमन्त्रः 138, वासनाद्रव्यलेपनफलम् 138, आभरणालङ्कारः, तत्फलं च 139, भान्वादिवारालङ्कारः 140, पुष्पालङ्कारः 140 ॥

अलङ्कारभागः 140, पत्रपुष्पविषयः 140, पत्रोपयोगकालः 141, फलपूजा 142, वारपत्रम् 142, पुष्पविशेषः 143, उतमादि-पुष्पम् 143, पत्रपुष्पफलादिकम् 143, बिल्वपत्राधिदेवताः 144, वर्जितबिल्वम् 144, पञ्चबिल्वम् 144, नीलोत्पलविशेषः 145, सात्त्विकादिपुष्पम् 145, उदयादिकालपुष्पम् 145, सात्त्विकादिपुष्प-विशेषः 146, वर्जितपुष्पम् 146, देवतावर्जितपुष्पम् 147, वर्जितपुष्पोपयोगकालः 147, नानादेवताराधनपुष्पविषयः 147, पुष्पमण्डपः, तत्फलं च 148, पत्रपुष्पच्छेदनपूजाफलम् 148 ॥

लयाङ्गभोगाङ्गपूजा 148, (1) पञ्चब्रह्मपूजा 149, षडङ्ग-पूजा 150, (2) विद्येशावरणम् 151, (3) गणेशावरणम् 152, (4) लोकपालावरणम् 153, (5) दशायुधावरणम् 155, स्त्रीपुन्नपुंसक-देवताः 152, पञ्चावरणसङ्ग्रहः 156, पञ्चावरणधूपदीपाद्युपचार-विभागः 157, प्रच्छन्नपटविषयः 157 ॥

उतमादिनैवेद्यान्नम् 158, भोजनवस्त्वनिवेदनं निष्फलं, धनक्षयम् 158, नैवेद्यफलम् 158, नैवेद्यप्रमाणम् 159, उतमादि-

नैवेद्यप्रमाणम् 159, परिचारकनियमः 159, वस्त्रशुद्धिः 159, पात्र-तण्डुलशुद्धिः 160, शुद्धिमन्त्रः 160, पाकलक्षणम् 160, अशुद्धपाक-फलम् 161, षड्विधान्नविभागः 161, व्यञ्जनम् 161, पाकपात्र-लक्षणम् 162, नैवेद्यस्थानशुद्धिः 163, नैवेद्यविभागः 163, नैवेद्य-पात्रसंख्या 164, नैवेद्यभागाः 164, आचमनाद्युपचारः 165, नैवेद्य-क्रमः 165 ॥

ताम्बूलम् 165, चन्दनं, तत्फलम् 166, फलनैवेद्यम् 166, धूपदीपम् 166, घण्टाविभागः 166, उत्तमादिधूपम् 167, उत्तमादि-दीपः 167, वर्जितदीपः 168, दीपपात्राधिदेवताः 168, उपचारः 168, उत्तमादि-आरात्रिकसंख्या, तदधिदेवता च 169, रक्षा 170, तिलकम् 170, दर्पणं, तदधिदेवता च 170, छत्रं, तत्फलम् 171, चामरं, तत्फलम् 171 तालवृन्तं, तत्फलम् 171 मयूरव्यजनं, तदधिदेवता च 171 छत्रादिमन्त्रः 172 पुराणादिश्रवणम् 172 ॥

षोडशोपचाराः 172 द्वादशोपचाराः 172 पञ्चोपचाराः 172 उपचारादिकालप्रमाणम् 172 उपचारप्रियदेवता 173 उपचारहीन-फलम् 173 उपचारविभागः 174 आत्मरक्षा 174 मन्त्ररक्षा 174 त्रिनाडी 175 ॥

जपविभागः 175 उत्तमादिजपप्रमाणम् 176 रुद्राक्षविभागः, तद्धारणफलम् 176 मिश्रमुखरुद्राक्षमालावर्जनम् 175 रुद्राक्षाधि-

देवता 178 उत्तमादिरुद्राक्षमालाविभागः 179 रुद्राक्षशुद्धिमन्त्रः 179 उत्तमादिजपविभागः 179 मन्त्रोच्चारणभेदः, तत्फलं च 180 जपमालाधिदेवताः 181 जपसंख्या 181 अङ्गुल्यधिदेवताः 181 जपविभागः 182 नानाविधजपमाला 182 जपस्थानफलम् 183 जपफलम् 183 नानाजपमन्त्रः 183 स्तोत्रम् 184 ॥

अग्निकार्यम् 186 कुण्डः 186 स्थण्डिलम् 187 अग्न्यधिदेवताध्यानम् 188 अग्निगर्भाधानादिषोडशक्रियाः 190 अष्टदर्भाः 191 कुशदोषः, स्त्रीपुनपुंसकदर्भाः 191 तत्प्रयोजनकालः 191 कुशाधिदेवताः 192 उत्तमादिकूर्चम् 192 कूर्चाधिदेवताः 192 पवित्राधिदेवताः 192 पवित्रप्रयोजनकालः 193 परिधिविष्टरादिप्रमाणम् 193 अग्निरूपम् 193 वक्त्रनामानि 194 होमस्थानम् 194 अष्टकर्मप्रयोगः 194 अग्निकार्यकालप्रमाणम 195 उत्तमादिहोमद्रव्यम् 195 अग्निस्वरूपम 196 बालाद्यग्निकार्यकालः 196 आहुतिस्थापनकालः 196 नानाद्रव्याहुतिस्थानम् 197 मन्त्रः 198 अग्निकार्यफलम् 198 होमवासनाफलम् 198 पूर्णाहुतिः 199 तिलकं, तत्फलं च 199 बलिः 200 मन्त्रप्रमाणम् 200 प्रार्थना 200 प्रदक्षिणं, तत्फलं च 200 ॥

योगपीठपूजा 201 गुरुपूजा 201 शिवपूजा 201 विद्यापीठपूजा 201 प्रथमं गुरुवन्दनं, तत्फलं च 202 गुरुपुत्रस्य आचार्यत्वं

तत्फलं च 202 गुरुलक्षणम् 202 अयोग्यगुरुशिष्यविशेषः 202 गुर्वादिस्वरूपम् 203 गुरुविशेषः 203 अष्टपुष्पम् 204 तत्पुष्पप्रयोजनम् 204 अष्टपुष्पपूजाकालः 204 पूजार्हकमानुयः 204 अष्टपुष्पपूजासमयः 205 प्रार्थना 205 गणेशादिपूजा 205 चण्डपूजाताम्बूलाद्युपचारः 206 प्रार्थना 206 तत्फलम् 206 चण्डेश्वरपूजानियमः 207 ॥

निर्माल्योपयोगः 207 निर्माल्यभक्षणफलम् 007 षड्विधनिर्माल्यम् 208 देवद्रव्यविभागः 208 नैवेद्यविभागः 208 निर्माल्यविनियोगफलम् 209 प्रसादव्युत्पत्तिः 209 न निर्माल्यम् 210 भुक्तियोग्यनिर्माल्यम् 210 निर्माल्यभक्षणफलम् 211 प्रसादभोजननामविवरणम् 211 पादोदकाभिषेकजलभुक्तिफलम 212 नानाविधनिर्माल्यभुक्तिफलम् 213 कपिलापूजा 214 ॥

3. **शिवालयदर्शनविधिः** (215–227)

लिङ्गदर्शनम् 215 भोजनादि 216 वपनम् 216 स्नानम् 216 हिरण्यश्राद्धम 216 शिवतीर्थस्नानविशेषः 216 स्थूललिङ्गगोपुरदर्शनफलम् 217 शिवालयवाद्यघोषविशेषः 217 लिङ्गत्रयविवरणम् 217 अङ्गलिङ्गभावः 217 शिवसान्निध्यस्थानम् 217 मूर्तिजीवस्थानम् 218 दर्शनकाले वस्त्राच्छाद्यफलम् 218 जपहोमादिस्थानम् 218 प्रच्छन्नपटकालदर्शनफलम् 218 वर्जितविषयः, तत्फलम् 219 बालपीठदर्शन-

विवरणम् 219 ध्वजदण्डदर्शनविधानम् 220 पशुपतिपाशविधानम् 220 शिवार्चनफलं च 220 ॥

अष्टाङ्गादिनमस्कारः, तत्फलं च 220 अष्टाङ्गविधानम् 221 पञ्चाङ्गम् 221 त्र्यङ्गम् 221 एकाङ्गम् 221 नमस्कारसंख्या 222 नमस्कारस्थानं, तत्फलम् 222 प्रदक्षिणक्रमः 222 प्रदक्षिणपदव्युत्पत्तिः 222 प्रदक्षिणकालफलम् 223 प्रदक्षिणस्थानफलम् 224 प्रदक्षिणसंख्याफलम् 224 मानुषादिलिङ्गप्रदक्षिणसंख्या 225 नानादेवताप्रदक्षिणसंख्या 225 सोमसूत्रप्रदक्षिणम् 225 छायादोषः 226 सव्यापसव्यप्रदक्षिणफलम् 227 ॥

4. पाकविधिः (227–235)

पाकविधिः 228 पाककारणं, तत्फलं च 229 भोजनविधि 229 भोजनपात्रम् 229 निषिद्धपत्रम् 230 युक्तपत्रम् 230 भोजनकालमन्त्रः, तत्क्रिया च 230 वर्जितोपदंशः, तत्फलं च 231 माहेशादिभोजनफलम् 232 भोजनदोषः 232 दोषपरिहारः 232 चन्दनं, ताम्बूलम् 233 ॥

अनुबन्धः—

उच्छिष्टनास्तीति वचनम् 235 ॥

श्रीः

उमामहेश्वराभ्यां नमः ॥

# सकलागमसारसंग्रहप्रारंभः ॥

## प्रार्थना

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तन्नमामि गजाननम् ॥ 1

नमश्शिवाय शक्त्यै च बिन्दवे शाश्वतायच ।
गुरवे च गणेशाय कार्तिकेयाय धीमते ॥ 2

## नित्यकर्मविधिः

## शौचाचमनलक्षणम् ॥

सोमशंभौ :—

पुरस्सुप्त्वा समुत्थाय प्रातस्संचिन्त्य शङ्करम् ।
यथोद्दिष्टं क्रियाकांडं सर्वं प्रत्यहमाचरेत् ॥ 3

अथातः संप्रवक्ष्यामि शौचाचमनलक्षणम् ।
साधकानां हितार्थाय चतुराश्रमधर्मिणाम् ॥ 4

## 2

# ब्राह्ममुहूर्तलक्षणम् ॥

सुप्रभेदे :—

ब्राह्मे मुहूर्ते विद्वांस्तु मनसा चिन्तयेच्छिवम् ।
स त्रिपादत्रिघटिका रात्र्यंते तु दिने दिने ॥ 5

ब्राह्मं मुहूर्तमाख्यातं संघोषे स्थिति कथ्यते ।
चतस्रो घटिकास्तावदरुणोदय उच्यते ॥ 6

यतीनां स्नानकालोऽयं गङ्गाम्बु सदृशं जलम् ।

अन्यत्र :-

षोढा विभज्य रजनीं चरमांशे समुत्थितः ॥ 7

यथा संभवमालोक्य दिव्य दिव्येन चक्षुषा ।

ज्ञानरत्नावल्यां :-

परं व्योममयं शंभुं देशालंबन वर्जितम् ॥ 8

यद्वा ब्रह्मबिले नादज्योतिर्लिंगमनाहतम् ।
सूक्ष्मं बिन्दुमयं यद्वा ललाटे परमाक्षरम् ॥ 9

हृदयाम्भोरुहस्थं वा ज्योतीरूपं परात्परम् ।
अङ्गुष्ठपर्वमात्रं वा स्थूलरूपं सदाशिवम् ॥ 10

अजिते :—

स्थित्वा यावदुषः पूर्वं स्तुत्वा स्तोत्रैः प्रणम्य च।
कर्तव्यं शुभकार्याणि चिन्तयित्वा समाहितः ॥ 11

उत्थाय च बहिर्गत्वा दण्डपाणिः कमण्डलुः।

## प्रातः कालकर्मविधिः ॥

कालोत्तरे :—

मृत्काष्ठं गोमयं पुष्पं तिलमामलकं शुभम् ॥ 12

कुशद्रव्यं गृहीत्वा तु नदीं गच्छेत् समुद्रगाम्।

शिवधर्मे :—

ग्रामाद्धस्तशतं गत्वा नगरात्तच्चतुर्गुणम् ॥ 13

सहस्रतन्त्रे :—

यथेष्टा दिशिवत् गम्यं ऐशान्यां दिशि वर्जयेत्।

शिवधर्मोत्तरे :—

शिरः प्रावृत्य तत् कुर्यात् आच्छाद्य च तृणैर्महीम् ॥ 14

अन्यत्र :—

देवता ऋषयस्सर्वे गणनाथास्तथैव च।
उत्तिष्ठत च सर्वेऽपि बहिर्भूमिं करोम्यहम् ॥ 15

सर्वज्ञानोत्तरे :—

दिवोदङ्मुखस्तिष्ठेद्रात्रौ वै दक्षिणामुखः ।
अर्धरात्रे तु नैर्ऋत्यां द्वेसंध्ये तु यथा दिवा ॥ 16

सन्ताने :—

वातस्याभिमुखं चैव न कुर्यात्तु कदाचन ।

अन्यत्र :—

रविं दक्षिणतः कृत्वा विण्मूत्रं च विसर्जयेत् ॥ 17

यथासुखमुखं कुर्यात् प्राणबाधकरेषु च ।

पाद्मे :—

वाचन्नियम्य यत्नेन ष्ठीवनोच्छ्वास वर्जितः ॥ 18

प्रत्यादित्य जलादीनां चन्द्र गो ब्राह्मणान् प्रति ।
देवालयसमीपे तु कूपे गोष्ठे च भस्मनि ॥ 19

क्षेत्रे तु वृक्षच्छायायां नद्यामन्तस्सरित्सु च ।
चैत्यवृक्ष समीपे तु वेलायां वा महोदधेः ॥ 20
चत्वरे गृहमध्ये च नकुर्यान्मतिमान्नरः ।

शौचम् ज्ञानरत्नावल्यां :-

तृणैः पायुमयज्ञाङ्गैर्मृज्यादनुपयोगिभिः ॥ 21

मृत्पिण्डेनैव वा कुर्यात् मार्जनं लोष्टकादिना ।
गृहीत शिश्नो वामेन पाणिना दक्षिणेन तु ॥ 22

कालोत्तरे :–

नालिकेरफलीमात्रं शौचार्थं मृदमाहरेत् ।
जले शुद्धे समागम्य पश्चात् शौचं समाचरेत् ॥ 23

पाद्मपुराणे :–

तीर्थे शौचन्न कुर्वीत कुर्वीतोद्धृतवारिणा ।
अरत्निमात्रकं त्यक्त्वा कुर्याच्छौचमनुद्धृते ॥ 24

सकृन्मृत्तिकया शिश्नमक्षमात्र प्रमाणतः ।
तथा सर्वत्र संशोध्यं पंचापानांग वर्तिनम् ॥ 25

दशकृत्वं करे वामे सप्त कुर्यात् करद्वये ।
पादद्वये तथा तिस्रः गृहस्थस्य विधीयते ॥ 26

कारणे :–

एतदुक्तं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
त्रिगुणं वानप्रस्थानां यतीनां तु चतुर्गुणम् ॥ 27

यावन्मात्रं मनश्शुद्धिस्तावच्छौचं समाचरेत् ।
यथोद्दिष्ट दिवा शौचसिध्यर्थं तत उच्यते ॥ 28

आतुरस्य तदर्द्धं स्यात् तदर्द्धं चाध्वनि स्मृतम् ।
शौच शेष मृदं तोयं नहि प्रक्षालयेद्यदि ॥ 29

अशेषास्तस्य पितरो भक्षयेयुर्न संशयः ।
तस्मात् सर्वप्रयत्नेन शौचशेषं न कारयेत् ॥ 30

शौचाचार विहीनस्य समस्ता निष्फलाः क्रियाः ।
आचाराल्लभते ज्ञानं आचाराल्लभते धनम् ॥ 31

आचारात् सर्वमाप्नोति आचारान्मुक्तिमाप्नुयात् ।
नदीकूले देवगृहे वल्मीके मूषिकास्थले ॥ 32

पथिस्थितामशुद्धां वा मृदं चैव तु नाहरेत् ।
वापीकूपतटाकानामारामासु च वर्तनम् ॥ 33

तज्जले मृत्तिकां ग्राह्य नाहरेदन्यमृत्तिकाम् ।
आनीय केनचित्तास्तु विभजेत् स्नान शौचयोः ॥ 34

जलेन शोधयेत् पश्चात् गंडूषं षोडशं क्रमात् ।
शौचमुक्तं विशेषेण आचमनमधुनोच्यते ॥ 35

## आचमनम् ॥

स्थले तु दक्षिणं पादं वामपादं जले स्थितम् ।
नभो न दिक्षु संवीक्ष्य हस्तं गोकर्णवत् कृतम् ॥ 36

माषमग्नन्तु यद्वारि निश्शब्दं तज्जलं पिबेत् ।
तन्न्यूनमधिकं पीत्वा सुरापानसमं भवेत् ॥ 37
आचम्य विधिवत् शुद्धो दन्तधावनमाचरेत् ।

## दंतधावनविधिः ॥

सार्द्रत्वक् च समच्छेद ऋजु शुद्ध मपर्वकम् ॥ 38

कनिष्ठांगुलि विस्तारं प्रशस्तं दंतधावनम् ।
चिरिबिल्व करण्डोत्थं शैरीषं खादिरोऽर्जुनम् ॥ 39

अष्टांगुलं मुमुक्षूणां बुभुक्षूणामिहोच्यते ।
जंब्वाम्र ककुभाशोक कपित्थ वकुलोद्भवम् ॥ 40

प्लक्षोदुंबर पल्वांघ्रि जाती चंपक शंखजम् ।
अतिमुक्त कदंबोत्थ मपामार्गं च देहिनाम् ॥ 41

प्लक्षोदुंबर निंबैश्च कुर्याद्वै दन्तधावनम् ।
कण्टकक्षीर वृक्षोत्थ द्वादशांगुलमायतम् ॥ 42

क्रियाकांडक्रमावल्यां :—

अथवा विप्रराजन्य वैश्य शूद्रान्त्यजातिषु ।
द्वादशांगुलमुद्दिष्टं क्रमादेकैक ह्रस्वतः ॥ 43

चतुरंगुल मात्रं तु नारीणां दन्तधावनम् ।
दन्तकाष्ठे बहिर्भूमौ शौचस्नानं जपेषु च ॥ 44

अर्चने भोजने भैक्षे मोनं कुर्यात्तथाष्टसु ।

ज्ञानरत्नावल्यां :—

शिखावच्छिव धर्माणां साधकानां हरांगुलम् ॥ 45

एकैकमंगुलं न्यूनं चतुर्णां लोकधर्मिणाम् ।
उत्तरास्यो यतिर्मौनी गृहस्थश्चेत् पुरानन : ॥ 46

उपविश्य शुचिस्थाने विट् छवान्त्यज रासभान् ।
श्वानार्तस्त्री श्वपाकास्थि सूकरान्नावलोकयेत् ॥ 47

हृदा मंत्रित काष्ठेन दंतमांसमबाधयन् ।
निर्मलं दशनं यावत् तावद्वै दंतधावनम् ॥ 48

दन्तधावनमुद्दिष्टं तावद्वै दंतधावनम् ।
जटाश्वत्थार्क खदिर करंजं नालिकेरजम् ॥ 49

तृण पर्ण पलाशोत्थ इष्टकांगार भस्म च ।
अंगुलिश्च न शस्येत प्रमादाच्चोक्तपक्षयः ॥ 50

मंत्राश्चमुनयो देवाः पितरस्तत्पराङ्मुखाः ।
भविष्यन्त्युदिते भानौ कुर्याच्चेद्विकृतिं विना ॥ 51

प्रतिपत् पर्व षष्ठीषु नवम्येकादशी तथा ।
काष्ठानां दंतसंयोगे दहत्यासप्तमं कुलम् ॥ 52

अष्टम्यां च चतुर्दश्यां पंचदश्यां त्रिजन्मनि ।
तैलं मांसं व्यवायं च दन्तकाष्ठं च वर्जयेत् ॥ 53

पौर्णमास्याममावास्यां संक्रान्तौ ग्रहणे गृही ।
कुर्याद्वा पावनैः पत्रैर्बुभुक्षुर्दन्तधावनम् ॥ 54

अलाभे दंतकाष्ठानां निषिद्धे च तथा दिने ।
अपां द्वादशगंडूषैर्मुखशुद्धिर्भविष्यति ॥ 55

अन्यत्र :—

मूत्रे पुरीषे भुक्तौ च तथा भक्ष्यस्य भक्षणे ।
चतुरष्टद्विरष्टाष्टगंडूषेण विशुध्यति ॥ 56

आस्यं प्रक्षाल्य गंडूषैर्वामभागेन शुध्यति ।
मोहाद्दक्षिणतो भागे रौरवं नरकं व्रजेत् ॥ 57

चिन्त्यविश्वे :—

मुमुक्षोश्च विशेषेण नित्यं वै दन्तधावनम् ।
मलस्नानं प्रकर्तव्यं सर्वपापहरं शुभम् ॥ 58

## पंचस्नानविधिः ॥

कामिके :—

पंचस्नानानि देवेशि विहितानि विशुद्धये ।
स्नानं वारुणमाग्नेयं दिव्य वायव्य मानसम् ॥ 59

वारुणं वारिणा स्नानं आग्नेयं भस्मना भवेत् ।
वृष्ट्या सातपया दिव्यं वायव्यं रजसा गवाम् ॥ 60
मन्त्रैर्मानसमित्युक्तं पंचस्नानाः प्रकीर्तिताः ।

चिन्त्यविश्वे :—

नद्यां वाप्यां तटाके वा कूपे वापि चतुर्विधम् ॥ 61

कूपस्नानं न कर्तव्यं नद्यादिषु च सत्स्वपि ।
अलाभे तु प्रकर्तव्यं कूपस्नानं न दोषभाक् ॥ 62

तटाकेष्वपि न स्नानं सरित्सत्यां गजाननः ।
कूपाद्दशगुणं वापी वाप्या दशगुणं नदी ॥ 63

तस्माद्दशगुणं विद्धि नदीं चैव समुद्रगाम् ।
ततश्शतगुणं पुण्यं स्नानं प्राङ्मुख उच्यते ॥ 64

प्रवाहाभिमुखी भूत्वा नद्यां स्नानं समाचरेत् ।
तत्रापि दक्षिणं तीरं अनन्तं फलमुच्यते ॥ 65

तोयं शुद्धं अशुद्धं वा शिवालय समीपगम् ।
शिवगंगेति तां विद्याच्छिव धामांबु सेचनात् ॥ 66

शैवपुराणे :—

देवालयस्थितं तीर्थं दूषयेन्न कदाचन ।
नात्यन्तमशुचिस्तत्र स्नानं कुर्यात्तु कर्हिचित् ॥ 67

अथवा स्वगृहे तप्तवारिणा शीतलेन वा ।
नवाष्टपंचभिः कुंभैः शिवमन्त्र प्रकल्पितैः ॥ 68

ततस्त्वालिप्त भूपृष्ठे पीठस्थः स्नानमाचरेत् ।
नाभेरधः प्रविश्याप्सु कटिं प्रक्षाल्य मृज्जलैः ॥ 69

शुद्धार्द्रकपटेनांगमार्जनं कापिलं स्मृतम् ।
स्त्रीबालानां महीशानां रोगिणांच प्रवासिनाम् ॥ 70

उष्णोदकेन स्नानं वा कंठस्नानमथापि वा ।
पंचपिंडाननुद्धृत्य न स्नायात् परवारिषु ॥ 71

मृत् कुंभात्ताम्रकुंभेन स्नानं शतगुणं भवेत् ।
ताम्राच्छतगुणं रौप्यं रजताद्धेमकं शतम् ॥ 72

कुंडोदं च निपानं च वापीस्नान समं भवेत् ।

सुप्रभेदे :—

अप्रशस्तं निशिस्नानं प्रशस्तं ग्रहणे पुनः ॥ 73

वृत्रस्य रुधिरं नित्यं स्रवन्ति निशि निम्नगाः ।
तस्मात् स्नानं च पानं च न कुर्वीत कदाचन ॥ 74

अग्निं वापि सुवर्णं वा दर्शयेज्जलसन्निधौ ।
प्राणायामत्रयं वापि कारयेद्देशिकोत्तमः ॥ 75

जलशुद्धिर्भवेदेव निशिस्नानं न गम्यते ।
तस्माद्दिवैव गृह्णीयाद्देवार्थं चात्मनश्च वै ॥ 76

## स्नानसंकल्पं ॥

ज्ञानरत्नावल्यां :—

समाचम्य कृतन्यासो दर्भहस्तप्रसन्नधीः ।
प्राणायामत्रयं कृत्वा संहितान् प्रणवं वदन् ॥ 77

अद्यामुके रवौ मासे तिथिवारे सरिद्वरे ।
स्नानं देव करिष्यामि त्वत् पूजार्थं प्रसीद मे ॥ 78

हुं फट्कारेण शुद्धां च मृदं संगृह्य साधकः ।

कालोत्तरे :—

पर्वताद्यान्नदीकूलात् पुण्यक्षेत्राच्छुचिस्थलात् ॥ 79

ब्रह्मवृक्षात् कुशाधस्तादस्त्रखातात् सुरक्षिताम् ।
तालमानामधो मृत्स्नामादाय हृदयेन तु ॥ 80

संचयेत् भूतले शुद्धे यावन्मासचतुष्टयम् ।
वर्षाकाले न गृह्णीयात् श्राद्धपक्षे विशेषतः ॥ 81

सकृत् जप्तेन चास्त्रेण मृदं ग्राह्य विचक्षणः ।
मलस्नानं पुरा कृत्वा विधिस्नानं समाचरेत् ॥ 82

तदुक्तं :–

रजनीकणपिष्टैस्तु अंगप्रत्यंग कर्षणम् ।
मलस्नानमिदं प्रोक्तं मंत्रस्नानं ततश्शृणु ॥ 83

नासिका श्रोत्र नेत्रोत्थमुदकेन विशुध्यति ।
वक्त्रजं दंतकाष्ठेन कैश्यं चामलकादिभिः ॥ 84

अद्भिश्च शुद्धमृद्भिश्च शेषं प्रक्षालयेत्तनुम् ।

सुप्रभेदे :—

मत्स्य मण्डूक सर्पाद्यैरन्यैश्च जलजन्तुभिः ॥ 85

सेवितं तु जले नित्यं तस्मादुक्तं विशेषतः ।
तद्दोषशमनार्थाय शिवतीर्थं प्रकल्पयेत् ॥ 86

हस्तमात्र प्रमाणेन परितश्चतुरश्रकम् ।
हुं फट्कारेण चास्त्रेण मृदं ग्राह्य विचक्षणः ॥ 87

सद्येन स्नापयेन्मन्त्र वामदेवेन सेचयेत् ।
अघोरेण तु संस्पृश्य पुरुषेण त्रिभागिकम् ॥ 88

पूर्वं च दक्षिणं चैव पश्चिमं च त्रिधा भवेत् ।
ईशानेन तु मन्त्रेण एकैकमभिमन्त्रयेत् ॥ 89

अस्त्रब्रह्मशिवांगानि न्यसेत् पूर्वादितः क्रमात् ।
अस्त्रजप्तं तु यद्भागं दशदिक्षु विनिक्षिपेत् ॥ 90

शिवजप्तं तु यद्भागं तीर्थमध्ये विनिक्षिपेत् ।
फट्कारेण तु मंत्रेण नाराचास्त्र प्रयोगतः ॥ 91

जले सूक्ष्माश्च ये दोषाः तेषामुच्चाटनं भवेत् ।
ब्रह्मजप्तेन चांशेन आत्मनोऽगानि कुण्ठयेत् ॥ 92

उपस्पृश्य ततः स्नायात् शिवतीर्थस्य मध्यमे ।

चिन्त्यविश्वे :—

चन्द्रार्करूप हस्ताभ्यां सेचयेत् कुंभमुद्रया ॥ 93

वौषडन्त षडंगेन मूलेन ब्रह्मभिर्मुहुः ।
अभिषिंचेत् क्रमान्नित्यं अमृतांबु विभावयन् ॥ 94

जलक्रीडावसाने तु वक्त्रमुद्राभिषेचयेत् ।

सिद्धान्ते :—

अंगुष्ठाभ्यां उभौ कर्णौ तर्जनीभ्यां च चक्षुषी ॥ 95

मध्यमाभ्यां निबध्नीयान्नासिका युगलं दृढम् ।
पंचब्रह्मशिवांगैश्च त्रिःपदैरघमर्षणम् ॥ 96

सुप्रभेदे :—

अन्तर्जले पिधायाक्षं सर्वांगैरेव दर्शयेत् ।
दर्शयेच्च ततश्चार्द्धमुखमग्नोऽथवा पुनः ॥ 97

मुखमग्नश्च यज्जलं एकं शतगुणं भवेत् ।
अर्द्धांगेनैव साहस्रं निमग्ने कोटिरुच्यते ॥ 98

स्मृतावपि :—

पिबन्ति शिरसो देवाः पिबन्ति पितरो मुखात् ।
मध्यतस्सर्वगंधर्वा अधस्तात्सर्वे जन्तवः ॥ 99

तस्मात् स्नातो न वा मृज्यात् स्नानशाटया न पाणिना ।
तिस्रः कोटयर्द्धकोटयश्च यावन्त्यंगरुहाणि वै ॥ 100

स्रवन्ति सर्वतीर्थानि मत्वा न परिवर्जयेत् ।
ध्यानयुक्तो विनिष्क्रम्य क्रमेणाचमनं चरेत् ॥ 101

फट्कारेण तु मन्त्रेण शिवतीर्थं तु संग्रहेत् ।
अंगलग्नजलं शुष्कपटेन परिमार्जयेत् ॥ 102

आर्द्रं चेत् सप्तधा धून्वन् अंगानि परिमार्जयेत् ।
शुद्धवस्त्रं समाच्छाद्य आर्द्रवस्त्रं परित्यजेत् ॥ 103

## वस्त्रधारणविधिः ॥

ज्ञानरत्नावल्यां :—

नैकवस्त्रः क्रियां कुर्यान्नग्नः कौपीनकेवलः ।
स्नाने देवार्चने यागे भोजने च विपश्चिता ॥ 104

स्मृतौ :—

नग्नो मलिनवस्त्रस्स्यात् नग्नश्चार्द्रपटस्मृतः ।
नग्नस्तु दग्धवस्त्रस्स्यात् नग्नस्यूतपटस्मृतः ॥ 105

अंशुमति :—

आर्द्रवस्त्रेण संयुक्तः कर्मकुर्यादतंद्रितम् ।
वृथा भवति तत्कर्म पुनः स्नानेन शुध्यति ॥ 106

छर्दितेऽभ्युदिते सूर्ये श्मश्रुकर्मणि मैथुने ।
दुस्वप्ने दुर्जनस्पर्शे स्नानं षट्सु विधीयते ॥ 107

## वस्त्रशौचविधिः ॥

शिवधर्मोत्तरे :—

वस्त्रशौचं प्रवक्ष्यामि तच्छुद्धौ शुध्यते यतः ।
वस्त्रशौच विहीनात्मा शुचिरप्यशुचिर्भवेत् ॥ 108

देवकार्योपयोग्यानां प्रत्यहं शौचमिष्यते ।
वाससामितरेषां च कार्यं शौचं मलोद्गमे ॥ 109

स्मृतौ :—

वस्त्रं चतुर्गुणं कृत्वा पीडयित्वा जलाद्बहिः ।
समप्रकोष्ठे निक्षिप्य द्विराचम्य विशुध्यति ॥ 110

यदा यदा च सुस्नातः तदा संध्यामुपासयेत ।
स्नानकाले यतस्सर्वेप्युपतिष्ठन्ति नित्यशः ॥ 111

तस्मादेवान् मुनीन् सिद्धान् पितॄंश्चापि प्रतर्पयेत् ।
अन्यथा ते प्रयान्त्यूर्ध्वं निराशास्तत्पराङ्मुखाः ॥ 112

तर्पिताश्चेत् प्रयच्छन्ति तृप्तास्सर्वमभीप्सितम् ।
पश्चात्स्वमूर्ध्नि वस्त्रेण त्रिधा संप्रोक्षयेद्बुधः ॥ 113

तर्पणं चास्त्रमन्त्रेण त्रिधा तर्प्य जपेद्दश ।
एवं च तर्पयेत्संध्यां यद्वाचास्तं हृदि स्मरेत् ॥ 114

जलस्नानमिदं प्रोक्तं तस्मात्स्नानमिदं शृणु ।
सुरासुरैर्मथ्यमानात् क्षीरोदादर्णवोत्तमात् ॥ 115

पंचगावस्समुत्पन्नास्सर्वलोकस्य मातरः ।
नन्दा भद्रा च सुरभी सुशीला सुमनास्तथा ॥ 116

गावः शिवपुरात् पंच क्षितिः प्राप्ताः शिवेच्छया ।
कपिला कृष्णा श्वेता च धूम्रा रक्ता तथैव च ॥ 117

सर्वलोकोपकारार्थं देवानां तर्पणाय च ।
गोमातरः स्थिता भूमौ स्नानार्थं च शिवस्य तु ॥ 118

गोमयं रोचना मूत्रं क्षीरं दधि घृतं गवाम् ।
षडंगानि पवित्राणि सर्वसिद्धिकराणि च ॥ 119

गोभिः यज्ञाः प्रवर्तन्ते गोषु देवाः प्रतिष्ठिताः ।
गोभिर्वेदास्समुद्गीर्णाः सषडंगपदक्रमाः ॥ 120

श्रृंगमूले गवां नित्यं ब्रह्मविष्णू प्रतिष्ठितौ ।
श्रृंगाग्रे सर्वतीर्थानि स्थावराणि चराणि च ॥ 121

शिरो मध्ये त्वहं वत्स सर्वभूतैस्समावृतः ।
ललाटे संस्थितो वत्स भ्राता तत्र विनायकः ॥ 122

कंबलाश्वतरौ नागौ नासापुटसमाश्रितौ ।
कर्णयोरश्विनौ देवौ चक्षुषोश्शशि भास्करौ ॥ 123

दन्तेषु मरुतो देवा जिह्वायां वरुण स्थितः ।
सरस्वती तु हुंकारे यमयक्षौ च गंडयोः ॥ 124

ओष्ठद्वये स्थिते संध्ये ग्रीवे चेन्द्रस्समारुतः ।
खुरमध्येषु गंधर्वाः खुराग्रेषु च पन्नगाः ॥ 125

खुराणां पश्चिमाग्रेषु अप्सराणां गणास्थिताः ।
रुद्रास्तु दशनडिस्थाः वायवस्सर्वसंधिषु ॥ 126

श्रोणिस्थाः पितरस्तावदुरस्था स्यादुमा भवेत् ।
क्षीरपाने गवां नित्यं गोमलाग्रमलाश्रिताः ॥ 127

आदित्यरश्मयोवत्स गोमूत्रे जाह्नवी स्वयम् ।
ऋषयश्च तथा सर्वे रोमाग्रेषु च संस्थिताः ॥ 128

उदरे पृथिवी ज्ञेया सशैलवनकानना ।
चत्वारस्सागराः पूर्णाः गवां ह्येव पयोधराः ॥ 129

गोमयादुत्थितः श्रीमान् बिल्ववृक्षः शिवप्रियः ।
तत्रास्ते पद्महस्ता श्रीः श्रीवृक्षस्तेन चोच्यते ॥ 130

बीजान्युत्पलपद्मानां पुनर्जातानि गोमयात् ।
कथिता देवतास्सर्वाः नित्यं गोषु प्रतिष्ठिताः ॥ 131

इत्थं गावस्समालोक्य तस्यार्थं गोमयं ग्रहेत् ।

स्वायंभुवे :–

प्रातरुत्थाय देवेशि मौनव्रतसमन्वितः ॥ 132

गवां गोष्ठे च गत्वा तु नमस्कृत्य च गोकुलम् ।
गोरोचना घृतक्षीरमन्नं चापि प्रदापयेत् ॥ 133

तांबूलं दापयित्वा तु गोसावित्रीं शतं जपेत् ।
तीक्ष्णशृंगाय विद्महे वेदपादाय धीमहि तन्नो गावः
प्रचोदयात् ॥ 134

ब्राह्मणस्य तथा श्वेता रक्ता वै क्षत्रियस्य तु ।
पीतवर्णा तु वैश्यस्य कृष्णा शूद्रस्य चोच्यते ॥ 135

पौर्णमास्याममावास्यां अष्टम्यां ग्रहणद्वये ।
क्रमाद्वै गोमयं ग्राह्यमन्यथा ग्राहयेन्न तु ॥ 136

वंध्या वृद्धा व्याधिता च दुर्लक्षणयुता तथा ।
तर्णकेन विहीना च वालमौख्यं विनाकृता ॥ 137

अमेध्याहारदक्षिण्य साध्यगावश्च गर्हिताः ।
कल्पं चैवानुकल्पं च उपकल्पमकल्पकम् ॥ 138

## भस्मविधिः ॥

तेषां लक्षणकं चैव क्रमाच्छृणुत सुव्रताः ।
सलक्षणा च कपिला रक्ता शुक्ल सितेतरा ॥ 139

तासां च गोमयं पद्मपत्रैरंभोद्भवैस्तथा ।
पलाशपत्रके वापि हस्ताभ्यां व्योम्नि धारयेत् ॥ 140

गोष्ठे वा गोमयं ग्राह्यं सद्योमन्त्रेण धारयेत् ।
पिण्डानि वाममंत्रेण अघोरेण तु शोषयेत् ॥ 141

दहेत्तत्पुरुषेणैव ईशानेन तु संग्रहेत् ।
अनुकल्पं ततश्चैव शृणु त्वं नन्दिकेश्वर ॥ 142

वने शुष्कं शकृत् ग्राह्यं चूर्णयित्वा ततः परम् ।
गोमूत्रैर्मर्दयित्वा तु पिण्डितन्तु तथा दहेत् ॥ 143

वस्त्रेणान्तरितं भस्म गोमूत्रात् पूर्ववद्दहेत् ।
अनुकल्पमिति प्रोक्तमुपकल्पं ततश्शृणु ॥ 144

दावाग्निना वने गोष्ठे दग्धं भस्म तु संग्रहेत् ।
दग्धं पूर्वोक्तविधिना भवेत्भस्मोपकल्पनम् ॥ 145

पूर्वोक्तविधिमुत्सृज्य केवलं भस्मसाधनम् ।
अन्येनापादितं भस्म अकल्पमिति कल्पितम् ॥ 146

पुरुषेण विशेषेण नवभाण्डेषु विन्यसेत् ।
पंचब्रह्म शिवांगैश्च व्योमव्यापि सकृज्जपेत् ॥ 147

चिन्त्यविश्वे :—

कर्बुरोशीर ह्रीबेर केतकैश्चंपकैस्तथा ।
मदनेशानमंत्रेण क्षिपेत्तस्मिन् विशेषतः ॥ 148

केतकी मल्लिका नाथ चंपकं पाटलं तथा ।
पद्मं पलाशं तुलसीमपामार्गं कुशाग्रकम् ॥ 149

जातिंच तत्र निक्षिप्य सद्भाण्डेषु परिग्रहेत् ।
अलाबुपात्रे मतिमान् भस्माधारे बिनिक्षिपेत् ॥ 150

भस्मालयं तु शक्तिः स्यात् तत् भस्म शिव एव तु ।
तं तु ब्रह्माधिदैवत्यं कवचेनैव वर्जयेत् ॥ 151

## भस्मधारणलक्षणं भस्मस्नानम् ॥

मतंगे :—

जलस्नानं पुरा कृत्वा भस्मस्नानमतः परम् ।
जलस्नाने त्वशक्तश्चेत् भस्मस्नानं समाचरेत् ॥ 152

सोमशंभौ :—

ईशानेन शिरोद्धूल्यमुखं तत्पुरुषेण तु ।
पशुरूपेण हृदयं नाभिं वामेन कीर्तितम् ॥ 153

सर्वांगं सद्यमंत्रेण समुद्धूल्य विचक्षणः ।

सुप्रभेदे :—

अथातो विधिसिद्धेन संहितामहितेन वा ॥ 154
निवृत्यादि विशुद्धेन भस्मना स्नानमाचरेत् ।

शिरस्तत् पाद पर्यंतं हुं फडंत शराणुना ॥ 155

मनस्नानमिदं ज्ञेयं शुद्धस्नाने मुखं विना ।

चिन्त्यविश्वे :—

द्वात्रिंशत् सन्धिदेशेषु अथवा षोडशेषु च ॥ 156

अष्टसंधिषु वा मंत्रं पंचस्थानेषु योजयेत् ।
उत्तमांगे ललाटे च कंठयोर्नेत्रयोस्तथा ॥ 157

नासाग्रयुगले चैवमंसद्वयमतः परम् ।
कूर्परे मणिबंधे च हृदये पार्श्वयोर्द्वयोः ॥ 158

नाभौगुह्यद्वये चैव ऊर्वोः स्फिक् द्वंद्व जानुनि ।
जंघाद्वये च पादौ च द्वात्रिंशत् स्थानमुच्यते ॥ 159

प्रियं वै चाष्टमूर्तीनां विद्येशानां तथैव च।
दिक्पालानां वसूनां च मूर्धादि परिकल्पयेत् ॥ 160

कारणे :—

शीर्षे चैव ललाटे च कंठे वांसद्वयोरपि।
कूर्परे मणिबंधे च हृदये नाभि पार्श्वके ॥ 161

पृष्ठे चैवं प्रतिस्थानं जंघे तत्राधिदेवताः।
त्रिपुंड्र् षोडशस्थाने धारयेद्वै शिवाश्रमी ॥ 162

स्कन्दपुराणे :—

शीर्षे भस्म धृतं गलोपरिकृतं पापं दहेत् तद्गले
भक्ष्याघं भुजयोस्तु तत्कृतमघं वक्षस्तु चिन्तार्जितम्।
नाभौ शिश्नकृतं तथा गुदकृतं पृष्ठे पदा जानुनोः
पार्श्वेन्या परिरंभणाघमिति यत् स्कान्दे पुराणे स्मृतम् ॥ 163

शिवस्सदा शिवश्चैव महेशो ब्रह्मपंचकम्।
विद्येश्वराश्च वै वत्स षोडशस्याधिदेवताः ॥ 164

अष्टस्थाने प्रवक्ष्यामि त्रिपुंड्र् दैवतं तथा।
शिरस्थाने स्वयं ब्रह्मा ललाटे स्कन्द एव च ॥ 165

कंठे विनायकः प्रीतो बाहौ वै विष्णुरेव च।
हृदये ईश्वरः प्रीतो नाभौ चैव वसुंधरा ॥ 166

पृष्ठे च पितरः प्रीताः त्रिपुण्ड्रेष्टौ प्रकीर्तिताः ।
अथवा मस्तकं बाहू हृदयं नाभिमेव च ॥ 167

पंचस्थानान्यमून्याहुः पंचमूर्तिश्च देवताः ।
आध्वरंकर्म तत्सर्वं त्रिपुंड्रेनैव कारयेत् ॥ 168

अकारोऽनामिका प्रोक्ता उकारो मध्यमांगुली ।
मकारस्तर्जनीस्थानं त्रिभिरेतैस्त्रिपुड्रकम् ॥ 169

द्विशतिकालोत्तरे :—

ब्रह्मा विष्णुश्च रुद्रश्च त्रिपुंड्रस्याधिदेवताः ।
सृष्टि स्थितिश्च संहारः त्रिपुंड्रस्य स्वरूपकम् ॥ 170

सुप्रभेदे :—

षडंगुलन्तु विस्तारं क्षत्रियाणां त्रिपुंड्रकम् ।
त्र्यंगुलन्तु वैश्यानां त्रिपुंड्रं सर्वकामदम् ॥ 171

एकांगुलं तु शूद्राणां स्त्रीणां चैव विशेषतः ।
तत्तद्वंशवती स्त्रीणां तत्तदेव विधीयते ॥ 172

दीप्ते :—

सप्तांगुलंतु विस्तारं ब्राह्मणानां विधीयते ।
पंचांगुलं क्षत्रियाणां वैश्यानां चतुरंगुलम् ॥ 173

त्र्यंगुलन्तु शूद्राणां स्त्रीणामेकांगुलं भवेत् ।

स्मृतिरत्नावल्यां :—

अर्द्धपुंडमनायुष्यं दीर्घपुंडतपक्षयम् ॥ 174

नेत्रयुग्मप्रमाणेन त्रिपुंडं धारयेद्बुधः ।

ललाटे यादृशं पुंड लिखितं भस्मना पुनः ॥ 175

तादृशं भुजयोर्मूर्ध्नि स्तनयोरन्तरे लिखेत् ।

शेषाश्चैकांगुलाः प्रोक्ताः विशेषेण त्रिपुंडकम् ॥ 176

सर्वज्ञानोत्तरे :—

आपादमस्तकं यावत् भस्मस्नानं द्विजस्य तु ।

नाभेरुर्ध्वं महीपानां आरक्तेन तु भस्मना ॥ 177

वैश्यस्य हृदि तत्प्रोक्तं शूद्रस्यतु त्रिपुंडकम् ।

सूक्ष्मे :—

निष्कं निष्कार्धकं चैव निष्कद्वय द्वयार्धकम् ॥ 178

हस्तप्रमाणकं प्रोक्तं विप्रादीनामधः क्रमात् ।

विप्रादीनां चतुर्णां वै भस्मस्नानं समाचरेत् ॥ 179

सर्वेषामन्त्यजातीनां मंत्रेण रहितं भवेत् ।

द्विशतिकालोत्तरे :—

त्रिपुंडं सुरविप्राणां वर्तुलं राजवैश्ययोः ॥ 180

अर्धचन्द्रं तु शूद्राणां अन्येषामूर्ध्वपुंडकम् ।
लिंगाकारं च दीपं च अर्धचंद्रं त्रिपुंडकम् ॥ 181

वृत्तमुद्धूलनं चैव षडेते शिवशासनम् ।

कारणे :—

समयी पुत्रकश्चैव साधकाचार्ययोरपि ॥ 182

त्रिपुंडैकविधानेन सर्वरक्षा विधीयते ।

द्विशतिकालोत्तरे :—

एकहस्तत्रिपुंडं यत् अधोमुखविलेपनम् ॥ 183

श्वानयोनिशतं प्राप्य चंडालगृहमाश्रयेत् ।
युग्महस्त त्रिपुंडं यत् ऊर्ध्ववक्त्रेण लेपयेत् ॥ 184

वर्षकोटि सहस्रेभ्यो रुद्रलोके महीयते ।
जलेन मिश्रितं भस्म त्रिपुंडं धारयेत्सदा ॥ 185

त्रिसप्तकुलमुद्धृत्य शिवलोके महीयते ।
यावत्तु पतिता भूमौ भस्मनः परमाणवः ॥ 186

तावद्युगसहस्राणि स कर्ता नरकं व्रजेत् ।
त्रिपुंडहीनं विप्रस्य श्मशान सदृशं मुखम् ॥ 187

तेन संभाषणं कुर्यात् शिवमंत्रशतं जपेत् ।
भस्मविद्धि परंब्रह्मन् सत्यबोधसुखान्वयम् ॥ 188

## भस्मपदव्युत्पतिः ॥

भर्त्सनात् सर्वपापानां दोषाणां च महामुने ।
भस्मेति कीर्तितं रक्षा रोगाणां च विभर्त्सना ॥ 189

भयेभ्यो रक्षणाद्रक्षा भासनात् भसितं तथा ।
भकारं भवविच्छेदं स्मकारं स्मरणं तथा ॥ 190

भवस्मरणसंसर्गात् भस्म इत्यभिधीयते ।
संध्यात्रये निशीथे च संध्यापूर्वावसानयोः ॥ 191

सुप्त्वा भुक्त्वा पयः पीत्वा कृत्वा चावश्यकादिकम् ।
स्त्रियं नपुंसकं शूद्रं बिडालबकमूषिकान् ॥ 192

स्पृष्ट्वा तथाविधानन्यानाग्नेयस्नानमाचरेत् ।

सुप्रभेदे :—

देवाग्निगुरुविप्राणां समीपेन्त्यज दर्शने ॥ 193

अशुद्धभूतले मार्गे कुर्यान्नोद्धूलनं प्रति ।
यः स्नानमाचरेन्नित्यमाग्नेयं यजितेन्द्रियः ॥ 194

कुलैकविंशमुत्तार्थ स गच्छेत् परमं पदम् ।
छद्मनापि च यो धत्ते भूतिशासनमैश्वरम् ॥ 195

सोपि यां गतिमाप्नोति न तत् क्रतुशतैरपि ।

शिवधर्मे :—

सर्वतीर्थेषु यत्पुण्यं सर्वक्षेत्रेषु यत्फलम् ॥ 196

तत्फलं लभते सर्वं भस्मस्नानान्नसंशयः ।
महापातकसंयुक्तः संयुक्तस्सर्वपातकैः ॥ 197

भस्मस्नानन्तु सेवेत मुच्यते सर्वपातकैः ।
भस्मस्नानात् परं स्नानं पवित्रं नैव विद्यते ॥ 198

उक्तं तत्सर्वदेवेभ्यः स्नातो येन शिवः स्वयम् ।
तदा प्रभृति ब्रह्माद्या मुनयश्च शिवार्थिनः ॥ 199

सर्वपर्वसु यत्नेन भस्मस्नानं प्रचक्रिरे ।
तस्मादेवं शिवस्नानं आग्नेयं यस्समाचरेत् ॥ 200

अनेनैव शरीरेण सरुद्रो नात्र संशयः ।
जलस्नानं शतं कृत्वा मंत्रस्नानं तु लक्षकम् ॥ 201

भस्मोद्धूलनमात्रेण सरुद्रो नात्र संशयः ।
भस्मोद्धूलितदेहानां आपादतलमस्तकम् ॥ 202

रोम्णि रोम्णि भवेल्लिंगं तद्देहं लिंगमुच्यते।

वासिष्ठ लैंगिके: —

त्रिसंध्यं भस्मना स्नानं त्रिपुंड्रं वा समाचरेत्॥ 203

सर्वपापविशुद्धात्मा शिवेन सह मोदते।
ये भस्मधारणं कृत्वा श्रौतस्मार्तानुवर्तिनः॥ 204

तैस्सदाचरितं कर्म विपरीत फलप्रदम्।
येषां क्रोधो भवेत् ब्रह्मन् ललाटे भस्मदर्शनात्॥ 205

तेषामुत्पत्तिसांकर्यमनुमेयं विपश्चिता।
ये भस्मधारिणं दृष्ट्वा ये च निन्दन्ति मानवाः॥ 206

तेषां शूद्रेण संभूतिरनुमेया विपश्चिता।
ये भस्मधारिणं क्रोधान्नराः कुर्वन्तिताडनम्॥ 207

तेषां चंडालतो ब्रह्मन् ऊह्यं जन्म विपश्चिता।
येषां नास्ति मुने श्रद्धा श्रौते भस्मनि सर्वदा॥ 208

गर्भाधानादि संस्कारस्तेषां नास्तीति निश्चयः।
येषां भस्मनि च द्वेषो वर्तते हृदये सदा॥ 209

संकीर्णा सा भवेत् ब्रह्मन् तेषां वंशपरंपरा।
ये भस्मधारिणं दृष्ट्वा परितुष्टा भवन्ति ते॥ 210

देवासुरमनुष्यैश्च पूज्या एव न संशयः।

वासिष्ठे :—

जानाति यो मां परभस्मरूपं मुनेऽग्निहोत्रादि समुत्थितं च।
मामेव मंत्रेण दधाति गौरं स याति मुक्तिं परविद्ययेव॥

भस्मना सदृशं ब्रह्मन् नास्ति लोकत्रयेष्वपि॥ 212

रक्षार्थं मंगलार्थं च पवित्रार्थं मया पुरा।
भस्म दृष्टा मुने वेदे दत्तं देव्यै प्रियेण तु॥ 213

श्रौतंभस्म धृतं ललाटफलके दृष्टिं समुत्पादये
मूर्ध्नि तद्वितनोति चन्द्रशकलं कंठे सितं लांछनम्।

गात्रे योषितमातनोति भुजयोरेणं त्रिशूलं यतो
धन्या ये दधते तदेतदमलं वक्ष्येऽनवद्ये तत्र॥ 214

भविष्यत् पुराणे :—

सितेन भस्मना कुर्यात् त्रिसंध्यं च त्रिपुंड्रकम्।
सर्वपापविनिर्मुक्तः शिवेन सह मोदते॥ 215

सत्यं शौचं जपो होमः तीर्थं देवादि पूजनम्।
तस्य सर्वं व्यर्थमिदं यस्त्रिपुंड्रं न धारयेत्॥ 216

लैंगे :—

भस्मस्नान विशुद्धात्मा जितक्रोधो जितेन्द्रियः ।
मत्समीप मुपागम्य न भूयो विनिवर्तते ॥ 217

शैवसंहितायां :—

यस्त्वकार्यसहस्राणि कृत्वा स्नपति भस्मना ।
तत्सर्वं दहते भस्म यथाग्निस्तेजसा वनम् ॥ 218

चन्दनागरु कर्पूर जाति कुंकुम कर्दमैः ।
श्रीकामः पुष्टिकामश्च नित्यं कुर्यात् त्रिपुंड्रकम् ॥ 219

वर्णानामाश्रमाणां च सर्वेषां प्राणिनामिदम् ।
त्रिपुंड्रधारणं प्रोक्तं जन्मबंधोपशान्तये ॥ 220

यथा विश्वाधिको रुद्रः सर्ववेदेषु गीयते ।
तथा सर्व पुराणेषु त्रिपुंड्रमपि गीयते ॥ 221

सापत्यसंहितायां :—

समिदाधान देवता वर्णने—
स्वायंभुवाद्या मुनयश्चतुर्दश महोदयाः ।
कनकांगार सर्वांगाश्शुद्ध यज्ञोपवीतिनः ॥ 222

त्रिपुंड्रालंकृतांगाश्च तथा रुद्राक्ष भूषणाः ।
शंभोः पदांबुजे मूर्ध्ना मालान्दत्वा ववन्दिरे ॥ 223

सावित्री च महाभागा कुन्देन्दु सदृशाकृतिः
रुद्राक्षभूषणा शुभ्रजटामकुट धारिणी ॥ 224

अक्षमालार्पितकरा कमंडलु करांबुजा।
त्रिपुंडैरवलिप्तांगी आषाढेन विराजिता ॥ 225

ऋग्यजुस्सामघोषेण सेवते स्म महेश्वरम्।
तनुपाप्म महाबाहुस्तप्तहेमसमप्रभः ॥ 226

ब्रह्मघोषेण संपन्नः पुंड्रत्रयविराजितः।
रुद्राक्षमालावलयो जटाजूट विराजितः ॥ 227

प्रणवश्च महाभागो वाचकः परमेष्ठिनः।
रुद्राक्षमालाभरण स्त्रिपुंड्रांकित मस्तकः ॥ 228

असेवत महादेवं योगिनां हृदयालयम्।
धृतत्रिपुंड्रको देवो रुद्राक्षैश्च विभूषितः॥ 229

शुशुभे च तथा विष्णुः भस्मदिग्धतनूरुहः।

इति वेद गायत्री प्रणवविष्णुप्रभृतीनामपि सर्वेषां मुनीनां च भस्मरुद्राक्षादि शिवशासनधारणमुच्यते, किमुतान्येषां, ननु भस्मनः संस्कारापेक्षि तत्वात् स्वतश्शुद्धिर्नास्ति, श्वेतमृत्तिकायास्तु संस्कारन-पेक्षितत्वबात् स्वतश्शुद्धित्वात्

ऊर्ध्वपुंड्रो मृदा शुभ्रो ललाटे यस्य दृश्यते ।

चंडालोऽपि विशुद्धात्मा पूज्य एव न संशयः ॥ इतिस्मृतिवचनात् । अतएव श्वेतमृत्तिकैव धार्येति केचिद्वदन्ति । अत्र ब्रूमः । जलस्नानात् भस्मस्नानस्याधिकशुद्धिकथनात् । भोजनकाले मक्षिका केशनखदूषितेऽन्ने भस्मक्षेपणस्योक्तत्वाच्च नित्यशुद्धं भस्म तस्य मंत्रवत् शोषणादिसंस्कारः जन्मतश्शुद्धस्य ब्राह्मणस्य उपनयनादि संस्कारवत् गुणातिशयायैव । किंच संस्कारानपेक्षिताया मृत्तिकाया मुख्यत्वे ब्राह्मणादपि शूद्रस्यापि मुख्यत्वं प्रसज्यते । किं च तुल्यबल विरोधो हि विकल्पः । श्रुति स्मृति विरोधे श्रुतिरेव बलीयसीति न्यायेन श्रौतस्य विभूतिधारणस्य मुख्यत्वे स्मार्तस्य मृत्तिकादिधारणस्यानुष्ठानमपि विफलमेव ।

तथाह गर्गः :—

यो वैदिकमनादृत्य कर्म स्मार्तैतिहासिकम् ।

मोहात् समाचरेत् विप्रो न स पुण्येन युज्यते ।

किंच केवलं न नैष्फल्यं-किन्तु दोषोऽपि-

प्रधानं वैदिकं कर्म गुण भूतं तथोत्तरम् । 233

गुणनिष्ठं प्रधानं हि हित्वा गच्छत्यधोगतिम् ॥ इति

तथा च ज्ञानरत्नावल्यां :—

त्रिपुंड्रं ब्राह्मणो विद्वान् मनसापि न लंघयेत् ।

श्रुत्या विधीयते तस्मात् तत्त्यागी पतितो भवेत् ॥ 235

ततः स्मार्तं मृत्तिका धारणात् श्रौतं विभूतिधारणं
मुख्यं नान्यथेति सुस्थितम् ॥ 236

ब्रह्माण्डपुराणे :-

त्रिपुंड्रं धारयेन्नित्यं अपवर्गफलप्रदम् ।
सर्वेषामपि जन्तूनामित्याह भगवानजः ॥ 237

स्मृतिसंग्रहे :-

धिक् भस्मरहितं फालं धिक् ग्राममशिवालयम् ।
धिगनीशार्चनं जन्म धिक विद्यामशिवात्मिकाम् ॥ 238

श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने ।
यस्त्रिपुंड्रं न धारयेत्तु तत्सर्वं निष्फलं भवेत् ॥ 239

त्रिपुंड्रहीनं विप्रस्य श्मशान सदृशं मुखम् ।
प्रमादाद्दर्शनं कृत्वा शिवमंत्रं शतं जपेत् ॥ 240

वासिष्ठे :-

त्रिपुंड्रवान् ललाटे स्यात् शूलांगेन परिष्कृतः ।
जातिहीनोऽपि संपूज्यो दैवतैः किमु मानुषैः ॥ 241

लैंगे :-

त्रिशूलं धारयेद्भक्तया बाहुमूलेतु दक्षिणे ।
सव्ये वृषं वहन्नंसे ललाटे च त्रिपुंड्रकम् ॥ 242
रुद्रं सदा सेवमानो रुद्र सारूप्यमाप्नुयात् ।

वायव्ये :-

भस्मदिग्धशरीराय यो ददाति धनम्मुदा ॥ 243
तस्य पापानि सर्वाणि विनश्यन्ति न संशयः ।
अभक्ष्यभक्षणं येषां भस्मधारण पूर्वकम् ॥ 244
तेषां तत् भक्ष्यमेव स्यात् मुने नात्र विचारणा ।
सहस्रगोहत्यानां च ब्रह्महत्यायुतस्यच ॥ 245
विभूतिस्वल्पमात्रेण सर्वपापहरा भवेत् ।
वनस्पति गते सोमे भस्मोद्धूलित विग्रहः ॥ 246
ऐश्वरं चालयं दृष्टवा ब्रह्महत्यां व्यपोहति ।
दुश्शीलश्शीलयुक्तो वा यो वा को वाप्यलक्षणः ॥ 247
भूतिशासनसंयुक्तः संपूज्यो राजपुत्रवत् ।
बहनोक्तेन किं भस्मधारणं मोक्षसाधनम् ॥ 248

मकुटे :-

भस्मदेवाकृतिं वक्ष्ये विशेषेण तु वै मुने ।
त्रिणेत्रं त्रिशिरं रौद्रं त्रिहस्तं गुणवक्त्रकम् ॥ 249

त्रिपादं वह्निनयनं भस्मकुंठित विग्रहम् ।
तांडवाडंबरं भीमं रक्तपुष्पोपशोभितम् ॥ 250

रक्षामंत्रेश्वरं देवं ध्यात्वा शान्ति लभेन्नरः ।
उत्तराभिमुखो भूत्वा मौनी ध्यात्वा शिवं गुरुम् ॥ 251

परमाणुसमं भस्म भूमौ न पतितं भवेत् ।
तावत्संगृह्य यत्नेन त्रिपुंडोद्धूलनं भवेत् ॥ 252

त्रिपुंड्माचरेत् स्नानं यथासंभवतोऽपि वा ।
धार्यं त्रिपुंड् स्त्रीणांच यतीनां जलवर्जितम् ॥ 253

वनस्थभूतिकन्यानां दीक्षाहीन नृणां तथा ।
मध्याह्नात् प्राक् जलैर्युक्तं परतो जलवर्जितम् ॥ 254

बहुनात्रकिमुक्तेन देवेशे क्षणवर्जितम् ।
अनायासेन पापानि प्रणश्यन्त्यखिलान्यपि ॥ 255

भस्मस्नानं पवित्रं शुचिकरमनिशं व्याधिनाशं सुमोक्षम्
गंगातीर्थेन तुल्यं सकलविषहरं क्रोधनाशं सुशान्तम् ।
रक्षः पैशाचयक्षो गणहरणमिदं तुष्टि पुष्टी समस्तम् ।
वश्यं लोके नराणां सकलजनसुखं पार्वतीश प्रसादम् ॥ 256

भस्मस्नानमनेकपापशमनं मुख्यं जलस्नानतो
बाह्याभ्यन्तरशुद्धिकृत् भवभयप्रध्वंसकृद्दर्शनात् ।

सर्वव्याधिमलापकर्षणपरं श्रौतानलोत्पत्तिमत
विष्णु ब्रह्म शतक्रतुप्रभृतिभिर्मूर्ध्नानवद्यैर्धृतम् ॥ 257

भूतिर्भूतिकरी पवित्रपरमा पापौघविध्वंसिनी
सर्वोपद्रवनाशिनी परतरा सौभाग्यसंपत्करी ।
भूतप्रेतपिशाच राक्षसगणापस्मार संरक्षणी
साक्षान्मोक्षकरी फल प्रकटिता भूतिस्सदा धार्यताम ॥ 258

विहितसलिल भस्मस्नान सन्ध्या प्रणामाः
कृतदिनकर पूजा पंचशुद्धिर्विधाय ।
विधिवदिह यजंते दीक्षिता ये नरास्तां
दिशसि शिव सदैभ्यो विघ्नहीनां विमुक्तिम् ॥ 259

श्रोतंभस्म धृतं ललाटफलके दृष्टिं समुत्पादये
मुर्ध्न्यैंतद्वितनोति चंद्रशकलं कंठे सितं लांछनम ।
गात्रे योषितमातनोति भुजयोरेणं त्रिशूलं यतो
धन्या ये दधते तदेतदमलं वक्ष्येऽनवद्यें तव ॥ 260

सुप्रभेदे :—

सूर्यांशु वर्ष संपर्के प्राङ्मुखेनोर्ध्वबाहुना ।
माहेन्द्रस्नानमीशेन कार्यं सप्त तदावधि ॥ 261

आदित्याभिमुखः पश्चात् तन्नमस्कृत्य बुद्धिमान् ।
एवं कृते महापापात् मुच्यते नात्र संशयः ॥ 262

गोसंघ मध्यगः कुर्यात् तत् खुरोद्घात रेणुभिः ।
पावनं नरमंत्रेण स्नानं तद्धर्मणाथवा ॥ 263

सद्योजाताभिर्मन्त्रैरंभोभिरभिषेचनम् ।
मंत्रस्नानं भवेदेवं वारुणाग्नेययोरपि ॥ 264

आचमनम् ॥ कालोत्तरे:-

एवं स्नात्वा विधानेन सर्वपापक्षयो भवेत् ।
बद्धचूड शिराः पादौ पाणी प्रक्षाल्य वारिणा ॥ 265
उपविश्य शुचिस्थाने प्राङ्मुखो वाप्युदङ्मुखः ।
जानुमध्यकरो मौनी श्वानादीन्नावलोकयेत् ॥ 266

अनन्य मानसो भूत्वा स्वच्छश्शीतलवारिभिः ।
फेनबुद्बुदनिर्मुक्तैर्वस्त्रपूतैस्समुद्धृतैः ॥ 267
आचमेत् कृमिभिर्जुष्टैर्नान्त्यजाति निषेवितैः ।
संग्राह्य माषमग्नांबु सव्यपाणिपुटेन च ॥ 268
संवीक्ष्यांगुष्ठमूलस्थ ब्रह्मतीर्थेन तत्पिबेत् ।

अजिते:-

हृद्गतं विप्रनिर्दिष्टं कंठगं स्यान्नृपस्य तु ॥ 269

तालुगं च वैश्यानां शूद्राणामोष्ठगं भवेत् ।
विप्रादीनां च वर्णानां क्रमेणांबुगतं भवेत् ॥ 270

ज्ञानरत्नावल्यां:-

स्वधांतैरात्मतत्वाद्यैर्हां ह्रीं हूं प्रणवादिभिः ।
माया संदेश शत्तयंत तत्वजात विशोधकैः ॥ 271

कित्वन्तरान्तरे हस्ते प्रक्षाल्य च मुहुर्मुहुः ।
ओष्ठावंगुष्ठमूलेन हेतिना मार्जयेत् द्विधा ॥ 272

ध्यानरत्नावल्यां:-

चतुर्भुजं पंचवक्त्रं चतुर्वक्त्रांबुजस्थितम् ।
आत्मतत्वं स्मृतंह्येतत् तप्तचामीकरप्रभम् ॥ 273

स्रक्कमंडलुकं वामे दक्षे पद्माक्षमालिकाम् ।
यथा नीलास्पदं नीलामष्टाश्राष्टभुजान्वितम् ॥ 274

चक्रबाणाब्ज चिन्मुद्रा शंखकार्मुककुण्डिकाः ।
अभयं च यथा योगं दधानं दक्षवामयोः ॥ 275

एकवक्त्रं तु सौम्यास्यं विद्यातत्वं प्रकीर्तितम् ।
शुद्धस्फटिकसंकाशं वृत्तं सर्वार्थगर्भितम् ॥ 276

शिवतत्वं स्मृतं ह्येतत् पंचवक्त्रं चतुर्भुजम ।
दक्षे पद्माभमालां च वामे शूलकमंडलुम् ॥ 277

तंत्रसारे:-

मुखाक्षिकर्णनासं च नाभिहृत् भुजमस्तकान् ।
अंगुष्ठानामिकाग्रेण दक्षवाम हृदि स्पृशेत् ॥ 278

षराख्ये:-

मत्रेदीशस्सदांगुष्ठोऽनामिकायामृताकला ।
तयामृतात्मना देया मृततृप्तास्त्वनामयाः ॥ 279

भवंति तत् क्रियाकर्तुः क्रियाभावोपबृंहिकाः ।
भारती रसनाग्रस्था प्रणवश्चोष्ठसंपुटे ॥ 280

नासापुटद्वये प्राणश्चक्षुषोश्शशिभास्करौ ।
श्रोत्रयोश्च दिशस्सर्वाः नाभौ ब्रह्मा शिवो हृदि ॥ 281

शुध्यर्थं मस्तके विष्णुरंसयोरश्विनौ स्थितौ ।
पूर्वोक्तविधिना पुंड्रं धृत्वाचम्य न्यसेत्ततः ॥ 282

करन्यासं ॥ कारणे:-

शोधयेदस्त्रमंत्रेण तलकौ हस्तपृष्ठकौ ।
सव्यमेकं द्विधा वामं चास्त्रमंत्रेण शोधयेत् ॥ 283

ओं हां हौं शक्तये वौषडित्याकल्प्य करद्वयम् ।
तलयोरंगुष्ठाभ्यांच विन्यस्यासनमूर्तिकम् ॥ 284

अंगुष्ठादि कनिष्ठान्तं पंचब्रह्म न्यसेत्ततः ।
ईशानादीनि सद्योन्तं क्रमाद्विन्यस्य बुद्धिमान् ॥ 285

तलयोरंगुष्ठाभ्यां च विद्यादेहं न्यसेत्ततः ।
मध्यामिरंगुलीभिश्च नेत्रं हस्ततले न्यसेत् ॥ 286

प्रासादं करशाखासु विन्यस्यांगानि विन्यसेत् ।
हृदयादि करान्तेषु कनिष्ठाद्यंगुलीषु च ॥ 287

विन्यस्यांगुलिभिर्मध्ये कवचेनावकुंठयेत् ।
करांगुलीषु सर्वासु प्रासादं विन्यसेत्ततः ॥ 288

करन्यासं समाख्यातमंगन्यासं ततश्शृणु ।

अंगन्यासं :-

दक्षिणांगुष्ठानामिकाभ्यां हृदित्वासनमूर्तिकम् ॥ 289

विन्यस्य विधिवद्देहे पंचब्रह्म न्यसेत्ततः ।
मूर्ध्नि वक्त्रे च हृद्देशे गुह्यदेशेऽथवा द्वयोः ॥ 290

ईशानादिक्रमेणैव विन्यसेत् पिण्डपंचकम् ।
अंगुष्ठाग्रेण मूर्ध्नीशं विन्यसेत् बद्धमुष्टिना ॥ 291

मुखे तत्पुरुषंचैव तर्जन्यंगुष्ठ योगतः ।
मध्यमांगुष्ठयोगेन हृद्यघोरं न्यसेत्ततः ॥ 292

अंगुष्ठानामिकायोगात् गुह्ये वामंच विन्यसेत् ।
कनिष्ठांगुष्ठयोगेन सद्योजातं तु पादयोः ॥ 293

अंगुष्ठानामिकाग्रेण विद्यादेहं न्यसेद्धदि ।
लोचने विन्यसेन्नेत्रं मध्यमाभिस्त्रिरंगुलैः ॥ 294

प्रासादं हृदि विन्यस्य पश्चादंगानि विन्यसेत् ।
कनिष्ठांगुष्ठयोगेन पूर्वांगान्यपि विन्यसेत् ॥ 295
हृदयादि न्यसेदेवं कवचस्तन मध्यतः ।
कण्ठप्रावरणत्वेन तर्जनीभ्यां न्यसेत्ततः ॥ 296
अनामिकाभ्यां हस्ततले अस्त्रमंत्रन्तु विन्यसेत् ।

सोमशंभौ :-

सर्वास्वपि च काष्ठासु तालत्रय पुरस्सरम् ॥ 297
छोटिकाभिःशिवस्यास्त्रं रक्षार्थं विघ्नवारकम् ।
प्राकारं च तनुत्रेण तद्बहिः परिघान्वितम् ॥ 298
दर्शयित्वा महामुद्रां कादि पादान्तकं ततः ।
हृदयं यत्परित्राण पट्टबंध पदादिकम् ॥ 299
शिरश्च तच्छिरस्त्राणं शिरसः परिवेष्टनम् ।
चूलिका मस्तकत्राणमंगत्राणं च कण्टकम् ॥ 300
करेशस्ते गृह्णते तु भीषणे भटवत् स्थितः ।
क्षुद्राणामप्रधृष्यस्स्यात्तार्क्ष्यो दक् श्रवसामिव ॥ 301
ब्रह्माणि ह्रस्वं प्रोक्तानि दीर्घाण्यंगानि षण्मुख ।
अनुस्वारो भवेन्नेत्रं सर्वेषां नोपरिस्थितम् ॥ 302
सविसर्गं भवेदस्त्रं अनुस्वार विवर्जितम् ।

## पंचब्रह्मषडंगानि ॥

कारणे :-

सद्यं वाममघोरं तु तत्पुरुषेशानकौ द्विजाः ॥ 303

ब्रह्माण्यनुक्रमेणैव नमस्कारान्तकाणि तु ।

हृदयं च शिरश्चैव शिखा कवचमेव च ॥ 304

नेत्रशस्त्र षडंगानि कीर्तितानि क्रमेण तु ।

मंत्रपल्लवं :-

नमस्स्वाहा वषट् वौषट् हुंफट्काराः क्रमेणतु ॥ 305

एते वै जातिषट्काश्च हृदाद्यस्त्राणुकैर्युताः ।

सार्धत्रिशतयां :-

ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदोभवेत् ॥ 306

आप्यायते प्लुतश्चेति मूर्ध्नि बिन्दु विभूषितम् ।

मंत्रवार्तिके :-

वषट् वश्यं फडुच्चाटे हुं द्वेषे मारणेऽपि च ॥ 307

स्तंभे च वौषडाकर्षे नमस्संपत्कराय च ।

स्वाहा शक्ति स्वधा पुष्टिरित्येते मंत्रपल्लवाः ॥ 308

परमीकरणं कृत्वा महामुद्रा प्रयोगतः ।

हस्ताभ्यां संस्पृशेद्धीमान् कादिपादांतकं यतः ॥ 309

एषा मुद्रा महामुद्रा अंगसंस्कारकर्मणि ।
अविभिन्नस्वभावानां यदभिन्नप्रयोजनम् ॥ 310
अंगानां अंगिनां सार्धं अमृतीकरणं हि तत् ।
प्राणायामादि तक्षणम् ॥

क्रियाकाण्डक्रमावल्यां :-

सकलीकरणं कृत्वा प्राणायामेन संस्थितः ॥ 311
त्रिस्समावर्तयेन्मंत्री मनसा शिवसंहिताम् ।
पूर्ववत् पुनराचम्य विधाय श्रोत्रवन्दनम् ॥ 312

शिवधर्मोत्तरे :-

प्राणो वायुश्शरीरस्थः तस्य यामो निरोधनम् ।
रेचकं पूरकं चैव कुंभकस्त्रिविधास्मृताः ॥ 313
रेचयेदूर्ध्वं वायुं च द्वात्रिंशन्मात्रया गुह ।
पूर्ववत् पूरयेद्धीमान् वामेन तु समाहितः ॥ 314
दृतिवत् पूरयेद्धीमान् जठरं बाह्यवायुना ।
पूर्वं षोडशमात्रं तु पूरयेत् कुंभकं तथा ॥ 315
चतुष्षष्टिकमात्रं वा सम्यक् कुंभेन पूरयेत् ।
आपूर्यैव ततो ध्यायेदात्मानममृतेन तु ॥ 316
रेचयेद्दक्षिणे वायुं वामेनापूरितोदरम् ।
कुंभकं तु समं कुर्यात् प्राणायामस्च लक्षणम् ॥ 317

रेचकात् समुखं पद्मं पूरकात् पुष्पशोभितम् ।
कुंभकाच्छिवसायुज्यं प्राणायामफलं स्मृतम् ॥ 318

इडा चन्द्रकला ज्ञेया पिंगला भास्करांशिका ।
द्वयेन पूरयेद्वायुं नासिकामंडलद्वयम् ॥ 319

प्रणवाद्दशकं मात्रं प्रत्येकं कल्पितं तु वा ।
संहिता मंत्रसंयुक्तं पूरकादि क्रमात् कुरु ॥ 320

न मुंचति न गृह्णाति वायुमन्तर्बहिःस्थितम् ।
संपूर्णकुंभवत्तिष्ठेदचलस्सतु कुंभकः ॥ 321

## अंकुशमुद्रा । सुरभिमुद्रा ।

निरीक्षणादिभिश्शोध्य जलमंकुशमुद्रया ।
ललाटात्तीर्थमाकृष्य ओं ह्रां हृदयाय वौषट् ॥ 322

शराणुनाथ संरक्ष्य शक्तिमंत्रेण मंत्रवित् ।
अमृतीकरणं कुर्यात् विघ्नौघानां निवारणम् ॥ 323

सुप्रभेदे :-

वेणीबन्धौ करौ कृत्वा ह्यंगुष्ठौ युग्मसंस्थितौ ।
तर्जनी मध्यमे लीना कनिष्ठानामिकायुता ॥ 324

एवं चत्वारि युग्मानि दिव्यामृतसुवर्षिणी ।
इयं सुरभिमुद्रा च द्रव्यशुध्यर्थमुच्यते ॥ 325

# त्रिसंध्याकाल देवता

मोहशूरोत्तरे :-

उत्तमा दृष्टनक्षत्रा मध्यमालुप्ततारका ।
अर्धोदितारुणात्वन्या प्रातस्संध्या त्रिधा मता ॥ 326

मध्याह्ने च तथा ज्ञेया घटिकात्रय कल्पिता ।
अर्धास्तमंडले श्रेष्ठा मध्यमास्तमितेरवौ ॥ 327

अन्या तु दृष्टनक्षत्रा सायंसंध्या त्रिधा मता ।
स्थित्वा संध्यामुपासीत प्रातश्शुद्धः कृताजलिः ॥ 328

आसीनो वास्थितो मध्ये आसीनस्सायमाजपेत् ।
प्राक् संध्यां समयस्थस्या विशिष्टस्याह्निकद्वयम् ॥ 329

निर्वाणदीक्षितस्यात्र संध्यात्रयमुदाहृतम् ।
चतुर्थ्यामपि संध्यायां पूर्ववद्देशिकोत्तमः ॥ 330

रात्रौ नैव गृहस्थस्य दक्षिणायनवर्जितम् ।
यतीनां सर्वदा शस्तं सर्वेषामविशेषतः ॥ 331

ब्राह्मणीं वैष्णवीं रौद्रीं रक्तां शुक्लां सितेतराम् ।
प्रातर्मध्याह्नसायाह्न संध्यां ध्यायेदनुक्रमात् ॥ 332

कृष्णाजिनधरास्सर्वाः साक्षिण्यस्सर्वकर्मणाम् ।
तत् प्रभामंडलाभोगाः प्रविष्टां स्वतनुं स्मरेत् ॥ 333

ज्ञानिनां परमासंध्या श्च नस्रोऽभिदधेऽधुना ।
मृणालतंतुवत्तन्वी रक्ता शुक्ला सितेतरा ॥ 334

तुर्यात्वरूपा कृष्णा वा या निशीथे विभाव्यते ।
हृद्बिन्दुब्रह्मरंध्रेषु परे चैताः स्थिताः क्रमात् ॥ 335

तिस्रस्सत्वादिसंयुक्ताः चतुर्थी गुणवर्जिता ।
सूर्याचन्द्रमसोरन्त द्वे संध्ये प्राणयोगिना ॥ 336

शिवबोधपरा या तु सा संध्या परमोच्यते ।
सर्वदा शिवभावस्तु ज्ञानिनां संधिरीरिता ॥ 337

ततश्शिवात्मकैर्मन्त्रैः कृत्वा तीर्थं शिवात्मकम् ।

अर्घ्यं :-

सुस्निग्धं चन्द्रसदृशं स्रवंतममृतं ततः ॥ 338

कुंभमुद्रां पुरा बध्वा संहितां च सकृत् स्मरेत् ।
पृथिव्यां यानि तीर्थानि तत्र स्नानो भवेत्तदा ॥ 339

वामपाणि पदंतोयं योजयेत् सव्यपाणिना ।
उत्तमांगे क्रमान्मंत्रैः मार्जनं समुदाहृतं ॥ 340

कामिके :-

नीत्वा तदुपनासांतं दक्षपाणिपुटस्थितम् ।

बोधरूपं सितं तोयं वामयाकृष्य कुंभयेत् ॥ 341

तत्तोयं कज्जलाभासं पिंगला रेच्यमुष्टिना ।
क्षिपेद्वज्रशिलायां यत् तद्भवेदघमर्षणम् ॥ 342

ततो द्विधा समाचम्य कृतन्यासः प्रसन्नधीः ।
यदा यदा समाचामेत् मंत्रन्यासं प्रसन्नधीः ॥ 343
कुर्वीत करकायेषु मंत्री मंत्रार्थसिद्धये ।

## गायत्री ध्यानम्

सूक्ष्मे :-

सव्यहस्ते जलं ग्राह्यं अस्त्रमंत्र प्रदक्षिणम ॥ 344
रविमंडलमध्यस्थं ध्यायेत् शांतं सदाशिवम् ।
स्वाहान्त शिवमन्त्रेण कुशपुष्पाक्षतान्वितम् ॥ 345
शिवाय प्रांजलिं कृत्वा गायत्रीं शक्तितो जपेत् ।
तप्तकांचनवर्णाभां समयस्थापनीं पराम् ॥ 346
चतुर्भुजां त्रिणेत्रां च गायत्रीं सततोदिताम् ।
वराभयाक्षमालाश्च कुंटिकां बिभ्रतीं करैः ॥ 347
एवं ध्यात्वा नु गायत्रीमारभेत्तु जपं यथा ।
सप्तावर्ता पुनात्यैनं दशभिः प्रापयेद्दिवम् ॥ 348
विंशावर्ता नु सा देवी नयत्यैश्वरमालयम् ।
शतमष्टोत्तरं जप्त्वा तारयेज्जन्मसागरात् ॥ 349
मंत्राणां दीपनार्थाय संहितां तर्पयेत् क्रमात् ।

## देवतादि तर्पणलक्षणं ॥

कामिके :-

कुशाक्षततिलोपेतं मंत्रवारि विसर्जनम् ॥ 350

स्वाहान्तं मंत्रदेवानां मुनीनान्तु नमोन्तकम् ।
मनुजे च वषट्चैव भूतानां वौषडंतकम् ॥ 351

पित्रादीनां स्वधान्तं स्याद्यथा यज्ञोपवीतयुक् ।
तर्पणं करशाखाग्रे देवानां च प्रियं भवेत् ॥ 352

कुशपुष्पाक्षतेनैव देवानां तर्पयेद्बुधः ।
कुशैर्यवैः ऋषीणां तु पितॄणां च तिलेन तु ॥ 353

## तर्पणम् ॥

कालोत्तरे :-

देवानां च ऋषीणां च जलेनैव तु तर्पयेत् ।

तदुक्तं स्मृतावपि :-

गोश्रृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥ 354

पितॄणां जलतीरे तु नित्यं चैव यथा विधि ।

कामिके :-

कराग्रे दैविकं तीर्थं पर्वसंधिषु चार्षिकम् ॥ 355

तीर्थं कनिष्ठिकामूले प्राजापत्यं प्रकीर्तितम् ।
पैतृकं तर्जनीमूले ब्रह्मकं करमूलतः ॥ 356

एवं ज्ञात्वा विशेषेण देवानां तर्पणं कुरु ।
देवानां तर्पणं पाद्यं ऋषीणां तु प्रियं भवेत् ॥ 357

अन्येषां देवजातीनां तर्पणं जीवनं भवेत् ।
दिशा दिक्पतिसिद्धानां मातॄणां गृहरक्षसां ॥ 358
यथाविधि विधातव्यं तर्पणं पितृपूर्वतः ।
ततः परं गणेशादीन् तर्पयेद्विधिपूर्वकम् ॥ 359
अग्निदग्धाश्च ये जीवाः येऽप्यदग्धाः कुले मम ।
भूमौ दत्तेन तोयेन तृप्ता यांतु परां गतिम् ॥ 360

## जपस्थानम् ॥

श्रीमन्मृगेन्द्रे :-

संध्याकालपरिभ्रंशे शिवैकादशिकां जपेत् ।

कामिके :-

विद्वान् विरेच्य मार्गस्थानस्नामृतविमानगः ॥ 361
व्रजेत् देवालयं वापि गृहमात्मीयमुत्तमम् ।

सुप्रभेदे :-

लिंगाद्धस्तशतं सार्धं शिवक्षेत्र समंततः ॥ 362
यस्य तत्रैव वाधिक्यं शिवलोकस्य कारणम् ।
यत्तु मानुषकं लिंगं क्षेत्रमानमिदं स्मृतम् ॥ 363
स्वयंभूते सहस्रं स्यादार्षेचैव तदर्धकं ।
आराधितानि सर्वाणि स्थावराणि चराणि च ॥ 364

दिव्यं प्रयान्त्यसंदेहः प्रभावात् परमेष्ठिनः ।
तस्मादावश्यकं कार्यं शिवक्षेत्र समीपतः ॥ 365

## देवतादि गृहस्थानम् ॥

किरणे :-गरुडः

भगवन् प्रोक्तमैशान्यां दिशि स्याद्देवतागृहम् ।
तद्गृहं कीदृशं शस्तं ब्रूहि मे तस्य लक्षणम् ॥ 366

ईश्वर :-

चतुश्शाला गृहाणां तु तत्रान्या कल्पना मता ।
पूर्वायां श्रीगृहं प्रोक्तं आग्नेय्यां स्यान्महानसम् ॥ 367

शयनं दक्षिणायां स्यात् नैर्ऋत्यामायुधालयम् ।
भोजनं पश्चिमायां स्यात् वायव्याम् धान्यसंचयम् ॥ 368
उत्तरे द्रव्यसंस्थानं ऐशान्यां देवतागृहम् ।

## भूशोधनम् ॥

मतंगे :-

एकशालां द्विशालां वा त्रिशालामथवा शुभाम् ॥ 369
वित्तानुसारतः कुर्याच्चतुश्शालमथापि वा ।
याम्याग्नेयान्तरं कार्यं स्थापनं सलिलात्मनाम् ॥ 370

भांडानां मुनिशार्दूल विधिवत्परिकल्पयेत् ।
चतुष्पदानां सर्वेषां निशि सौम्यं प्रशस्यते ॥ 371

ततस्तु संप्रवक्ष्यामि महीतल विशोधनम् ।
सुगंधा स्वादुसंयुक्ता श्वेतरक्ताथ पिंजरा ॥ 372
पांसुरभ्यधिकान्धन्या भूमिसर्वार्थसाधिनी ।
केशास्थिकंटकैरूनां गर्तोषरविवर्जिताम ॥ 373
सर्ववल्मीकनिर्मुक्तां भस्मांगारतुषोज्झिताम् ।
त्रिहस्ते द्वान्तभूशल्यां सर्वदोषविवर्जिताम ॥ 374
वास्तुमिष्टवा यथा शास्त्रं कृत्वा भूमिं समप्लवाम् ।
पक्वेष्टकमयं वापि शुद्धदारुमयं तथा ॥ 375
मृण्मयन्तु पुराकृत्वा स्थापयेद्यागमण्डपम् ।

## पूजास्थलद्वारलक्षणम् ॥

सर्वज्ञानोत्तरे :-

दैर्घ्यं तद्द्विगुणं कृत्वा विस्तारे चैकभागिकाम् ॥ 376
द्वारात्तृतीयके भागे सार्धहस्त प्रमाणतः ।

किरणे :-

कुर्याद्वा पश्चिमद्वारं दक्षिणं पूर्वमेव वा ॥ 377
इति नित्यार्चने शस्तं मंदिरं भुक्तिमुक्तिदम् ।

## वेदिका ॥

एकभौमं द्विभौमं वा तद्विधानमिहोच्यते ॥ 378

क्षेत्रं तत् पंचधा कृत्वा मध्यभागे तु वेदिका ।
ऐष्टिका मृण्मया श्रेष्ठा नैव शैलसुधामया ॥ 379

षोडशाष्टांगुलोच्छ्रायं कोणस्तंभादि संयुतम् ।

अंशुमत्यां :-

सुगुप्तं विजनं रम्यं प्रकीर्णं कुसुमोज्वलम् ॥ 380

सुधूपामोदगंधाढयं चर्चितं चन्दनादिभिः ।
निष्कंपार्चिः प्रदीपाढयं दर्पणांशु प्रपूरितम् ॥ 381

पूजास्थलं प्रविश्याथ मृत्कास्रकजलैर्युतम् ।
पादप्रक्षालनं कृत्वा तच्छेषं वर्जयेज्जलम् ॥ 382

पुनर्जलं समादाय आचम्य विधिना बुधः ।
मण्टपान्ते प्रविश्याथ सौरपूजां समाचरेत् ॥ 383

## सौरपूजा ॥

अंशुमति :-

सकलस्सूर्यस्रूपस्तु निष्कलश्शिव एव च ।
देहस्थं पूर्वमाराध्य पश्चाद्देवं यजेद्बुधः ॥ 384

सौरप्रतिमबेरे च चक्रे वापि समर्चयेत् ।
स्थण्डिले पद्ममालिख्य यथा पूर्वोक्तमार्गतः ॥ 385

कृत्वाकरांग विन्यासं तन्मन्त्रैः हृदयादिभिः ।
आत्मानं रविरूपेण संचिंत्यार्घ्यस्य भाजनम् ॥ 386

अस्त्रमंत्रेण संशोध्य नमोन्तेन खषोल्किना ।
पूरयेद्रक्तवर्णेन ललाटाकृष्टबिन्दुना ॥ 387

तस्मिन् पूज्य रवेरंगैः कृत्वा रामाय कुंठनम् ।
संप्रोक्ष्य तज्जलैर्द्रव्यं पूर्वस्यां भानुमर्चयेत् ॥ 388

## सौर प्राकार देवता पूजा

सूक्ष्मे :-

दंडिद्वा दक्षिणे गौरस्थूलस्तुन्दिल तुच्छवान् ।
मषिभाजनलेखिन्यौ धारयन् हस्तयोर्द्वयोः । 389

प्राणिनां कर्मसाक्षी च तत् कर्माणि लिखत्यसौ ।
पिंगलो वामपार्श्वेतु प्रतिहारश्च दंडवान् ॥ 390

रक्तपद्मासनासीनं दन्तं पाशांकुशौ फलम् ।
दधानं च चतुर्हस्तैर्गजवक्त्रं गणाधिपम् ॥ 391

जटामकुटशोभाढ्यं भस्मपांडरविग्रहम् ।
योगपट्टयुतं ब्रह्मसूत्रं नाभिस्थलोपरि ॥ 392

कृतयोगाख्य मुद्रं च ध्यायेच्छांतं गुरुं परम्।
सितकाश्मीररक्तालिचारुसिंहाकृतिं स्मरन् ॥ 393

आग्नेयादीशपर्यन्तं कोणेषु च यथाक्रमम्।
विमलं सारमाराध्यं पूजयेत् परमं सुखम् ॥ 394

तन्मध्ये पंकजं रक्तमष्टदिग्दल शोभितम्।
केसरेषु च दीप्तादीरष्टशक्तीः प्रपूजयेत् ॥ 395

पूर्वादीशानपर्यंतं ईशाने सर्वतोमुखम्।
दीप्तदीपशिखाकारा ध्यातव्या नवशक्तयः ॥ 396

पद्मचामर हस्ताश्च रक्तास्सर्वांगभूषणाः।
सूर्यस्याभिमुखास्सर्वाः सर्वाभरणभूषिताः ॥ 397

एवं ध्यात्वा तु संपूज्य विस्फुरां च प्रदर्शयेत्।
सौरं कुंकुम संकाशं सर्वाभरणभूषितम् ॥ 398

द्विनेत्रं चारुवदनं रक्तमाल्यानुलेपनम्।
चतुर्भुजसमोपेतं वरहस्तांबुजद्वयम् ॥ 399

अभयं वरदोपेतं प्रभामंडलमंडितम्।
उपवीतसमायुक्तं उषा प्रत्युषयान्वितम् ॥ 400

उषा देवीं दक्षभागे प्रत्युषां वामपार्श्वके।
द्विभुजं च द्विनेत्रं च सरोजवदनान्वितम् ॥ 401

सर्वाभरणसंयुक्तं सर्वलक्षणसंयुतम् ।
पद्महस्तं वरारोहं अरुणेन समन्वितम् ॥ 402
सुप्रसन्नं सुदीप्तांगं ध्यायेदेवं रवेर्वपुः ।

मुक्तिकामश्चेत् :-

धवलांभोरुहारूढं दाडिमीकुसुमप्रभं ॥ 403
स्फुरद्रक्तमहातेजो वृत्तमंडलमध्यगं ।
अंसासक्तस्फुटश्वेतसनालाब्जकरद्वयम् ॥ 404
एकास्यं चिंतयेद्भानुं द्विनेत्रं रक्तवाससम् ।
आवाहनादिमुद्राभिर्विधायावाहनादिकम् ॥ 405
प्रीतये ग्रहराजस्य बिंबमुद्रां प्रदर्शयेत् ।
सकलीकारमेकत्वं कृत्वा कुर्यात् खषोल्किना ॥ 406
पाद्यमाचमनीयं च शिरोर्ध्यं गात्रमर्चयेत् ।
संपूज्य गंधपुष्पाद्यैर्मूलमंत्रेण भास्करम् ॥ 407
पद्माख्यं बिंबमुद्रां च भक्तया तस्मै प्रदर्शयेत् ।
अग्नौ हृदयमीशाने शिरो नैऋतिके शिखाम् ॥ 408
वायव्यां कवचं नेत्रं पुरो दिक्ष्वस्त्रमर्चयेत् ।
सौम्यानि रक्तवर्णानि वरदाब्जकराणि च ॥ 409
भूषितानि द्विहस्तानि भानोरंगानि भावयेत् ।
दंष्ट्राकरालमत्युग्रं प्रज्वलत् पावकप्रभम् ॥ 410

तर्जयन्विघ्नसंघातमित्थमस्त्रं विचिन्तयेत् ।
धेनुमुद्रां हृदादीनां गोविषाणं च नेत्रयोः ॥ 411

## नवग्रह पूजा

किरणे :-

अस्त्रस्य त्रासनीमुद्रा ग्रहाणां तु नमस्क्रिया ।
सोमं कुमुदकुंदाभं बुधं चामीकरप्रभम् ॥ 412

गुरुं गोरोचनाभासं शुक्रं गोक्षीरसन्निभम् ।
रक्तमंगारकं ध्यायेत् राजावर्तनिभं शनिम् । 413

कृष्णं कृतांजलिं राहुं केतुं धूमाहि सन्निभम् ।
कामरूपधरास्सर्वे दिव्याभरणभूषणाः ॥ 414

वामोरुन्यस्त हस्ताश्च दत्तहस्ताभयप्रदाः ।
सितपद्मकरं सोमं राहुकेतू कृतांजली ॥ 415

अर्धकायोर्ध्वकेशौ च रक्तभ्रू रक्तलोचनौ ।
शनिं दंष्ट्राकरालं च राहुं च विकृताननं ॥ 416

पूर्वादि दिग्दलाग्रेषु सोमाद्यष्टग्रहान्यजेत् ।
ध्यानपूर्वं ग्रहानेवं पूजयित्वा यथाक्रमम् ॥ 417

धूपदीपादि नैवेद्यं सर्वं देयं खषोल्किना ।
मूलमंत्रजपं कृत्वा यथाशक्ति समाहितः ॥ 418

अर्घ्यपाद्यांबुना भक्त्या भास्कराय निवेदयेत् ।
स्तुत्वा प्रणम्य संपूज्य निवेद्यार्घ्यं पराङ्मुखम् ॥ 419

अभिधाय क्षमस्वेति हुंफडन्त शराणुना ।
समाहृत्याणुसंघातं संहारिण्योपसंहृतम् ॥ 420

हृत्पुंडरीकमध्यस्थे शिवसूर्ये नियोजयेत् ।
चंडं रक्तं करालास्यं अब्जाभयकरद्वयम् ॥ 421

अनेनादित्यनिर्माल्यं चंडेशाय निवेदयेत् ।

इति सकलागम सारसंग्रहे स्नानानुष्ठानं
रव्यर्चनं च समाप्तम् ॥

---

## शिवार्चनविधिक्रमम् ॥

सुप्रभेदे :-

अथातः संप्रवक्ष्यामि शिवार्चनविधिक्रमम् ।
सर्वपापहरंचैव सर्वलोकसुखावहम् ॥ 1

सर्वदानफलंचैव सर्वयज्ञफलप्रदम् ।
ब्रह्महत्यादि दोषघ्नं अश्वमेधफलप्रदम् ॥ 2

जयदं श्रीकरं राष्ट्रवर्द्धनं रिपुनाशनम् ।
शिवपूजासमं पुण्यं न भूतं न भविष्यति ॥ 3

शिवधर्मे :-

नास्ति लिंगार्चनादन्यत् पुण्यमप्यधिकं क्वचित् ।
इति विज्ञाय यत्नेन पूजनीयस्सदाशिवः ॥ 4

पूजाकालं :-

ननु स्मृतिसामान्येन मध्याह्नस्नानानंतरं देवपूजा
कर्तव्येति विधीयते ॥ 5

## पूजादिदेवता निर्णयं ॥

तथाह योगयाज्ञवल्क्य :-

निष्पीडय स्नानवस्त्रं तु आचम्य प्रयतश्शुचिः ।
देवानामर्चनं कुर्यात् ब्रह्मादीनाममत्सर ॥ इति 6
ते च देवाः गणपतिर्वा स्कन्दो वा
सूर्यो वा सरस्वती वा तत्पति वा ।
श्रीर्वा श्रीपतिर्वा गौरी वा गौरीपतिर्वा-
न्योवाभिमतं नीयते यथारुचि समस्तावेज्यन्ते (?)॥ 7

मनुः :-

आदित्यं अंबिकां विष्णुं गणनाथं महेश्वरम् ।
ब्राह्मणः पूजयेत्पंच पंचयज्ञपरायणः ॥ इति 8

केचित्गणपतिमादित्यं शक्तिमच्युतं शिवं च क्रमेणाभ्यर्च्य-
जन्त इति ।

पूजाहीनफलं :-

एतदकरणे प्रत्यवायोऽपि कूर्मपुराणे निगद्यते
यो मोहादथवालस्यादकृत्वा देवतार्चनम ।
भुंक्ते स याति नरकान् कृमीभूत्वेह जायते ॥ 9 ॥ इति ॥

अतः प्रत्यवाय परिहारायाभीष्ट प्राप्तये च देवेष्वेकतमस्याराधनं सर्वैरपि यथारुचि कर्तव्यमिति सिद्धम् ।

## शिवपूंजा विशेषं ॥

अतः कथं शिवः पूजनीय इति ।

अत्र विचारणं प्रवर्तते ।

सर्वेषां देवानां समानं पूज्यत्वं पूजाफलं च-यद्वा विशेषोऽस्तीति एवं सति देवानां मध्ये महादेवस्य पूज्यतमत्वं । अन्येषां पूज्यत्वमात्रं महच्छब्द सामर्थ्यादिदं विज्ञायते । सन्महत् परमोत्तमोत्कृष्टाः पूज्य-मानैरिति । महच्छब्दस्य पूज्येन हि समासो युक्तः । निरतिशयज्ञाना-नन्दपरमैश्वर्याद्यनन्तमंगलगुणाधारत्वं निरस्तसमस्तदोषसंबन्धत्वं च हि महादेवस्य शिवशब्द वाच्यतया निर्धार्यते । महादेवमुमापति-मन्तरेण कस्य वा परस्य निरुपाधिकमीश्वर शब्दवाच्यत्वमस्ति । शिवशब्दो हि निरुपाधिकविशुद्धमांगल्यगुणरूप परमपुरुषार्थ समष्टि

द्योतकतया लोके वेदे प्रसिद्धः। तथाहि शिवं कर्मास्तु शिवास्ते पंथानस्सन्तु। शिवमस्तु सर्वजगतां इति।

अतः शिव एव देवान्तरेभ्योऽधिकतया विज्ञायते।

किंच ब्रह्मांडपुराणे :-

ब्रह्मादीनां देवानां जनको महादेव इति चोच्यते। द्यावा-पृथिव्योरिन्द्राग्न्योर्विष्णोर्धातुर्यमस्य च। वरुणस्य शशांकस्य जनिता परमेश्वरः॥

कूर्मपुराणेऽपि :- ब्रह्माणं प्रति ईश्वरवचनं

स त्वं ममाग्रजः पुत्र सृष्टिहेतोर्विनिर्मितः।
ममैव दक्षिणादंगाद्वामांगात् पुरुषोत्तमः॥ 10

तस्य देवादिदेवस्य शंभोर्हृदयदेशतः।
संबभूवादि रुद्रोऽसौ परं तस्य परातनुः॥ इति। 11

शिवधर्मे :-

दक्षिणांगेऽभवत् ब्रह्मा हरिर्वामांग संभवः।
हृदयान्निर्गतो रुद्रो ब्रह्मा विष्णुप्रबोधकः॥ इति। 12

अतः कथं पुत्रस्थानीयानां ब्रह्मादीनां।
पितृभूतेन महादेवेन पूजादिषु समानकक्ष्या॥ 13

किंच :-

यजेदेव पूजायामिति विधानात् यजनयोग्या देवा ।
ब्रह्मादयः तेषामपि पूज्यो महादेव इति तथा चोक्तं ॥ 14

## नानाविधलिंगपूजाफलम् ॥

शिवधर्मे :-

ब्रह्मा ब्रह्माक्षरैर्मन्त्रैर्लिंगं पूजयते सदा ।
गंधपुष्पादिभिर्नित्यं विष्णुः पूजयते शिवम् ॥ 15

ब्रह्मा शैलमयंलिंगं नित्यं पूजयते शंभुम् ।
तस्य संपूजनादेव प्राप्तं ब्रह्मत्वमुत्तमम् ॥ 16

इन्द्रनीलमयं लिंगं विष्णुः पूजयते सदा ।
विष्णुत्वं प्राप्तवांस्तेन सोऽद्भुतैकं सनातनम् ॥ 17

शक्रोपि देवराजेन्द्रो लिंगं मणिमयं शुभं ।
नित्यमभ्यर्च्यते भक्त्या तेन शक्रत्वमाप्तवान् ॥ 18

लिंगं हेममयं कान्तं धनदोऽर्चयते सदा ।
तेनासौ धनदो देवो धनदत्वमवाप्तवान् ॥ 19

विश्वेदेवा महात्मानो रौप्यलिंगं मनोहरम् ।
यजन्ते विधिवत्तेन विश्वेदेवत्वमाप्नुयुः ॥ 20

वायुः पूजयते भक्त्या लिंगं पैत्तलकं शुभम् ।
केवलाभ्यर्चनेनैव वायुत्वं प्राप्तमुत्तमम् ॥ 21

वसवः कांस्यकं लिंगं पूजयन्ति विधानतः ।
प्राप्तास्तेन महात्मानो वसुत्वं सुमनोहरम् ॥ 22

अश्विनौ पार्थिवं लिंगं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं गतावुभौ ॥ 23

स्फटिकं निर्मलं वरुणोऽर्चयते सदा ।
तेनासौ वरुणत्वं हि प्राप्तः ऋद्धिबलान्वितम् ॥ 24

लिंगमन्नमयं पुण्यं अग्नियजति दाहितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ॥ 25

ताम्रलिंगं सदाकालं भक्त्या देवो दिवाकरः ।
त्रिकालं यजते तेन प्राप्तं सूर्यत्वमुत्तमम् ॥ 26

मुक्ताफलमयं लिंगं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं च ततोज्ज्वलम् ॥ 27

प्रवाळकमयं लिंगं यजन्ते पन्नगोत्तमाः ।
तेन नागास्सुभोगाढ्या प्रयान्ति परमं पदं ॥ 28

कृष्णायसमयं लिंगं पूजयन्त्यसुरोत्तमाः ।
राक्षसाश्च महात्मानस्तेन तेऽमितविक्रमाः ॥ 29

त्रपुसीसमयं लिंगं पिशाचाः पूजयन्ति ते ।
तेन ऋद्धिबलोपेताः प्राप्नुवंति परमं पदम् ॥ 30

त्रैलोहिकमयं लिंगं यजन्ते गुह्यकोत्तमाः ।
तेन भोगबलोपेताः प्रयान्ति परमं पदम् ॥ 31

बहुलोहमयं लिंगं यजन्ते मातरस्सदा ।
मातृत्वं प्राप्य तास्सर्वाः प्रयान्ति परमं पदम् ॥ 32

एवं देवास्सगंधर्वास्सयक्षोरगराक्षसाः ।
पूजयन्ते सदाकालं ईशानं सुरनायकम् ॥ 33

अतो महादेवशिव एव देवतान्तरगणादधिक महिमा तस्यैव पूजा मोक्षफलदायिनीति । 34

ततस्तावदपरिमितपुरुषार्थकांक्षी तु निरतिशयपुरुषार्थरूपं शिवमेवाराधयेत् । न शिवेतरं शिवेतरप्राय फलदायिनमिति संपिण्डितोऽर्थः ॥ 35

तथा च कूर्मपुराणे :-

यथा रुद्रनमस्कारस्सर्वकर्मफलप्रदः ।
अन्य देव नमस्कारान्न तत्फलमवाप्नुयात् ॥ 36

तस्मादनीश्वरानन्यान् त्यक्त्वा देवं महेश्वरम् ।
समाश्रयेद्विरूपाक्षं यदिच्छेत् परमं पदम् ॥ 37

शिवतत्वमविज्ञाय मन्त्रविद्यादिमंडलम् ।
मृत्पिंडवत्तु विज्ञेयं पतितं च भवेत्तथा ॥ 38

तस्मात्सर्वान् परित्यज्यदेवान् ब्रह्मपुरोगमान् ।
आराधयेद्विरुपाक्षं आदित्यांतरवर्तिनम् ॥ 39

पत्रंवा पुष्पमेकं वा लिंगस्योपरि निक्षिपेत् ।
अमंत्रंवा समंत्रंवा कुलकोटिं समुद्धरेत् ॥ 40

काशिखंडे केशवादित्य संवादे केशव वचनं च—

देवदेवो महादेवो नीलकंठ उमापतिः ।
एकएवहि पूज्योत्र सर्वेषां सर्वकारणम् ॥ 41

किमु त्रिलोचनादन्यं समर्चयति योऽन्यधीः ।
सुलोचनोऽपि विज्ञेयः लोचनाभ्यां विवर्जितः ॥ इति 42

ततः शिवाराधनमेव सर्वदेवतान्तराराधनात् प्राथमिकमधिक-फलप्रदं च मुख्यमिति सिद्धं । विशिष्य ब्राह्मणानां महादेव एवोपस्यः ॥

तदुक्तं—

ब्राह्मणस्य तु तत्रापि विशेषाद्दैवतं शिवः । इति
ब्राह्मणो भगवान् रुद्रः क्षत्रियो विष्णुरेव च ॥ 43

इत्यादि स्कान्द पुराणादि वचनं चानुसंधेयम् । अतो ब्राह्मणैक-राशिश्शिव एव ब्राह्मणै लिंगादिष्वर्चनीयः । ननु शिवाराधनं सर्वेषां

मुख्यं विशेषात् ब्राह्मणानामित्युक्तं तदाराधनं लिंगादौ तन्मूर्तिविशेष उपपद्यते । तदमुष्य सकलदेवता सार्वभौमस्य महादेवस्य आराधनमेव वरीयान् तदपि लिंगे विशेष इति ॥

तदुक्तं महा भारते द्रोण पर्वणि—

देवदेवं विचिन्त्यात्मा अजेयो विष्णुरव्ययः ।
सर्वरूपं भवं ज्ञात्वा लिंगेऽर्चयति तं प्रभुम् ॥ 44

दुर्लभं प्राप्य मानुष्यं येऽर्चयन्ति सदाशिवम् ।
तेषांहि जन्म साफल्यं कृतार्थास्ते नरोत्तमाः ॥ 45

बृहत्कालोत्तरे :—

पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
वसन्ति लिंगमूलेतु तस्माल्लिंगं प्रपूजयेत् ॥ 46

काशिखंडे केशव वचनं—

किंकिं न संभवेदत्र शिवलिंग समर्चनात् ।
पुत्राः कळत्रं क्षेत्राणि स्वर्गमोक्षौ न संशयः ॥ 47

त्रैलोक्यैश्वर्यसंपत्तिर्मयावाप्ता सहस्रगो ।
यैलिंगं सकृदप्यत्र पूजितं पार्वतीपतेः ॥ 48

कुतो जन्मभयं तेषां संसारे दुःखभाजने ।
न लिंगाराधनात्पुण्यं त्रिषुलोकेषु चापरम् ॥ 49

तस्माल्लिंगं त्वमभ्यर्क समर्चय महेशितुः ।
यस्तुलिंगार्चनं त्यक्त्वा देवानन्यान् प्रपूजयेत् ॥ 50

रत्नं विहाय मूढात्मा तथा काचमपेक्षते ।

शिवधर्मे—

लिंगे देवो महादेवः साक्षादेव व्यवस्थितः ॥ 51
अनुग्रहाय लोकानां तस्माल्लिंगं प्रपूजयेत् ।

योनपूजयते मोहाल्लिंगं त्रिभुवनेश्वरम् ॥ 52

सस्वर्गमोक्षराज्यानां क्षिप्रं भवति नाशनम् ।

इति शिवाराधन महत्वे पौराणिकवचनानि । यदी साकल्येन लिख्यन्ते तदा चतुर्दश भुवनरुहा महीरुहास्सेर्व तालाश्चेदपि नालं । अलमति विस्तारेण संग्रहग्रन्था इति ।

वक्ष्येनित्यार्चनं पुण्यं शुभदं पापनाशनम् ॥ 53
महापातक दोषघ्नं सर्वयज्ञ फलप्रदम् ।

मकुटे—

विप्रक्षत्रियविट् शूद्रा दीक्षिताश्च प्रवेशकाः ॥ 54
आत्मार्थं यजनं कुर्युर्नकुर्युस्ते परार्थकम् ।

अंशुमति—

चातुर्वर्ण्योद्भवस्त्रीणां अर्चनं च विशेषतः ॥ 55
अन्यत्कर्म न कुर्वीत यावन्नाराधितश्शिवः ।

## ब्रह्मविष्णु शिवलिंगार्चन विशेषः ॥

तदुक्तं शिवधर्मे—

कृतांजलिपुटो विष्णुर्ब्रह्मा चापि विशेषतः ॥ 56
पूर्वंलिंगं समाराध्य पश्चात् कार्याणिचक्रतुः ।

तस्मात् सर्वप्रयत्नेन मरणांतं यजेत्ततः ॥ 57

## शुद्धादि त्रिविध पूजा ॥

शुद्धकेवल संमिश्रमात्मार्थ यजनं भवेत् ।
जितेन्द्रियार्चितं शुद्धं केवलं चैवचार्चयेत् ॥ 58

आचार्यो मिश्रकं चैव केवलं शुद्धमर्चयेत् ।
शुद्धं वा शक्ति रहितं केवलं शक्तिसंयुतम् ॥ 59

सौरादि चंडपर्यन्तं मिश्रंचेति प्रकीर्तितम् ।

## लिंगपूजा संख्या-तत्फलं

कारणे—

एकलिंगं तथामोक्षं व्याधिरूपं द्वयं भवेत् ॥ 60

लिंगत्रयं तथा कुर्यात् भोगमोक्षप्रदायकम् ।
चतुर्लिंगन्तु यत्रैव तत्र श्रीकीर्तिहानिदम् ॥ 61

पंचलिंगमिति श्रेष्ठं पंचपातकनाशनम् ।
षष्ठंश्चेत्मरणं कुर्यात् सप्तमं वैरनाशनम् ॥ 62

अष्टमन्तु महाव्याधिरथवा शत्रुवर्द्धनम् ।
नवलिंगं तथा चेष्ट्वा शिवलोके महीयते ॥ 63

## नवरत्नलिंग पूजा फलं ॥

चिन्त्य विश्वे—

मरतकं पुष्टिदं प्रोक्तं पद्मरागं धनार्थिनाम् ।
आयुष्यं ऋद्धिवैडूर्यं स्फटिकं पुत्रवर्द्धनम् ॥ 64

स्तम्भनं पुष्यरागं स्याद्राष्ट्रवश्यं प्रवालकम् ।
कर्षणं स्यात्तु वज्राख्यं माणिक्यं सर्वसिद्धिदम् ॥ 65
इन्द्रनीलन्तु मोक्षार्थं रत्नजानां फलंभवेत् ।

## रत्नलिंगमानं ॥

66
अंगुल्यादि वितस्त्यन्तं कुर्याल्लिंगं तु रत्नजम् ॥

आयामसदृशं नाहं शिरोवर्तन संयुतम् ।
स्वप्रमाणेन कर्तव्यं रत्नलिंगस्य वीरका ॥ 67

पिण्डिका स्वस्व योनि स्यात् तदभावे हिरण्यकम् ।
राजतं ताम्रकं चैव अधमं चेतिकीर्तितम् ॥ 68

चतुरश्रं च वृत्तंवा चललिंगस्य पीठकम् ।
आयाम द्विगुणार्द्धं वा द्विगुणं त्रिगुणंतु वा ॥ 69

विस्तारं तत्समंज्ञेयं शेषं पूर्वोक्तवत् कुरु ।
लिंगायामत्रिभागैकं पीठमध्ये निवेशयेत् ॥ 70

सर्ववित्तकरं लिंगं त्रिभागंसूत्रवर्जितम् ।
रत्नलिंगं समाख्यातं लोहजं लिंगमुच्यते ॥ 71

## लोहजलिंग पूजाफलम् ॥

सुवर्णेनकृतंलिंग भुक्तिमुक्तिप्रदं भवेत् ।
ताम्रजं पुत्रदं प्रोक्तं रजतं श्रीकरं भवेत् ॥ 72

सुखदं कांस्यमित्युक्तं पैत्तळं रोगनाशनम् ।
आयसं शत्रुनाशं तु त्रिलोहं मारणं भवेत् ॥ 73

तथा चत्रपुसीसं तु कल्पयेत् कल्पवित्तमः ।
रत्नजस्योक्तमार्गेण सर्वकर्म समाचरेत् ॥ 74

## शिलालिंग पूजाफलम् ॥

सूक्ष्मे—

महानदी समुद्भूतं सिद्धक्षेत्रादि संभवम् ।
पाषाणं परया भक्तया लिंगवत्पूजयेत्सदा ॥ 75

## वर्णभेद लिंगफलं ॥

श्वेतंरक्तं तथापीतं कृष्णं विप्रादि पूजितम् ।
स्वभावात् कृष्णवर्णंतु सर्वजातिषुसिद्धिदम् ॥ 76

नर्मदा संभवं रोहं बाणलिंग मितीरितम् ।
स्वयंभूतं सदापूज्यं सर्वलिंगोत्तमोत्तमम् ॥ 77

त्रैधेव स्फटिकश्शुचीन्दु रविकाभामिस्तदादिः क्रमात् ।
वर्णानां सितरक्तविद्यल्लसितः त्रासादि दोषोज्झितः ।
अन्यश्चन्द्रकराद्रवेत्तदितरो दीप्येत सूर्यातपे
विस्पष्टं स्फटिकादिकास्वपि मणीष्वेवं हि हेम्नोऽपिवा ॥ 78

## लिंगदोषं ॥

अंबुबिन्दु निभं स्वच्छं समन्तक प्रभान्वितम् ।
अशेष दोषनिर्मुक्तं स्फटिकं सर्वकामदम् ॥ 79

निष्प्रभं निर्मुखं रुक्षं बहुवर्णं च जर्झरम् ।
तुषारकण संत्रास रेखा चिपिटसंयुतम् ॥ 80

सगर्भकीलकोपेतं शर्करा व्रणसंयुतत् ।
अन्यजाति समाक्रान्तं सदोषं स्फटिकं त्यजेत् ॥ 81

## बाणलिंगोत्पत्ति स्थानं ॥

बाणश्शिवश्शक्ति रमुष्यपाणिः तल्लिंगमाहुः खलुबाणलिंगम् ।
शिवार्पितन्तस्य समर्चनेन बलीन्द्र पुत्रोऽजनि बाणनामा ॥ 82

कोटयस्तिस्रः श्रीगिरौ लिंगशैले काळीगर्ते नर्मदे बाणलिंगम् ।
एकाकोटि श्चामरेशे महेन्द्रे कन्यातीर्थारण्य नेपाळकेषु ॥ 83

पर्यायात्तुलया धृतं यदि महा साम्यं नयत्येवयत् ।
क्षिप्तं वारि तदेवसत्यमपि यत् तद्बाणलिंगं विदुः ।
तुंगं तस्यशिरः पदं कृशमतो यद्वा स्पृशेदर्चिता
कन्या पंचवयास्तदेव हिमुखं नैवास्य लक्ष्मोज्झति ॥ 84

उत्पत्तिं बाणलिंगानां लक्षणं च ततश्शृणु ।
नर्मदादेविकोत्थानि गंगायमुनयोस्तथा ॥ 85

सन्ति पुण्यनदीनां च बाणलिंगानि षण्मुख ।
बाणस्सदा शिवोज्ञेयो बाणो बाणांधकासुरः ॥ 86

बाणं जलमिति ज्ञेयं तस्मात् बाणमिहोच्यते ।

## उत्तमादि बाणलिंग लक्षणम् ।

तन्त्रसारे—

उत्तमं बुद्बुदाकारं मध्यमं चाण्डकाकृतिः ॥ 87

अधमं वृषभस्कन्धं इत्येतत् लिंगलक्षणम् ।
पक्व जंबूफलाकारं महिषाक्षिसमप्रभम् ॥ 88

कपिलानेत्रसदृशं बाणलिंगस्य लक्षणम् ।
स्थूलं शिरः कृशंपादं उन्नतन्तु मुखं भवेत् ॥ 89

## लिंग पीठं ॥

लिंगनाहसमपीठविस्तरंविस्तृतस्य शरवेदतुंगकम् ।
विस्तृतार्धसमगोमुखान्तकं गोमुखान्तसमखंडनाहकम् । 90

## दुर्लक्षणफलम् ॥

लिंगाधिक्यं भवेन्मृत्युः शक्तयाधिकं धनक्षयम् ।
लिंगपीठसमं कुर्यात् भोगमोक्षफलप्रदम ॥ 91

कळंकं क्षयरोगं च काकपादं शिरोहतम् ।
रेखा खड्गहतं चैव बिन्दुः प्रीतिविनाशनम् ॥ 92

कर्कशे बाणलिंगेतु पुत्रदारक्षयो भवेत् ।
शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च ॥ 93

रौरवे—

## नानाविध देवताराधन बाणलिंगम् ॥

स्थूलंशिरः कृशंमूलं उन्नतं तु मुखं भवेत् ।
इन्द्रादि पूजितान्यत्र तच्चिह्नैः चिह्नितानि तु ॥ 94

आपीतानि षडश्राणि वज्रांगानि विशेषतः ।
इन्द्रलिकानि तान्यस्यास्साम्राज्यान्यप्रदानि तु ॥ 95

हसितं हिमकीलालमुष्णस्पर्शात् करोत्यलम् ।
आग्नेयं अग्निसंकाशं अथवा शक्तिलांछितम ॥ 96

इदंलिंगं वरंस्थाप्यं तेजसोऽधिपतिर्भवेत् ।
दंडाकारमयं याम्यं अथवा रसनाकृतिः ॥ 97

यदसंगं मुहूर्तेन निर्णीतं जायते तदा ।
वारुणं वर्तुळाकारं पीठांगं वातिवर्चसम् ॥ 98

वृद्धि संस्था दुस्वजत्व मापो यान्त्यप्सु मध्यगे ।
कृष्णधूमं तु वायव्यं सधूमध्वजभूषणम् ॥ 99

मस्तके स्थापितं तस्य स तु चेन्निहितं तु वा ।
निर्वातेऽपि चलस्यात्र शत्रोरुच्चाटने मतम् ॥ 100

गदाकारं मध्यगुरु कौबेरं सस्यमध्यगम ।
दिनं वाप्यथवा रात्रि सस्यानां वृद्धि वर्द्धनम् ॥ 101

त्र्यश्रं शूलांकितं रौद्रं हिमकुन्देन्दुवचसम् ।
चतुर्वर्णमयंवापि वृषभं जायतेऽग्रतः ॥ 102

वैष्णवं शंखचक्रांगं गदाब्जादि विभूषितम् ।
श्रीवत्सकौस्तुभाक्रान्तं कोलं सिंहाननाकृतिम् ॥ 103

वैनतेयसमांगं यत् श्रीभूदेवी समांकितं ।
वैष्णवं नाम तत् प्रोक्तं सर्वैश्वर्य फलप्रदम ॥ 104

पद्मपत्रसवर्णं तु पद्मांकं वा कमंडलुम् ।
दंडाक्षसूत्रवर्णं वा ब्रह्मणो ज्ञप्तिदं मतम् ॥ 105

## भोगमोक्षपूजा लिंगम् ॥

अर्च्यं स्यात् कपिलं लिङ्ग मुनीनां मोक्षकाक्षिणां ।
लघुर्वा कपिलंलिङ्गं गृही नैवार्चयेत् क्वचित् ॥ 106

तीक्ष्णांगवक्रशीर्ष च त्र्यश्रं लिङ्गं च वर्जयेत् ।
अतिस्थूलं अतिकृशं स्वप्तं श्वभ्रं घनांकितम् ॥ 107

गृही विवर्जयेत्तादृक् तत् मुमुक्षोर्यतेर्हितम ।
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ॥ 108

बाणलिङ्गं यदा चास्ते तदा सौषुम्नकं वहेत् ।

## बाणलिंग परीक्षा ॥

ज्ञान रत्नावल्यां—

त्रिपंचसप्तवारं वा तुलासाम्यं न जायते ॥ 109

तदा बाणं समाख्यातं शेषं पाषाणसंभवम् ।
नद्यां वा प्रक्षिपेत् भूयो यदा तदुपलभ्यते ॥ 110

तदा बाणं समाख्यातं अन्यथा क्लेशदायकम् ।

## लिंगपूजाकाल आशौच प्रायश्चित्तम् ॥

अंशुमति—

सूतके प्रेतकाशौचे आत्मार्थयजनं स्मृतम् ॥ 111

पूजालोपो न कर्तव्यः सूतके प्रेतकेऽपि च ।
शिवमन्त्रेण कर्तव्यं स्नानमस्त्रेण शुध्यति ॥ 112

आशौचं नभवेत्तत्र पद्मपत्रमिवांभसा ।
पूजान्ते प्रविशेच्चेदमाशौचं च विशेषतः ॥ 113

मौनं लिंगार्चनं कुर्यात् काम्यानुष्ठानहीनकम् :
अथवा सूतके प्रेते न स्वयं लिंग पूजनम् ॥ 114

मानसं च यजेद्धीमान् सर्वं मानसकल्पनम् ।
तल्लिंगं पूजयित्वा तु गुरुणा वा स्वबन्धुना ॥ 115

अन्येनैवार्चनं कुर्यात् अंते पुष्पांजलित्रयम् ।

कथं पुष्पवती नारी अर्चनं कुरुते वद ॥ 116
अन्तर्यागं प्रकर्तव्यं तथा पूर्वदिनत्रयम् ।

चतुर्थे दिवसे स्नात्वा गव्यं प्राश्य यजेत्तु सा ॥ 117

## नष्टलिङ्ग प्रायश्चित्तम् ॥

चोरैर्लिंगं गृहीतं चेत् मनसा तु यजेत्तदा ।
चत्वारिंशद्दिनांतं च उपवासं च कारयेत् ॥ 118

नालिकेरोदकेनैव क्षीरेणैव फलादिना ।
आत्मानं रक्षयेद्धीमान् शिवध्यानपरायणः ॥ 119

तस्मात् सर्वप्रयत्नेन तल्लिंगं ग्राह्यमेव च ।
लब्धं चेत् तत्समादाय प्रीतियुक्तो विशेषतः । 120

लिंगशुद्धिं क्रमात् कृत्वा पूजयेत् पूर्ववद्बुधः ।
तल्लिंग मत्रालब्धं चेत् नवलिंगं तु संग्रहेत् ॥ 121

स्वगुरोर्लिंगमादाय पूजयेत् पूर्वमागतः ।
दृष्टंचेत्पुर्वलिंगं तु द्वयं संपूजयेत्ततः ॥ 122

## लिङ्ग फलाधिकम् ॥

कालोत्तरे—

मृण्मयं द्विविध कार्यं पक्वं चापक्वमेव च ।
अपक्वात् पक्वजे पुण्यं ज्ञेयं दशगुण ततः ॥ 123

दारुजाच्छैलजं पुण्यं ज्ञेयं दशगुणं स्मृतम् ।
तस्माच्छतगुणं लोहे लोहाद्रत्नमनन्तरम् ॥ 124

रत्नान्मणिमयेलिंगे फलं लक्षगुणं भवेत् ।
संस्मृतं बाणलिंगं तु रत्नात् कोटिगुणं भवेत् ॥ 125

सालग्राम सहस्त्रेभ्यः शिवनामस्य एकतः ।
शिवनामसहस्त्रंस्यात् स्फटिकमेत देव च ॥ 126

स्फटिकाद् द्वादशं लक्षं बाणमेकेन पूजयेत् ।

## चातुर्वर्णस्त्रीपुंलिङ्गपूजा ॥

विद्यासार संहितायां—

रसलिंगं ब्राह्मणानां सर्वाभीष्टप्रदं भवेत् ॥ 127

रत्नलिंगं क्षत्रियाणां महाराज्यप्रदं भवेत् ।
स्वर्णलिंगं तु वैश्यानां महाधनपतिप्रदम् ॥ 128

शिलालिंगन्तु शूद्राणां महदैश्वर्यदं विदुः ।
स्फटिकं बाणलिंगं च सर्वेषां सर्वकामदम् ॥ 129

स्त्रीणां तु पार्थिवंलिंगं स भर्तृणां विशेषतः ।
विधवानां निवृत्तानां रसलिंगाद्यनुक्रमम् ॥ 130

बाल्ये वायौवने वापि वार्द्धक्येवापि सुव्रताः ।
शुद्धस्फटिकलिंगन्तु स्त्रीणां वै सद्योभोगदम् ॥ 131

## लिङ्गपीठप्रमाणम् ॥

श्रीमद्रौरवे—

ब्राह्मणानां च वस्वग्रं क्षत्रियस्य षडश्रकम् ।
वैश्यस्य चतुरश्रं स्यात् शूद्रस्य स्यात्तु वृत्तकम् ॥ 132

सर्वजाति प्रकर्तव्यं वृत्तपीठं समन्ततः ।
विप्राणां द्वादशांगुल्यमेकादशदशांगुलम् ॥ 133

क्षत्रियाणां नवांगुल्यमष्टसप्तांगुलं तु वा ।
षडंगुलं च पंचव चत्वारो वैश्य एव च ॥ 134

शूद्राणां तु त्रियंगुल्यं द्वयेकोंगुलं तु वा ।
सर्व वर्णेषु कर्तव्यं अंगुलं वा त्रयद्वयम् ॥ 135

ब्रह्मक्षत्रियविट्शूद्रा दीक्षिताश्च प्रवेशकाः ।
शुद्धस्फटिक हेमाभं रक्ताभं बाणलिंगकम् ॥ 136

## पूजाविधिः—तत्फलम् ॥

नारदस्मृतौ—

पंचाक्षरं जपन्नित्यं भस्मस्नानं शिवार्चनम् ।
कदाचिदपि नत्याज्यं यथाशक्ति समाचरेत् ॥ 137

रसलिंगं ततो बाणात् फलं कोटिगुण स्मृतम् ।
सिद्धये रसलिंगे तु अणिमाद्याः सुसंस्थिताः ॥ 138

रसलिंगार्चने मुक्तिस्स्याद्द्वैतो शिवसंपदा ।
तस्माद्रसमयं लिंगं पूजयेत्तु प्रयत्नतः ॥ 139

रसलिंगे तु वै पूज्यस्सर्वपाप क्षयो भवेत् ।
दर्शनाद्दुरितं हन्ति नमस्कारेण दुर्ग्रहान् ॥ 140

सर्वान् कामानवाप्नोति रसलिंगस्य पूजनात् ।
तस्मात् प्रयत्नतः पूज्यं रसलिंगं शिखिध्वज ॥ 141

## द्वादशविधक्षणिकलिङ्गम् ॥

कारणे––

सिकतं तंडुलं चान्नं नदीमृत् गोमयं तथा ।
नवनीतं च रुद्राक्षं चन्दनं कूर्चमेव च ॥ 142

पुष्पमाला गुलं पिष्टं क्षणिकं द्वादशोच्यते ।

## क्षणिकलिङ्ग पूजाफलम् ॥

अंशुमति––

क्षणिकानां फलं वक्ष्ये सैकतं मोक्षकांक्षिणाम् ॥ 143

तंडुलं विभवार्थीनां अन्नमन्न प्रदायिनां ।
नदीमृत् भूमिलाभं स्यात् गोमयं रोगनाशनम् ॥ 144

नवनीतं मनोह्लादं रुद्राक्षं ज्ञानवर्द्धनम् ।
गन्धं स्यात् भोग्यकांक्षीणां कूर्चं मुक्त्यर्थिनां स्मृतम् ॥ 145

आयुष्यवर्द्धनं पुण्यं गुळमिष्टार्थसिद्धिदम् ।
पिष्टं पुष्टिप्रदं प्रोक्तं क्षणिकानां फलं भवेत् ॥ 146

दत्ते च गुरुणा लिंगे स्थंडिले स्वयमात्मनि ।
क्षणिके मंडले तोये आत्मार्थयजनं स्मृतम् ॥ 147

## ग्रही पूजाकालप्रमाणम् ॥

निश्वासकारिकायां—

एककालं द्विकालं वा त्रिकालं वार्धरात्रकम् ।
पूजयेच्च ततश्शंभुं नित्यमेव ग्रही ततः ॥ 148

## रुद्राक्षत्रिपुंड्धारणकालम् ॥

कालोत्तरे—

रुद्राक्षश्च त्रिपुंड्च जपहोमार्चनादिषु ।
यजनं निष्फलं सर्वं दीक्षाहीनस्य पार्वति ॥ 149

## तत् प्रायश्चित्तम् ॥

कामिके—

यथासंभवकाले तु यथासंभव नाडिका ।
कालातिक्रमणे प्राप्ते प्रायश्चित्तं तु कारयेत् ॥ 150

## शिवपूजाफलम् ॥

शिवधर्मे—

शिवलिंगं महापुण्यं सर्वदेव नमस्कृतम् ।
यःस्पृशेदपि पाणिभ्यां न स पापैः प्रलिप्यते ॥ 151

मेरु मन्दर मात्रोऽपि राशिः पापस्य कर्मणः ।
ईश्वरं वैद्यमासाद्य नश्यते दुष्टरोगवत् ॥ 152

यदनादि प्रवृत्तोऽयं घोरस्संसारसागरः ।
शिवोऽपि हि तथानदि संसारान्मोचक स्थितः ॥ 153

येऽर्चयन्ति सदा रुद्रं नते प्रकृति मानुषाः ।
रुद्रलोकात् परिभ्रष्टाः रुद्रास्ते नात्र संशयः ॥ 154

यश्शिवं पूजयेत्भक्त्या अन्त्यजश्च जितेन्द्रियः ।
भवभाव समायुक्तः सोऽपि गच्छेत्परां गतिम् ॥ 155

## पूजाशब्दार्थः ॥

**कारणे—**

पूर्यन्ते सर्वकर्माणि जायते ज्ञानमात्मनि ।
पूरणाज्जायते यस्मात् पूजा शब्द महोच्यते ॥ 156

## रुद्राक्षधारणम् ॥

**कालोत्तरे—**

अरुद्राक्षधरो मन्त्री यःकरोति शिवार्चनम् ।
तत्सर्वं निष्फलं प्रोक्तं भस्मन्येव हुतं हविः ॥ 157

तस्मात्सर्वप्रयत्नेन रुद्राक्षं धारयेत् बुधः ।

## रुद्राक्षोत्पत्तिः ॥

वातुळे-ईश्वरः—

त्रिपुरो नाम दैत्यस्तु पुरासीत्सर्व दुर्जयः ॥ 158

हतास्तेन सुरास्सर्वे ब्रह्मविष्ण्वग्निदेवताः ।
तस्सर्वैः कथिते तस्मिन् तदाहं त्रिपुरं प्रति ॥ 159

अचिन्त्यं महा शस्त्रं सर्वशास्त्र मनोहरम् ।
सर्वदेवमयं दिव्यं ज्वलन्तं घोररूपिणम् ॥ 160

त्रिपुरस्य वधार्थाय देवानां त्राणकारणम् ।
सर्वविघ्नविनाशाय अघोरास्त्रं विचिन्तयेत् ॥ 161

दिव्यवर्ष सहस्राणि चक्षुरुन्मीलितं मया ।
पृथिव्यां मम नेत्रेभ्यः पतिता जलबिन्दवः ॥ 162

तत्राश्रुबिन्दवो जाता महारुद्राक्ष वृक्षकाः ।

## नानाभेद रुद्राक्षधारण फलम् ॥

स्कन्दः—

कति भेदाः कति मुखाः कावाऽधिष्ठानदेवताः ॥ 163

गुणास्तु कीदृशास्तेषां कथयस्व यथार्थतः ।

ईश्वरः—

शृणु षण्मुख तत्वेन तत्सर्वं कथयामि ते ॥ 164

बभूवुस्ते च रुद्राक्षा ह्यष्टत्रिंशत् प्रभेदतः ।
सूर्यनेत्र समुत्भूताः कपिला द्वादशस्स्मृताः ॥ 165

सोम नेत्रोत्थिता श्वेतास्ते षोडशविधाः क्रमात् ।
वह्निनेत्रोद्भवाः कृष्णाः दशभेदा भवन्ति हि ॥ 166

श्वेतवर्णं तु रुद्राक्षं जातितो ब्राह्ममुच्यते ।
क्षात्रं रक्तं तथा मिश्रं वैश्यं कृष्णन्तु शूद्रकम् ॥ 167

एक वक्त्रं शिवस्साक्षात् ब्रह्महत्यां व्यपोहति ।
द्विवक्त्रं देवदेवस्तु गोवधं नाशयेत् ध्रुवम् ॥ 168

त्रिवक्त्रमनलस्साक्षत् स्त्रीहत्यां दहते क्षणात् ।
चतुर्वक्त्रं स्वयं ब्रह्मा नरहत्यां व्यपोहति ॥ 169

पंचवक्त्रं स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्या गमनाच्चैव अभक्ष्यस्य च भक्षणात् ॥ 170

मुच्यते सर्व पापेभ्यो पंचवक्त्रस्य धारणात् ।
षड्वक्त्रं कार्तिकेयस्तु धारयेद्दक्षिणे करे ॥ 171

भ्रूणहत्यादिकं पापं नश्यते नात्र संशयः ।
सप्तवक्त्रं महासेन अनन्तो नाम नामतः ॥ 172

स्वर्णस्तेयादि गोहत्या पातकैर्मुच्यते नरः ।
अष्टवक्त्रं महासेन साक्षाद्देवो विनायकः ॥ 173

मानकूटं तुलाकूटं स्वर्णकूटं तथैव च ।
पृष्ठोदर करेणैव स्पर्शं चैव परस्त्रिया ॥ 174

एवमादीनि पापानि तानि नश्यंति धारणात् ।
नववक्त्रो भैरवस्तं धारयेद्वामबाहुके ॥ 175

भुक्तिमुक्तिप्रदश्चैव मम तुल्यबलो भवेत् ।
णहत्या सहस्राणि ब्रह्महत्या शतानि च ॥ 176

तत्सर्वं नश्यति क्षिप्रं नववक्त्रस्य धारणात् ।
दशवक्त्रं तु हे वत्स साक्षद्देवो जनार्दनः ॥ 177

ग्रहाश्चैव पिशाचाश्च वेतालब्रह्मराक्षसाः ।
पन्नगागरुडाश्चान्ये सर्वे नश्यन्ति धारणात् ॥ 178

वक्त्रैकादशरुद्राक्षं रुद्रा एकादशस्तदा ।
शिखायां धारयेदेकं तस्य पुण्यफलं शृणु ॥ 179

अश्वमेध सहस्राणि वाजपेय शतानि च ।
गवां शतसहस्राणि सम्यग्दत्तस्य यत्फलम् ॥ 180

तत्सर्वं समवाप्नोति वक्त्रैकादशधारणात् ।
रुद्राक्षं द्वादशमुखं कंठदेशे तु धारयेत् ॥ 181

तपन्ति द्वादशादित्या वक्त्रेवक्त्रे व्यवस्थिताः ।
गोमेधस्याश्वमेधस्य बहुस्वर्णस्य यत्फलम् ॥ 182

तत्फलं लभते मर्त्यो नात्र कार्या विचारणा ।
न चैवाग्निभयं तस्य न च व्याधिः प्रवर्तते ॥ 183

वक्त्र त्रयोदशं वत्स रुद्राक्षं यदि धारयेत् ।
कामदं सिद्धिदं ज्ञेयं सर्वसिद्धिप्रसाधकम् ॥ 184

रसो रसायनं चैव पादुका चैव सिध्यति ।
मातरं पितरं वापि भ्रातरं वा निहत्य च ॥ 185

मुच्यते सर्वपापेभ्यः त्रयोदशमुखाद्गुह ।
वक्त्र चतुर्दशं वत्स रुद्राक्षं प्राप्यते यदि ॥ 186

## धारणस्थान-संख्या ॥

धारयेत् सततं मूर्ध्नि शक्तिबिन्दुं शिवस्य तु ।
पूज्यते सतत देवैः प्राप्यते पुण्यमुत्तमम् ॥ 187

रुद्राक्षान् कंठदेशे दशनपरिमितान् मस्तके विंशति द्वे
षट्षट् कर्ण प्रदेशे करयुगलगताः द्वादशा द्वादशापि ।
बाह्वोरिन्दोः कलायाः प्रतिक मुपविने(?)चैकमेकम् शिखायां
वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकंठः ॥ 188

## मालिका धारण फलम्

शतं चाष्टाधिकां मालां नित्यं धारयते नरः ।
पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयः ॥ 189

शिखायां धारणात् कोटिः कर्णयोर्दशकोटयः ।
सहस्रकोटय. कंठे असंख्या बाहुधारणात् ॥ 190

प्रयाणकाले रुद्राक्षं भक्षनित्वा मृतो यदि ।
सोपि रुद्रत्वमाप्नोति पुनर्जन्म न विद्यते ॥ 191

कालोत्तरे:—

यः कंठार्पित रुद्राक्षः श्वानोऽपि म्रियते यदि ।
सोऽपि रुद्रपदमाप्नोति किं पुनः मानुषादयः ॥ 192

धारण वर्जित कालं :—

सूतके मृतके वापि रुद्राक्षं नैव धारयेत् ।

ब्रह्मवैवर्ते—

केचित्सूतकशावयो(?)र्जलमलोत्सर्गे च संगे स्त्रियः
शुद्धा वक्षक मालिकांच दधते सायुक्तया(?)स्यादिति ।
अन्ये पापहं सदा धृतमिति प्रोचुर्भुजे कर्णयो-
रक्षान्मंत्र पुरस्सरंतु महतीमाला न धार्याशुचौ ॥ 193

## स्वरूपं-फलं ॥

रुद्राक्षमूलं तद्ब्रह्मा तन्नाळं ब्रह्म उच्यते ।
तन्मुखं रुद्रमित्युक्तं बिन्दवस्सर्वयेवताः ॥ 194

अर्चनादावलंकृत्य अश्वमेधफलप्रदम् ।
अयुतं चोपवीतं च हस्तकंकणलक्षणम् ॥ 195

छन्नभिन्न च रुद्राक्षं सारूप्य फलयुच्यते ।

## मन्त्रं,फलम्

ईशानेन शिरो धार्यं कर्णे तत्पुरुशेण च ।
अघोरेण गले धार्यं हृद्यघोरेण धारयेत् ॥ 196

सप्तजन्म कृतं पापं क्षिप्रं नाशं भवेन्मुने ।
सप्तजन्म सहस्रेषु रुद्रलोके कहीयते ॥ 197

## वर्जितरुद्राक्षम् ॥

कृमिदष्टश्छन्नभिन्नः कण्डकात् भिन्न एव च ।
स्वयमेव कृतद्वारं पृथुकं धृतमेव च ॥ 198

विपरीत कृतद्वारं मुखमेवं च वर्जयेत् ।

## धारण स्थान फलम् ॥

कंठमारभ्य नाभ्यन्तमुरो माल्यस्य लक्षणम् ॥ 199

नामेरूर्ध्वमनायुष्यं अधोनाभेः धनक्षयम् ।
तस्मान्नाभि समं कुर्यात् रुद्राक्षमुपवीतकम् ॥ 200

## मालिका प्रमाणं फलम् ॥

शिरोमाला तु तन्नाहा बाहुमाला च तत्समा ।
हस्तमाला हस्तमाना कंठमाला च तत्समा ॥ 201

ब्राह्मणाः क्षत्रियाश्चैव वैश्याः शूद्राश्च तत्समाः ।
चातुर्वर्ण्यं तु रुद्राक्षं धारयेत् सर्वसिद्धिदम् ॥ 202

रुद्राक्षं धारयेत् स्त्रीणां दीक्षा संस्कार संयुतम् ।
शुचिर्वाप्यशुचिर्वापि रुद्राक्षं धारयेत्सदा ॥ 203

हस्ते कर्णे शिखायां वा यज्ञसूत्रेषु सर्वदा ।
सर्वपाप प्राशान्त्यर्थं भस्मना सह धारयेत् ॥ 204

दर्शनं पापशमनं स्पर्शनं सर्वसिद्धिदम् ।
प्रागुक्तविधिना पुण्यं रुद्राक्षं धारयेत्सदा ॥ 205

राजवार्ता वणिग्वार्ता लोकवार्ता विशेषतः ।
रुद्राक्ष चलनादेव मंत्रवत् फलदा भवेत् ॥ 206

ब्रह्मोतर खंडे—

सहस्रं धारयेद्यस्तु रुद्राक्षाणां दृढव्रतः ।
प्रणमन्ति सुरास्सर्वे यथा रुद्रं तथैव तम ॥ 207

एकैकमेक गोदानफलं ज्ञेयं समासतः ।
म्लेच्छो वापि च चंडालः युक्तो वापि तु पातकैः ॥ 208

रुद्राक्षधारणैर्युक्तस्स रुद्रो नात्र संशयः ।
मुक्ता प्रवालस्फटिक रौप्य वैडूर्य कांचनैः ॥ 209

सहितान् धारयेद्यस्तु रुद्राक्षान् स शिवो भवेत् ।
केवलान्वापि रुद्राक्षान् यो बिभर्तीह मानवः ॥ 210

तन्न स्पृशंति पापानि तमांसीव विभावसुम् ।
यस्यांगे नास्ति रुद्राक्ष एकोऽपि बहु पुण्यदः ॥ 211

तस्य जन्म निरर्थं स्यात् त्रिपुंड्ररहितं यथा ।
रुद्राक्षं मस्तके बध्वा शिरस्नानं करोति यः ॥ 212

गंगास्नानफलं तस्य जायते नात्र संशयः ।
यो धारयति रुद्राक्षान् रुद्रवत्सोऽपि पूज्यते ॥ 213

लक्षंतु दर्शने पुण्यं कोटिह स्पर्शने भवेत् ।
कोटिकोटिशतं पुण्यं धारणाल्लभते नरः ॥ 214

अलंकृत्य स्वकं देहं रुद्राक्षकटकादिभिः ।
पूजोपकरणं सर्वं सन्निधीकृत्य साधकः ॥ 215

देवदक्षिण दिग्भागे सन्निविष्टस्सुखासने ।

## पूजाकाल आसनम् ॥

कारणे—

उत्तराभिमुखो भूत्वा रुचिरासन संस्थितः ॥ 216

द्वयोर्जान्वोश्च कृत्वा तु पादाग्रं च संपुटम् ।
ईषन्नासाग्र दृश्यं तत् देहदीर्घं च तत्र वै ॥ 217

रुचिरासनमाख्यातं सर्वं पूजा हितं विदुः ।

अंशुमति—

चतुरश्रायताश्रं च सौभाग्यं दारवासनम् ॥ 218
वस्त्रासने व्याधिनाशं कंबले दुःखमोचनम् ।
कृष्णाजिने ज्ञानसिद्धिर्मोक्षस्स्यात् व्याघ्रचर्मणि ॥ 219

## द्वारपूजा ॥

ज्ञानरत्नावल्यां—

यस्यां दिशि भवेद्द्वारं प्रतीचीं ता परिकल्पयेत् ।
लिंगस्याभिमुखं यत्तत् द्वारं तत्पूर्वमिष्यते ॥ 220
तत्र तत्पुरुषं वक्त्रं ऊर्ध्वं चाभिमुखं भवेत् ।

तदुक्तं सूक्ष्मे—

द्वारं पश्चिममेवंतु नैवेद्यं पूर्ववक्त्रके ॥ 221

यस्मादघोरं हृत्प्रोक्तं तद्गतं सकलेन्द्रियम् ।
तस्मात् पूजादिकं सर्वमघोरेण च कारयेत् ॥ 222

अथाचम्य विधानेन प्रणवार्घ्यकरांबुजः ।
ओंकारं सप्तधा कृत्वा सामान्यार्घ्यं प्रकल्पयेत् ॥ 223

द्वारमस्त्रांबुना प्रोक्ष्य द्वारपालान् प्रपूजयेत् ।
द्वारमन्तर्मुखं ज्ञेयं द्वारपाला बहिर्मुखाः ॥ 224

लंबोदरं श्यामनिभं गणेशं कुठारमक्षस्रजमूर्ध्वगाभ्याम् ।
सलड्डुकं दन्तमभय कराभ्यां वामेतराभ्यां च दधानमीडे ॥ 225

शुक्लां शुक्लांबरामक्षमाला पुस्तक धारिणीम् ।
सव्य वामकराभ्यां च सुप्रसन्नां सरस्वतीम् ॥ 226

वामदक्षिण हस्ताभ्यां दधतीं श्रीफलांबुजे ।
हेमाभां सघटेभाभ्यां प्लाव्यमानां महाश्रियम् ॥ 227

रक्तं त्रिणेत्रं जटिलं सव्यवाम करद्वये ।
अक्षमालां त्रिशूलं च दधानं नन्दिकेश्वरम् ॥ 228

मकरासनगां गंगां सव्यवामकरद्वये ।
नीलोत्पलं पूर्णकुंभं दधतीं शुक्ल रूपिणीम् ॥ 229

कृष्णं त्र्यक्षं महाकाळं सव्यवामकरद्वये ।
कपालं च त्रिशूलं च दधानं विकटाननम् ॥ 230

श्यामां कूर्मस्थितां वामसव्यहस्तद्वये घटम् ।
नीलोत्पलं च बिभ्राणां यमुनां च विभावयेत् ॥ 231

## यागशाला पूजा ॥

सोमशंभौ—

दिव्य दृष्टि निपातेन दिव्यानुपरिवर्तिनः ।
ज्वलन्नाराचशस्त्रेण पुष्पं क्षिप्त्वान्तरिक्षगान् ॥ 232

दक्ष पार्ष्णे त्रिभिर्घातैः भूमिष्टांस्त्रिविधानपि ।
विघ्नानुत्सारयेन्मंत्री यागमन्दिरमध्यगः ॥ 233

देहलीं लंघयेत् किंचित् वामशाखां समाश्रयन् ।
प्रविश्य दक्षपादेन विन्यस्यास्त्रमुदुंबरे ॥ 234

चिन्त्य विश्वे—

दंष्ट्राकरालमत्युग्रं अस्त्रवह्नि समप्रभम ।
चतुर्वक्त्रं चतुर्बाहुं प्रदीप्तानि (चिं?) समप्रभम् ॥ 235

शिवस्याभिमुखं शक्ति शूलाभय वरान्वितम् ।
जटामकुटसंयुक्तमर्द्धेन्दुकृतशेखरम् ॥ 236

हंसस्थं तुन्दिलं गौरं सश्मश्रु चतुराननम् ।
दधानं दक्षिणे वामे दंडाक्षस्रुक्कमंडलुम ॥ 237

निरीक्षणादिभिश्शस्त्रैश्शुद्धानादाय गड्डुकान् ।
लब्ध्वानुज्ञां मौनी गंगादिकमनुव्रजेत् ॥ 238

पवित्रांग प्रजप्तेन वस्त्रपूतेन वारिणा ।
पूरयेत् वस्त्रधौतान् तान् गायत्र्या हृदयेन वा ॥ 239
गंधकाक्षात पुष्पादि सर्वद्रव्य समुच्छ्रयम् ।

## स्नान तोयम् ॥

सुप्रभेदे—

पाटलोत्पल पद्मानि करवीराणि सर्वदा ॥ 240

स्नान तोयेन योज्यानि स्निग्धानि सुरभीणि च ।
सौवर्णं राजतं वापि ताम्रं वा मृण्मयन्तु वा ॥ 241

जलद्रोणी प्रकर्तव्यं वृत्तं वा चतुरश्रकम् ।
त्रिद्रोणंश्च प्रपूर्यं स्यात् जलद्रोणी यथाविधि ॥ 242

## नैवेद्यादि प्रमाणम् ॥

कामिके—

द्रोण तंडुल नैवेद्यं द्रोण द्रोणार्द्धकं जलम् ।
गंधं चतुष्फलं शस्तं वस्त्रं हस्तप्रमाणकम् ॥ 243

घृतं च मधुना चैव तैलप्रस्थं च भावयेत् ।
जलद्रोण्याधिदैवत्यं पृष्टे विघ्नं परं तथा ॥ 244

पार्श्वयोर्नन्दिकाळौ च मध्ये गंगाधिदेवता ।

## स्नान-पात्र-फलादिकम् ॥

शिवधर्मे—

मृत्कुंभात्ताम्रकुंभेन स्नानं शतगुणोत्तरम् ॥ 245

रौप्यं लक्षोत्तरं पुण्यं हैमं कोटयधिकं भवेत् ।
रौप्यपात्रप्रदानेन यत्फलं वेदपारगे ॥ 246

तस्माच्छतगुणं पुण्यं शिवे मृत्पात्रदानतः ।
हैमपात्रं तु यो भक्त्या शिवाय विनिवेदयेत् ॥ 247

न तस्य शक्यते वक्तुं पुण्यानन्तं विशेषतः ।
उत्तरास्यो विनीतात्मा न्यस्तमन्त्र करद्वयम् ॥ 248

सन्निधीकृत्य पूजार्थं भूतशुध्यादि(कः?)माचरेत् ।

## देह शुद्धि भूतशुध्यादि ॥

सिद्धान्त शेखरे—

षडध्वस्थानि बाह्यानि तानि शुद्धानि दीक्षया ॥ 249

देहस्थितानि शोध्यानि भूतानि स्युर्दिने दिने ।
चरणांगुष्ठयोर्युग्मात् संचिन्त्य सुषिरं तनौ ॥ 250

सुषिरान्तर्बहिश्शक्तिं व्यापिनीं चिन्तयेत् ततः ।
हुंकारे रंध्रमध्यस्थे प्रज्वलत्पावकप्रभे ॥ 251

विधाय प्राणसंरोधं चित्तमत्र निवेशयेत् ।
रेचकान्ते फडान्तेन हृत्कंठेषु च तालुषु ॥ 252

भ्रूमध्ये ब्रह्मरंध्रे च भित्वा ग्रन्थीन् निवर्त्य च ।
हुंकारं तारकाकारं जीवं हृदयसंपुटम् ॥ 253

पूरकाहृत चैतन्यं हुं शिखोपरि विन्यसेत् ।
संशुद्धं बिन्दुभूतं च ध्यात्वा कृत्वा च कुंभकम् ॥ 254

रेचकेन शिखे विद्वान् एकोद्घातेन योजयेत् ।
संहार मुद्रामादाय मुक्ति मंत्रेण विग्रहात् ॥ 255

भोग्य कर्मोपभोगार्थं द्वादशान्तपदे यथा ।
बीजवृत्या शिवे लीन प्रतिलोमं स्वहेतुषु ॥ 256

## तत्व शुद्धिः ॥

तत्वानि बिन्दु पर्यन्तं लयंनीत्वा विशोधयेत् ।

गंधे भूस्सलिलं रसे हुतवहो रूपे मरुत्स्पर्शने
शब्दस्यात् खमहंकृतौ पुनरिमा स्तन्मात्रकास्तामसे ।
कर्माक्षाणि च राजसे सहमनो बुद्धीन्द्रियैस्सात्विके
बुद्धौ तच्च गुणेषु सागुणगणो व्यक्ते लयं गच्छति ॥ 257

तद्रागविद्ये च कलां प्रयान्ति पुंस्त्वंच कालो नियतिः कला च ।
मायासु विद्येशमसौ सदेशं सशक्तिमेषा शिवमेष बिन्दुः ॥ 258

एवं विधाय संशुद्धिं पंचभूतानि शोधयेत् ॥
पृथ्वी वातौ पयो वह्नी द्वौ द्वौ शोध्यौ परस्परौ ।
आकाशं चाविरोधेन यथा शोध्यं तदुच्यते ॥ 259

## कलाशुद्धिः ॥

पार्थिवं मंडलं पूतं कठिनं वज्रलाञ्छितम् ।
ह्लामित्यात्मीय बीजेन तन्निवृत्ति कलामयम् ॥ 260

तप्तचामीकराकारा चतुर्बाहु विभूषिता ।
वज्राभयाक्षमालाब्जा निवृत्तिः परिकीर्तिता ॥ 261

संयुक्तं सद्यमन्त्रेण सात्विकं ब्रह्मदैवतम् ।
पादावारभ्य मूर्धान्तं बिचिन्त्य चतुरश्रकम् ॥ 262

उद्घातपंचकेनैव वायुभूतं विशोधयेत् ।
अर्धचन्द्र द्रवं(?) सौम्यं शुभ्रमंभोजलांछितम् ॥ 263

ह्लीमित्यनेन बीजेन प्रतिष्ठा रुपतां गतम् ।
शुद्धस्फटिकसंकाशा एकवक्त्रा चतुर्भुजा ॥ 264

पाशाभयाक्षमालाब्जा प्रतिष्ठा रत्नभूषिता ।
संयुक्तं वाममन्त्रेण राजसं विष्णुदैवतम् ॥ 265

आप्यं चतुर्भिरुद्घातैर्वह्निभूतं विशोधयेत् ।
आग्नेयं मंडलं त्र्यश्रं रक्तं स्वस्तिकलांछितम् ॥ 266

हांमित्यनेन बीजेन विद्यारुपं विभावयेत् ।
पिंगभ्रूश्मश्रु पिंगाक्ष चूडाचन्द्र विभूषिता ॥ 267

तप्तचामीकराकारा विद्याज्वलन सन्निभा ।
अघोराणु समायुक्तं तामसं रुद्रदैवतम् ॥ 268

वह्निंच त्रिभिरुद्रघातैः जलंभूतं विशोधयेत् ।
षडश्रमंडलं वायुं बिन्दुभिष्षड्भिरंकितम् ॥ 269

कृष्णं हैमिति बीजेन जातं शांतिकलामयम् ।
चतुर्वक्त्र चतुर्बाहुः कृष्णवर्णा महाबला ॥ 270

ध्वजाभयाक्षमालाब्जा शान्तिः सर्वोपवीतिनी ।
तत्पुरुषेण संयुक्तमधिदैवं महेश्वरम् ॥ 271

संचित्योद्घात युग्मेन पृथ्वी भूतं विचिन्तयेत् ।
नाभौ बिन्दुमयं भूतं बिन्दुशक्तिभूषितम ॥ 272

व्योमाकारं सुवृत्तं च शुद्धस्फटिकनिर्मलं ।
हौकारेण फडन्तेन शान्त्यतीत कलामयम् ॥ 273

शुद्धस्फटिकसंकाशा एक(पञ्च)वक्त्रा चतुर्भुजा ।
पद्माभयाक्षमालाब्जा शान्त्यतीता वरप्रदा ॥ 274

ध्यात्वैकोद्घात योगेन सुविशुद्धं विभावयेत् ।
दक्षिणांगुष्ठपादस्थ वह्निना शोधयेत्तनुम् ॥ 275

आप्लावयेत्ततस्सर्वं मूलेनामृतवर्षिणा ।
आधाराख्य मनंतं च धर्मज्ञानादि पंकजम् ॥ 276

तत्र चात्मानमाहृत्य ततस्त्वाप्यायनं कुरु ।
दिव्यामृतेन संप्लाव्य कुर्वीत सरलीकृतम् ॥ 277

सुप्रभेदे—

प्रणवेन समायुक्तं श्वेतपद्मोपरि स्थितम् ।
कृत्वा शिवतनुं ध्यायेदष्टत्रिंशत् कलामयम् ॥ 278

## ईशानकलापंचकम् ॥

कामिके—

ओं हों ईशानस्सर्वविद्यानां शशिन्यै नमः ऊर्ध्वं मूर्ध्नि
ओं हों ईश्वरस्सर्वभूतानां अंगदायै नमः पूर्वमूर्ध्नि
ओं हों ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा इष्टायै नमः दक्षिणमूर्ध्नि
ओं हों शिवो मे अस्तु मरीच्यै नमः उत्तरमूर्ध्नि
ओं हों सदाशिवों ज्वालिन्यै नम. पश्चिममूर्ध्नि

एवमीशानकलापंचकं ॥

## तत्पुरुष कलाश्चतस्रः ॥

ओं हें तत्पुरुषाय विद्महे शान्त्यै नमः पूर्ववक्त्रे
ओ हें महादेवाय धीमहि विद्यायै नमः दक्षिणवक्त्रे
ओं हें तन्नो रुद्रः प्रतिष्ठायै नमः उत्तरवक्त्रे

ओं हें प्रचोदयात् निवृत्यै नमः पश्चिमवक्त्रे

एवं तत्पुरुषकलाश्चतस्रः ॥

ओं हुं अघोरेभ्यस्तमायै नमः हृदये

ओं हुं अथ घोरेभ्यो मोहायै नमः ग्रीवायां

ओं हुं अघोर रक्षायै नमः दक्षिणांसे

ओं हुं घोरतरेभ्यश्च निष्ठायै नमः वामांसे

ओं हुं सर्वतस्सर्वमृत्यवे नमः नाभौ

ओं हुं सर्वेभ्यो मायायै नमः जठरे

ओं हुं नमस्ते अस्तु रुद्र भयायै नमः पृष्ठे

ओं हुं रूपेभ्यो जरायै नमः उरसि

इति बहुरूपकलाष्टकं ॥

## वामदेव कलास्त्रयोदश ॥

ओं हिं वामदेवाय नमो जरायै नमः गुह्ये

ओं हिं ज्येष्ठायै नमः रक्षायै नमः इति वृषणद्वये

ओं हिं रुद्राय नमो रत्यै नमः दक्षिणोरौ

ओं हिं कालाय नमो पालिन्यै नमः इति वामोरौ

ओं हिं कलाकामायै नमः दक्षिण जानुनि

ओं हिं विकरणाय नमः संयमिन्यै नमः वामजानुनि

ओं हिं बलक्रियायै नमः दक्षिण जंघायां

ओं हिं विकरणाय नमो बुध्यै नमः वामजंघायां
ओं हिं बलकार्यै नमः इति दक्षिण स्फिचि
ओं हिं प्रमथनाय नमो धात्र्यै नमः वामस्फिचि
ओं हिं सर्वभूतदमनाय नमो भ्रामण्ये नमः कट्यां
ओं हिं मनोमोहिन्यै नमः दक्षिण पार्श्वे
ओं हिं उन्मनाय नमो भयायै नमः इति वामपार्श्वे

इति वामदेवकलास्त्रयोदश ॥

## सद्योजात कलाष्टकम्

ओं हं सद्योजातं प्रपद्यामि सिध्यै नमः—इति दक्षिणपादे
ओं हं सद्योजाताय वै नमः ऋध्यै नमः—इति वामपादे
ओं हं भवे द्युत्यै नमः—दक्षिणकरे
ओं हं अभवे लक्ष्म्यै नमः—इति वामकरे
ओं हं अनादिभवे मेधायै नमः—इति नासायां
ओं हं भवस्व मां कान्त्यै नमः—इति शिरसि
ओं हं भव स्वधायै नमः—दक्षिणबाहौ
ओं हं उद्भवाय नमो धृत्यै नमः—इति वामबाहौ

इति सद्योजातकलाष्टकम् ॥

अष्टत्रिंशत् कलानां तु अष्टत्रिंशच्च शक्तयः ।
एवं शक्ति समोपेतं न्यासं कलासु विन्यसेत् ॥

ईशानस्य कलाः पंचपुरुषस्य चतुः कलाः ।
अघोरस्य कलाश्चाष्टौ वामदेवे त्रयोदश ॥ 279

अष्टौ सद्यकला ज्ञेयाः मकुटादि क्रमान्न्यसेत् ।
कलान्यासमिदं प्रोक्तं अक्षरन्यासमुच्यते ॥ 280

## अक्षरन्यासम् ॥

अजिते—

अकारं कुक्षौ विन्यस्य आकारन्तु ललाटके ॥
इ ई च नेत्रयोस्तद्वत् उ ऊ श्रवणयोस्तथा ।
ऋ ॠ कपोलयोश्चैव ऌ ॡ नासापुटद्वये ॥ 281

उत्तरोष्ठे तथैकारं ऐकारमधरोष्ठके ।
ओकारं चाप्यथौकारं दंतपंक्तिद्वये न्यसेत् ॥ 282

जिह्वायाममधस्तालु प्रयोज्योऽथ यथा क्रमात् ।
कवर्गं दक्षिणे हस्ते चवर्गं च तथोत्तरे ॥ 283

टवर्गमुदरे न्यस्य तपवर्गौ च पार्श्वयोः ।
यवर्गं दक्षिणे पादे शवर्गं वामपादके ॥ 284

हकारं हृदये न्यस्य मूलमन्त्रं च विन्यसेत् ।
इति मन्त्राक्षरन्यासं कृत्वा विद्यामयीं तनुम् ॥ 285

शिवस्य यादृशं रूपं तादृशं चिन्तयात्मनि ।
शिवमन्त्रन्यासमिदमात्मनस्तु सदा कुरु ॥ 286

## शिवध्यानम् ॥

स्कन्द—कालोत्तरे—

उत्सृज्य प्राकृतं भावं शिवोऽहमिति भावयेत्।
नारुद्रस्संस्मरेद्रुद्रं नारुद्रो रुद्रामर्चयेत् ॥ 287
नारुद्रः कोर्तयेद्रुद्रं नारुद्रो रुद्रमाप्नुयात् ।

कालोत्तरे—

हृत्पद्मपीठिकामध्ये ध्यानयुक्ते प्रपूजयेत् ॥ 288

निश्वासकारिकायां—

कदलीपुष्प संकाशं हृदयं सर्वदेहिनाम् ।
तस्य मध्ये स्थितं पद्मं अष्टपत्रं सकर्णिकम् ॥ 289
द्वादशांगुलि विस्तीर्णं शुद्धं विकसितं सितम् ।
नालमष्टांगुलं तस्य नाभिकंद समुद्भवम् ॥ 290
पद्मपत्राष्टकं ज्ञेयमणिमादि गुणाष्टकम् ।
कर्णिका केसरं ज्ञानं नालं वैराग्यमुत्तमम् ॥ 291
शिवधर्मं च तत् कन्दमिति पद्मं विचिन्तयेत् ।
मन्त्रसिहासनासीनं मंत्रसन्नद्ध विग्रहम् ॥ 292
मंत्रपूजा सुसंपन्नो यजेत्तत्र महेश्वरम् ।

## उपचारम् ॥

कामिके—

गंधाद्यैरुपचारैस्तु मनसा कल्प्य पूजयेत् ॥ 293

सुप्रभेदे—

आसनानि च सर्वाणि तथैवावरणानि च ।
हृत्पद्मे कल्पयेद्वान्यं यथोक्तं तु यथाविधि ॥ 294

नाभिकुंडे स्वतस्सिद्धे चांबुसंस्कारसंयुते ।
ज्ञानानलं न्यसेत्तत्र सूर्यायुत समप्रभम् ॥ 295

इति ज्ञानानलनं न्यस्य विशं संपूज्य तत्र वै ।
पुराकृष्यपीयूष हविष्यं च शिवाणुभिः ॥ 296

अन्तःपूजि तदेत्राय तत्समर्प्य यथाविधि ।
अष्टपुष्पिकया पूज्य ततः पूजां समाप्य च ॥ 297

निर्भासित शरच्चन्द्र बिन्दुरूपं महेश्वरं ।
ललाटपट्ट मध्यस्थं चिन्तयेत् शुभ्रविग्रहम् ॥ 298

स्वतन्त्रः क्रीडति प्रीतः सततानन्दचेतनः ।
ध्यायतः सततं पुंसः सत्यं सत्यं वरानने ॥ 299

प्रत्यक्षो भवति क्षिप्रं हृदि तस्य न संशयः ।
चित्तेन जनितं चैव दर्पणे प्रतिबिंबवत् ॥ 300

तस्मात् सर्व प्रयत्नेन ध्याननिष्ठस्सदा भवेत् ।
ध्याननिष्ठं यदाचितं तदा बाह्यं परित्यजेत् ॥ 301

अन्यथा यस्त्यजेन्मोहादुभयं तस्य नश्यति ।
तस्मात् बाह्यं तदा कार्यं भूतशुद्धिपुरस्सरम् ॥ 302

बहिः पूजामिति प्रार्थ्य लब्धानुज्ञस्ततो मुनिः ।
स्थानशुद्धिं ततः कुर्यात् शास्त्रयुक्तेन कर्मणा ॥ 303

## बहिःपूजास्थानशुद्धिः ॥

शिवधर्मे—

पश्यन् परिहरन् जन्तून् मार्जन्या मृदु सूक्ष्मया ।
शनैस्सम्मार्जनं कुर्यात् चान्द्रायण फलंलभेत् ॥ 304

सम्मार्जन शतं पुण्यं सहस्रमनुलेपनम् ।
यः कुर्यात् सर्वकार्याणि वस्त्रपूतेन वारिणा ॥ 305

स मुनिस्स महासाधुः स योगी सशिवं व्रजेत् ।
अस्त्रेणोच्चाटयेद्विघ्नं ताळशब्द त्रयेण तु ॥ 306

छोटिकाभिर्दिशाबन्धं प्राकारं चास्त्रमंत्रतः ।
खेयं तु कवचेनाथ कृत्वा बाह्यन्तरस्थितम् ॥ 307

शक्तिजालमतश्चोर्ध्वं दर्शयेद्धेनुमुद्रया ।
स्थानशुद्धिरियं प्रोक्ता·द्रव्यशुद्धिं ततः शृणु ॥ 308

## द्रव्यशुद्धिः पात्रविशेषम् ॥

शिवधर्मे—

स्वर्णादि निर्मिते पात्रे पाद्यादीन् परिकल्पयेत् ।
सुश्रेष्ठं स्वर्णपात्रं तु रजतं मध्यमं भवेत् ॥ 309

कन्यसं ताम्रपात्रं तु अलाभे मृण्मयं भवेत् ।
मृण्मयं प्रत्यहं कार्यं तच्च नूतनमिष्यते ॥ 310
पलाशपद्मपत्राभ्यां ताम्रपात्र समं भवेत् ।

## पात्रशुद्धिः ॥

तंत्रसारे—

सप्तवारेण कांस्यायस्तंडुलं भस्ममृज्जलैः ॥ 311
त्रिधा ताम्रं च धरणी तित्रिण्या गोमयेन च ।
एकधा हेमरौप्यात्मदारुदंतांशुकान् तथा ॥ 312
एवं स्वर्णादि पात्राणां एवमस्त्रांबु शोधितम् ।

## द्रव्यशुद्धि मंत्रम् ॥

अजिते---

निरीक्ष्य हृदयेनैव कवचेनावकुंठयेत् ॥ 313
बिन्दुप्रसृतपीयूषपुष्पतोयाक्षतादिना ।
हृदि नाभौ षडन्तेन पूरयित्वाभिमंत्रयेत् ॥ 314
मंत्रसंहितया तेषु तत्तद्द्रव्याणि चाक्षिपेत् ।

## पाद्यम् ॥

सुप्रभेदे—

उशीरं चन्दनोपेतं दूर्वा सिद्धार्थ संयुतम् ॥ 315
चतुर्द्रव्य समायुक्तं पाद्यमेतदुदाहृतम् ।

## आचमनम् ॥

एला लवंग कर्पूर जंबू जाति फलंकरम् ॥ 316
षड्द्रव्य रससंयुक्तं शिवस्याचमनीयकम् ।

## अर्घ्यं

तिल व्रीहि कुशाग्राणि आपः क्षीरं यवास्तथा ॥ 317
तंडुलैस्सर्षपोपेतमर्घ्यमष्टांगमुच्यते ।

## तत् प्रमाणम् ॥

पाद्यं तोयं चतुः प्रस्थं द्विप्रस्थमाचमनं भवेत् ॥ 318

प्रस्थमर्घ्यं जलमिति प्रमाणं परिकीर्तितम् ।
अथवा पात्रमेकन्तु पाद्यमाचमनार्घ्यकम् ॥ 319

प्रत्येकं धारणं श्रेष्ठं तदर्धं मध्यमं ततः ।
तदर्धमधमं ज्ञेयं पाद्यद्रव्यं त्रिधोदितम् ॥ 320

द्विगुंजं माषकं चैव धारणं माषविंशतिः ।
धारणाष्टौ फलं चैव पलं मुष्टिरिहोच्यते ॥ 321

चतुर्मुष्टिस्तथा पादं प्रस्थं पादचतुष्ककम् ।
आढकं च चतुष्कस्य द्रोणं तस्य चतुष्ककम् ॥ 322

द्रव्यालाभेऽक्षतं तोयं चन्दनं कुशया सह ।

## शंखभेदम् ॥

कारणे—

पात्राणामप्यलाभे तु शंखं वा शुक्तिका तु वा ॥ 323

शंखं त्रिविधमित्युक्तं पुमान्नारी नपुंसकम् ।
मूलस्थूलं भवेन्नारी अग्रस्थूलं नपुंसकम् ॥ 324

अग्रमूल समं चैव पुमांश्चेति कीर्तितम् ।
ताम्रपर्ण्युद्भवं शंखं उत्तमंचेति कीर्तितम् 325

गंगायां मध्यमं चैव नर्मदायां च कन्यसम् ।
एवं त्रिविधमित्युक्तं जातिश्रेष्ठमथोच्यते ॥ 326

दक्षिणावर्तकं शंखं जातिश्रेष्ठमिति स्मृतम् ।
उत्तमं प्रस्थपूर्णं तु मध्यमं कुडुपद्वयम् ॥ 327

कनिष्ठिकन्तु सुलभं कुडपं शंखमुच्यते ।

## कवचालंकारम् ॥

अंशुमति—

पुच्छाग्रे हेमरत्नादिभूषितं चातिसुन्दरम् ॥ 328

## शंखशुद्धिः ॥

निश्वासे—

शंखं च क्षालयेद्धीमान् तुषदग्धेन शुध्यति ।
शंखमन्तश्शुचिकरं बहिरस्थिवदाचरेत् ॥ 329

तस्मात् सर्व प्रयत्नेन कर्तव्यं कनकादिना ।

## तदधिदेवताः ॥

शंखं चक्रा(न्द्रा?)धिदैवत्यं कुक्षिर्वरुणाधिदेवता ॥ 330

पृष्ठे प्रजापतिश्चैव शंखाग्रे सर्वतीर्थकम् ।

शंखपादाधिदैवत्यं वलयं वासुकिस्तथा ॥ 331

त्रिपादं वह्निदैवत्यं इत्येता अधिदेवताः ।

गंधपुष्पादिकं यत्तत् द्रव्यं संप्रोक्ष्य चास्त्रतः ॥ 332

## ईक्षणादि शुद्धिमंत्रम् ॥

कामिके—

ईक्षणं मूलमंत्रेण प्रोक्षणं चास्त्रमंत्रतः ।

ताडनं चास्त्रमंत्रेण वर्मणाभ्युक्षणं भवेत् ॥ 333

जडचित् भेदनं विद्धि शिवदृष्ट्या निरीक्षणम् ।

प्रोक्षणं योग्यता क्लृप्ति जडात् भिन्नस्य वस्तुनः ॥ 334

ताडनं तत्र चिद्व्यक्तिः यथा पाषणताडनम् ।

उत्पत्तिर्विस्फुलिंगानामभ्युक्षणमतः परम् ॥ 335

## तत्फलम् ॥

पारमेश्वरे—

दृक् क्रियेच्छात्मकैरर्कवह्निसोमविलोचनैः ।

क्रमाच्छुष्कं तथा दग्धं अमृतप्लुति संयुतं ॥ 336

शुध्यर्थं प्रोक्षितं शक्तितैजसं ताडनं ततः ।
अभ्युक्षण क्रियाजातं ग्राह्यता भावसंयुतम् ॥ 337

तंत्रसारे—

मायेयं रूपसंत्यागादात्तशक्तिस्वरूपतः ।
शिवयोगं भवेद्द्रव्यं सक्रियाद्रव्यशोधनम् ॥ 338

द्रव्यशुद्धिं विधायैव स्वशिरस्यर्ध्यसेचनम ।
कृत्वास्त्रेणाथ मूलेन पुष्पमारोप्य मूर्ध्नि च ॥ 339

ललाटे तिलकं कृत्वा चन्दनेन सुगन्धिना ।
आसनं मूर्तिमूलेन आत्मपूजां च कारयेत् ॥ 340

मंत्रशुद्धिं ततः कुर्यात् तत् शुद्धिरथ कथ्यते ।

## मंत्रशुद्धिः ॥

शिवधर्मे—

प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत् ॥ 341

यावन्न तत्समो जातः तावन्नाराधने क्षमः ।
शुद्धत्वाच्च शिवत्वाच्च देहं शिवतनुं स्मरेत् ॥ 342

चिन्त्यविश्वे—

मौनीभूत्वा शिवं ध्यात्वा मूलमंत्रादिकानणून् ।
ओंकारं पूर्वमुच्चार्य नमस्कारान्तमेव च ॥ 343

ब्रह्मांगानि च प्रासादं शिवबीजं तथैव च ।
ह्रस्वं बिन्दुगतं दीर्घं ब्रह्मरंध्रावधि प्लुतम ॥ 344

द्वादशांतरसंयुक्तं प्रासादं मंत्रशुद्धये ।
ज्ञानशक्तिमया मंत्राः किन्त्वैश्वर्यमलान्विताः ॥ 345

शक्तिज्वलित सामर्थ्यास्सर्वेऽभीष्टप्रदायकाः ।
मंत्रशुद्धिरियं प्रोक्ता पूजाकाले तु संस्मरेत् ॥ 346

## निर्माल्यविसर्जनम् ॥

पेटकात् सर्वबेराणां प्राक् संग्राह्य विचक्षणः ।
आच्छाद्य वस्त्रगलितं प्रोक्षयेदस्त्रवारिणा ॥ 347

निर्माल्यं च विसृज्याथ मानसं स्नानमाचरेत् ।
स्वर्ण राजत ताम्रैर्वा कांस्यकत्रपुसीसकैः ॥ 348

एवं षट् द्रव्यमाख्यातं स्नानवेद्यां प्रकल्पयेत् ।

## स्नानवेदी ॥

उपानं पद्मजगती कंपकंठं च कंपकम् ॥ 349

जगतीं वाजिनं कृत्वा विस्तारायामतोऽपिवा ।
मानशुद्धिं ततः कृत्वा वामे नाळं प्रकल्पयेत् ॥ 350

स्वर्णराजतताम्रैर्वा दारुणा चैव निर्मितम् ।
चतुरस्रा च या तालफेटत्वाकृतिमेव च ॥ 351

अथवा वृत्तमेत्रं च गर्भगेहे च विन्यसेत् ।
गर्भगेहं प्रविश्याथ विधानोद्धाटनं तथा ॥ 352

गर्भाग्रे भीमरुद्रं च स्थितं चैव समन्वितम् ।
चतुर्भुजं त्रिणेत्रं च वरदाभय संयुतम् ॥ 353

छत्र चामर संयुक्तं भीमरुद्रं समर्चयेत् ।
निशाचारन्तकृद्देव देवेश यजनार्थकम् ॥ 354

शुद्धद्वारस्य सव्ये तु गच्छत्याहि(?)प्रसीद मे ।
एवं संप्रार्थ्य तन्मध्ये स्थितं देवं महेश्वरम् ॥ 355

ओन्नमो देवदेवेश सर्वलोकैकनायक ।
उत्तिष्ठ स्नानकर्मार्थमात्मरक्षार्थमेव च ॥ 356

## लिंगशुद्धिः ॥

अंशुमति—

लिंगं संगृह्य हस्ताभ्यां स्नानवेद्युपरि न्यसेत् ।

कामिके—

लिंगमूर्ध्निगतां पूजां पूर्वकाल प्रकल्पिताम् ॥ 357
गायत्र्या पूजयित्वा तु सामान्यार्ध्यं तु दापयेत् ।

गायत्र्या पूजयित्वा तु सामान्यार्घ्यं तु दापयेत् ।

सूक्ष्मे—

अर्घ्योदकेन संप्रोक्ष्य वक्त्रन्यासं समाचरेत ॥ 358

अङ्गुष्ठादि कनिष्ठान्तं पञ्चब्रह्ममनुं न्यसेत् ।
ईशानादि तु सद्योऽन्तं वक्त्रन्यासक्रमं तथा ॥ 359

कनिष्ठानामिका मध्ये नवपुष्पं तु संग्रहेत् ।
अङ्गुष्ठतर्जनीभ्यां च निर्माल्यं च विसर्जयेत् ॥ 360

विसर्जनस्य तत्काले पुष्पं मूर्ध्नि च विन्यसेत् ।

किरणे—

न शून्यमस्तकं लिङ्गं कुर्यात्तत्र कदाचन ॥ 361
ऐशान्यां स्थापयेत्पूजां प्रत्यग्रमथवोषिताम् ।

कामिके—

अस्त्राम्बुनैव संशोध्य शिवलिंगं सवेदिकम् ॥ 362
सामान्यार्घ्यजलैः पश्चाद् अभिषेकं समाचरेत् ।

ज्ञानरत्नावल्यां—

नित्यपूजासमाप्ते तु रुद्रे मन्त्रगणेश्वरे ॥ 363
शान्तारूपं गते तत्र लिङ्गपीठे च तत्क्षणात् ।
रौद्रा विघ्नास्तथा सक्ताः स्थिताः विघ्नं प्रकुर्वते ॥ 364

भुक्तिं मुक्तिं च निघ्नन्ति तस्मात्तां त्रासयेत्पुरा ।
शिवास्त्रेण च लिंगस्थां पीठे पाशुपतेन च ॥ 365

पुनस्तां तां च संस्नाप्य स्नापयेद्धृदयाम्बुभिः ।
तदा लिङ्गं भवेत् शुद्धं पुनर्मन्त्राः फलप्रदाः ॥ 366

अजिते—

कूर्चेन बहुना लिङ्गं शोधयित्वाथ पीठकम ।
अस्त्रेण क्षालयेत् सम्यक् बहुशोऽशून्यमस्तकम ॥ 367

पञ्चगव्यं ततस्नाप्य पञ्चामृतमतः परम् ।
स्नापयेन्मन्त्रपूतेन विपंगादि(?) ततः परम् ॥ 368

## पञ्चगव्यविधिः ॥

सुप्रभेदे—

शिवाग्रे स्थण्डिलं कृत्वा वेदसूत्रं च कारयेत् ।
उदगग्रं तथा वत्स नवकोष्ठं समालिखेत् ॥ 369

उत्तमं तु चतुःप्रस्थं मध्यमं तु तदर्धकम् ।
अधमं प्रस्थशालिं तु प्रत्येकं तु पृथक् पृथक् ॥ 370

तंडुलैश्च कुशैश्चैव कल्पयेत्तदभावतः ।
उत्तराभिमुखो भूत्वा स्वासीनः परिकल्पयेत् ॥ 371

दर्भान् परिस्तरेद् बाह्ये पूर्वाग्रं चोत्तराग्रकम् ।
मध्यमे शिवतत्वं तु पूर्वकोष्ठे सदाशिवम् ॥ 372

विद्यातत्वं दक्षिणे च पुरुषतत्वं तथोत्तरे ।
पश्चिमे कालतत्वं तु पृथ्वीतत्वं तु पावके ॥ 373

अप्तत्वं निर्ऋतिकोष्ठे च वायुकोष्ठे मरुत् क्रमात् ।
ईशे प्रकृतिकोष्ठं च शिवपूजा विधीयते ॥ 374

## पात्रविशेषः ॥

उत्तमं स्वर्णपात्रं तु मध्यमं कांस्यपात्रकम् ।
अधमं मृण्मयं चैव पात्रमित्यभिधीयते ॥ 375

काळं भिन्नं च कोणं च कृष्णाभं चैव वर्जयेत् ।
नवपात्रं तु संगृह्य क्षालयेद् गन्धवारिणा ॥ 376

## तन्मन्त्रः ॥

प्रोक्षयेत् पुरुषेणैव कवचेनावकुण्ठयेत् ।
मध्यमे सुप्रतिष्ठं तु सुशान्तं पूर्वमेव च ॥ 377

तेजोवद् दक्षिणे चैव रत्नोदकमथोत्तरे ।
अमृतपात्रं पश्चिमायाम् अव्यक्तं चेशकोणके ॥ 378

आग्नेय्यां व्यक्तपात्रं स्यात् नैर्ऋते सूर्यपात्रकम् ।
वायोस्संयोगपात्रं स्यात् पात्रपूजा विधीयते ॥ 379

## गोवर्णः ॥

*कपिलायां च गोमूत्रं कृष्णायां चैव गोमयम् ।
रोगाभि ररितांगायां कपिलायां तु गोमयम् ॥ 380
संप्राह्यं गोमयं खस्थंस्थानेवा पतितेशुभे ।
उपर्यथश्च संत्यज्य प्रगृह्यंजन्तु वर्जितम् ॥ 381

श्वेतायां चाहरेत् क्षीरं धूम्रायां दधिसंग्रहेत् ।
रक्तायां तु घृतं ग्राह्यं पञ्चगव्याः क्रमेण तु ॥ 382

अथवा एकवर्णं तु संग्रहेद्देशिकोत्तमः ।

## प्रमाणं स्थानंच ॥

मध्ये क्षीरं त्रिकुडवं पूर्वे प्रस्थार्धतो दधि ॥ 383

घृतं दक्षिणके चैव कुडवेन समन्वितम् ।
उत्तरे प्रस्थगोमूत्रं गोमयं गोकुलादूधृतम ॥ 384

पश्चिमे जलसंयुक्तं पञ्चपादं भवेत्तदा ।
कुशोदकं चेशादेशे पूरयेत् कुडवद्वयम् ॥ 385

द्वादशं पंचकं वापि त्रिभिर्वा संप्रकल्पयेत् ।
तालमात्रेथवा कूर्चं कुशं वाथ कुशोदकम् ॥ 386

---

* இவித பசுக்களின் விவரம் நித்யவிதி 116-வது சுலோகத்தில் காண்க.

## अभिषेकद्रव्यप्रमाणं–स्थानम् ॥

वातुले—

कपित्थफलमात्रेण पिष्टामलकमीरितम् ।
कदलीफलमात्रेण रजन्याश्च प्रामणकम् ॥ 387

शालिपिष्टं तु चाग्नेय्यां स्थापयेद्देशिकोत्तमः ।
आमलीं नैर्ऋते चैव वायव्यां रजनीं तथा ॥ 388

## अभावकालद्रव्यं–प्रमाणम् ॥

अलाभे दधिनि क्षीरं क्षीराभावे भवेद्दधि ।
गोमूत्रं गोमयाभावे तदलाभे तु गोमयम् ॥ 389

पञ्चगव्येषु यस्य स्यात् तदभावे घृतं भवेत् ।
उत्तमे मध्यमे चैव गोमयं कुक्कुडाण्डवत् ॥ 390

अथवा चाक्षमात्रं स्याद् जलेनैव प्रपूजयेत् ।
वस्त्रपूतं प्रकर्तव्यं शोधयेद्विधिपूर्वकम् ॥ 391

क्रमात् तद्गुण संख्यातैरीशाद्यैरभिमन्त्रयेत् ।

## मन्त्रः ॥

पिष्टं तु हृदयेनैवामलकं शिरसैव तु ॥ 392

रजनीं वर्ममन्त्राभ्यां अभिमन्त्र्य सकृत्सकृत् ।
कुशोदकं तु गायत्र्या षड्वारं ब्रह्मपञ्चकैः ॥ 393

## पञ्चगव्यसंयोगम् ॥

गोमयं गोजले क्षिप्य गोजलं तु घृते भवेत् ।
घृतं दध्ना तु संयोज्य दधि क्षीरे तु निक्षिपेत् ॥ 394

हृदयोनाथ मूलेन क्षिपेत्तत्र कुशोदकम् ।
ब्रह्मभिश्च दशाङ्गैश्च गायत्र्या च सकृज्जपेत् ॥ 395

रक्षावकुण्ठनं कृत्वा धेनुमुद्रां प्रदर्शयेत् ।
गन्धैः पुष्पैस्समभ्यर्च्य धूपदीपं ततो ददेत् ॥ 396

कृत्वैकस्थं शिवेनैव जपेदष्टोत्तरं शतम् ।

## अधिदेवताः ॥

घृतं वै रुद्रदैवत्यं दधि वै सोमदेवतम् ॥ 397

क्षीरं तु शुक्रदैवत्यं गोमयं चार्कदैवतम् ।
गोमूत्रं नटदैवत्यं पंचगव्याधिदैवतम् ॥ 398

## पञ्चगव्यफलम् ॥

गोमूत्रं श्रीप्रदं ज्ञेयं गोमयं रोगनाशनम् ।
दधिपुत्रप्रवृद्धिः स्यात् पयश्शत्रुविनाशनम् ॥ 399

घृतं पूज्यस्य पूज्यं स्यात् पंचगव्यफलं विदुः ।
एकाहमपि यो लिंगे पंचगव्यं समाचरेत् ॥ 400

विधूय सर्वपापानि शिवलोके महीयते ।
अहोरात्रोषितः स्नातः शिवस्य पुरतः स्थितः ॥ 401

ओंकाराद्यागमंत्रेण प्राङ्मुखं च शनैःपिबेत् ।
ब्रह्महत्यादिभिः पापैःसर्वैरेव विमुच्यते ॥ 402

## पञ्चगव्याभिषेककालः ॥

सूक्ष्मे——

अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
अन्यपुण्यदिने चैव नित्यनैमित्तिकेपि च ॥ 403

प्रायश्चित्तं जन्मर्क्षे स्नापयेत् पंचगव्यकम् ।
पञ्चगव्यमिदं प्रोक्तं पञ्चामृतमिहोच्यते ॥ 404

## पञ्चामृतविधिः ॥

अचिन्त्यविश्वे——

पञ्चगव्यस्य पुरतः पूर्ववत् स्थण्डिलं भवेत् ।
कोष्ठपात्राणि मन्त्राणि पूर्ववत् परिकल्पयेत् ॥ 405

मध्ये दुग्धं दधि प्राच्यां दक्षिणे घृतमेव च ।
उत्तरे मधु संयोज्य शर्करा पश्चिमा भवेत् ॥ 406

कदली पनसाम्रं च गंधोद च तथैव च ।
अग्न्यादीशानपर्यन्तं स्थापयेत्तुविशेषतः ॥ 407

खण्डाभावेक्षुसारं तु मध्वभावे घृतं भवेत् ।

## अभिषेकविधिः ॥

सूक्ष्मे—

अभ्यङ्गं च ततः कृत्वा शुद्धतोयाभिषेचनम् ॥ 408

कमलालये—

धूपदीपे च नैवेद्ये होमकाले प्रजापते
स्वाहान्तं च प्रयोक्तव्यम् अभिषेके नमोऽन्तकम् ॥ 409

## फलोदकम् ॥

पनसं नालिकेरं च मातुलुङ्गद्वयं तथा ।
नारङ्गं लिकुचं चैव चूतमेतत्फलोदकम् ॥ 410

## कषायोदकम् ॥

वृषशृङ्गे च सुक्षेत्रे समुद्रे गजदन्तके ।
पर्वते च नदीतीरे वल्मीके कर्कटावटे ॥ 411

पलाशोदुम्बराश्वत्थमधुकप्लक्षपाटलम् ।
जम्बूत्वग्भिस्समाख्यातं कषायोदकमुच्यते ॥ 412

## द्रव्याभिषेकस्नानम् ॥

शिरीषपिष्टं चूर्णेन लिङ्गपीठे विमर्दयेत् ।
शुद्धतोयाभिषेकं च पुष्पं मूर्ध्नि च विन्यसेत् ॥ 413

## धूपदीपकालः ॥

चिन्त्यविश्वे—

मध्ये मध्ये च धूपं च दीपं चापि प्रदापयेत् ।
पंचगव्यामृतैः स्नाप्य जलेनैवाभिषेचयेत् ॥ 414

## अभिषेकद्रव्यम् ॥

क्षीरं दधि घृतं क्षोद्रं नालिकेरजलं तथा ।
गंधतोयेन संस्ना य गोश्रृंगाग्रप्रमाणतः ॥ 415

इक्षुसारं च शुद्धोदं गंधतोयाभिषेचनम् ।
आत्मार्थे तु विशेषेण प्रस्थादीनि च कारयेत् ॥ 416

## अभिषेकफलम् ॥

कल्पकोटिसहस्रैस्तु यत्पापं समुपार्जितम् ।
घृतस्नानेन तत्सर्वं दहत्यग्निरिवेन्धनम् ॥ 417

शिवधर्मे—

अयुतं यो गवां दद्यात् दोग्ध्रीणां वेदपारगे ।
वस्त्रहेमादियुक्तानां क्षीरस्नानस्य तत्फलम् ॥ 418

दध्ना तु स्नापयेल्लिङ्गं सकृत् भक्त्या तु यो नरः ।
सर्वपापविनिर्मुक्तश्शिवलोके महीयते ॥ 419

पुष्पोदकेन सावित्रं कौबेरं हेमवारिणा ।
रक्तोदकेन माहेन्द्रं लोकं संप्राप्य मोदते ॥ 420

मंत्राष्टशतजप्तेन विमलेनांभसा शिवम् ।
स्नापयित्वा सकृत् भक्त्या शिवलोके महीयते ॥ 421

कर्पूरागरुतोयेन यो लिङ्गं स्नापयेत् सकृत् ।
सर्वपापविनिर्मुक्तश्शिवलोके महीयते ॥ 422

दशापराधं तोयेन क्षीरेण शतनाशनम् ।
सहस्रं क्षमते दध्ना मधुनाप्ययुतं भवेत् ॥ 423

घृतेन शतसाहस्रमिक्षुसारं त्रिलक्षकम् ।
नालिकेरोदकं कोटि गंधतोयादनन्तकम् ॥ 424

घर्षयेद् बिल्वपत्रैश्च तद्वत् पीठं च शोधयेत् ।

## पीठशोधनम् ॥

तैलं पिष्टामलकरजनीगव्यपञ्चामृतानि
क्षीरं पश्चात् दधि च घृतमध्विक्षु रंभाफलानि ।
जंबीरादिप्रसवसलिलं नालिकेरोत्थगंध-
श्रीकुंभाख्ये क्रम इति शिवे सेच्यमानं वदन्ति ॥ 425

## सहस्रधाराभिषेकविषयः ॥

नित्यनैमित्तिके काम्ये स्नानान्ते तु महेश्वरम् ॥ 426
सहस्रधारया स्नानं श्रीसौभाग्यप्रदं शुभम् ।
स्वर्णराजतताम्रैर्वा कर्तव्यं तु सुवृत्तकम् ॥ 427

उत्तमं द्वादशाङ्गुल्यं मध्यमं वा दशांगुलिः ।
पंचाङ्गुलं तु विस्तारं नीचं चेति प्रकीर्तितम ॥ 428

त्र्यङ्गुलं च सुविस्तारं तदधः परिकीर्तितम् ।
एवं पात्रस्य विस्तारं मित्तिरुत्सेध उच्यते ॥ 429

एकांगुलसमुत्पन्नं उत्तमं परिकीर्तितम् ।
तदर्धं वा तदर्धं वा कन्यसं नीचमुच्यते ॥ 430

यवत्रयध्नं न प्रोक्तं सुषिरं सूचिमात्रकम् ।
एवं पात्रं तु कर्तव्यं साष्टपात्रं सकर्णिकम् ॥ 431

कर्णिकामध्यमेकं तु पूर्वादिवसुरंध्रकम् ।
तद्वाह्ये दलमध्ये तु द्वादशं सुषिरं कुरु ॥ 432

तद्वाह्ये वृत्तमध्ये तु महाशासु युगं भवेत् ।
एवं सुषिरमाख्यातं महाशासु युगं भवेत् ॥ 433

तत्पात्रं शंखतोयेन पूरयेन्मूलमंत्रतः ।
मन्त्रपुष्पं ततो दत्वा मंत्रान्नं च निवेदयेत् ॥ 434

## वस्त्रधारणं–बिंबपूजा ॥

सहस्रे—

अभिषिच्य विशेषार्ध्यं धौतवस्त्राणि वेष्टयेत् ।
वर्मणा वाससामृज्य पीठे संस्थापयेच्छिवम् ॥ 435

आसनावरणं त्यक्त्वा द्वारपालार्चनं विना ।
चण्डेशपरिवाराणां विना बिंबानि पूजयेत् ॥ 436

नित्यं स्नानं विना लोहे स्नानं पर्वणि पर्वणि ।

## पीठलक्षणम् ॥

ज्ञानरत्नावल्यां—

द्विहस्तमायतं पीठं एकहस्तमथापि वा ॥ 437

द्वादशांगुलमुच्छ्रायं यद्वा हस्तोन्नतं दृढम् ।
नानावर्णकसंयुक्तं मध्ये कमलभूषितम् ॥ 438

## पूजाविषयः ॥

वायव्यां दिशि पीठस्य दक्षिणाभिमुखस्थितम् ।
गणेशं वरदं पूर्वं पश्चाल्लक्ष्मीं प्रपूजयेत् ॥ 439

ऐशान्यां दिशि शास्त्रोक्तं गुरुपत्नीं प्रपूजयेत् ।
सदाशिवमनन्तं च श्रीकण्ठं पुनरम्बिकाम् ॥ 440

स्कन्दं विष्णुं च धातारं गुरून् सप्त स्मरन्यजेत् ।
कुन्देन्दुनिर्मलो देवः पंचमन्त्रमहातनुः ॥ 441

दशबाहुः प्रसन्नास्यः पंचवक्त्रस्सदाशिवः ।
अष्टबाहुश्चतुर्वक्त्रस्स्फटिकाभस्त्रिलोचनः ॥ 442

नागयज्ञोपवीती च विज्ञेयो ध्रुवमीश्वरः ।
पंचवक्त्रस्त्रिपञ्चाक्षो दशबाहुर्विभूषणः ॥ 443

वृषस्थोप्युपवीति च रुद्रः कुन्देन्दुसन्निभः ।
रक्तवर्णो ज्वलत् शुक्लवस्त्रेणैव विभूषितः ॥ 444

सर्वभरणसंयुक्ता पीनोरुजघनस्तना ।
त्रिणेत्रा गंधपुष्पाढया केशालकविभूषिता ॥ 445

पद्मोत्पलधरा देवी वरदाभयपाणिनी ।
षडाननं द्विषट्कर्णं षट्भिर्मौलिभिरावृतम् ॥ 446

रक्ताभं द्वादशाक्षं च भानुहस्तसमन्वितम् ।
शूलं च खडगं बाणं च चक्रं पाशं च दक्षिणे ॥ 447

अङ्कुशं च ध्वजं चैव खेटकं धनुवज्रकम् ।
वरदाभयसंयुक्तं रक्तमाल्यानुलेपनम् ॥ 448

शंखचक्रधरं देवं श्यामं पीताम्बरं हरिम् ।
श्रीभूमिसहितं ध्यायेत् सर्वालङ्करसंयुतम् ॥ 449

चतुर्मुखं चतुर्बाहुं कमण्डल्वक्षधारिणम् ।
सावित्रीसहितं देवं सर्वालङ्कारसंयुतम् ॥ 450

सर्वज्ञानप्रवक्तारं शिववत् पूजयेद् गुरुम् ।
लब्धानुज्ञस्ततो मन्त्री शिवशास्त्रोक्तवद्यजेत् ॥ 451

## कूर्मशिलापूजा ॥

अधः कूर्मशिलासीनां क्षीरोदसितविग्रहाम् ।
मौलौ बीजाङ्कुराकारां वरदामभयप्रदाम् ॥ 452

पाशाङ्कुशधरां शक्तिं क्रियामाधाररूपिणीम् ।
यजेद् ब्रह्मशिलारूढं शिवस्यानन्तमासनम् ॥ 453

पृथ्वीकन्दं कलान्तैकनालकं भावकण्टकम् ।
क्षुब्धमायामहापद्ममनेकदलसंयुतम् ॥ 454

तन्मध्यगमनन्तेशं विभुं व्याप्य स्थितं त्वधः ।
विचित्रकेसरीप्रख्यानन्योन्यं पृष्ठदर्शिनः ॥ 455

## आसन–पादुकाः ॥

कृतत्रेतादिरूपेण शिवस्यासनपादुकान् ।
धर्मं ज्ञानं च वैराग्यं ऐश्वर्यं च यथाक्रमम् ॥ 456

## धर्मादिस्वरूपम् ॥

धर्मस्तत्र वृषाकारो ज्ञानं सिंहस्वरूपकम् ।
वैराग्यं पीतभूतं स्यात् ऐश्वर्यं श्वेतकुञ्जरम् ॥ 457

## पूजाद्रव्यम् ॥

कर्पूरं कुङ्कुमं स्वर्णं कज्जलाभानि पूजयेत् ।
आग्नेयं नैर्ऋतं वायुं ऐशान्यं च यथाक्रमम् ॥ 458

कृष्णश्वेतं पूर्वभागे श्वेतरक्तं तु दक्षिणे ।
रक्तपीतं पश्चिमतः पीतकृष्णमुदग्दिशि ॥ 459

चत्वारि गात्रकाण्येव अनंतेशबलानि तु ।
गात्रकान् स्फटिकप्रख्यान् त्र्यक्षान् सिंहशिरोधृतान् ॥ 460

स्तब्धबाहुशिरो ग्रीवान् पादुकासक्तमस्तकान् ।
अग्रगात्रकपादस्तु मस्तकान्तररूपिणः ॥ 461

विपरीतमधर्मादीन् महादिक्षु चतुष्टये ।
राजावर्तनिभं प्रोक्तं इन्द्रादिषु यथाक्रमम् ॥ 462

## मेखला ॥

तन्त्रसारे—

पीठस्योर्ध्वं मेखलायामधो रक्तनिभं सदा ।
नैर्ऋते क्षुब्धमायान्तं भाव्याश्छदनं भवेत् ॥ 463

तदूर्ध्वपाण्डरं वर्णं ऊर्ध्वच्छादनकं ततः ।
शुद्धविद्यामधोभागे चान्तेशानेति पूजयेत् ॥ 464

उत्फुल्लाष्टदलं श्वेतं तदेवानन्तपङ्कजम् ।
संपूज्य सिंहवर्गोर्ध्वे पद्ममुद्रां प्रकल्पयेत् ॥ 465

## दलम् ॥

कारणे—

माणिक्यसदृशं कन्दं नाळं नीलसमप्रभम् ।

कण्टकं तु प्रवालाभं दळं वै रजतप्रभम् ॥ 466

विद्येश्वराष्टरूपाणि दळान्यभ्यर्च्य चिन्तयेत् ।

## केसरम् ॥

केसरं हेमवर्णाभमग्रे मुक्ताकृतींयुतम् ॥ 467

तप्तचामीकरच्छायां पञ्चाशद् बीजगर्भिताम् ।

केसराणां चतुष्षष्ट्या कर्णिकां पूजयेत्ततः ॥ 468

तन्त्रसारे—

कोटयादित्यसमास्सर्वा जटाखण्डेन्दुमण्डिताः ।

चतुर्भुजास्त्रिणेत्राश्च धृतचामरहस्तकाः ॥ 469

वरदाभयहस्ताश्च शिवासक्तकराम्बुजाः ।

विभाव्यैवं केसरेषु पूर्वादीशान्तकेषु च ॥ 470

विद्येशानामधिष्ठात्री वामा ज्येष्ठादिकाः क्रमात् ।

शक्तीस्संपूजयेदष्टौ नमोमुद्रां प्रदर्शयेत् ॥ 471

गोक्षीरधवलां शक्तिं ईशाने च मनोन्मनीम् ।

दलाग्रवृत्ते पद्मस्य सूर्यमण्डलमर्चयेत् ॥ 472

ब्रह्मा चतुर्मुखः पीतः चतुर्दोर्दण्डमण्डितः ।

स्रुक्दण्डाक्षकुशोपेतः सूर्यमण्डलमध्यगः ॥ 473

पद्मस्य केसराग्रे च वृत्तके सोममण्डलम् ।
विष्णुश्चतुर्भुजो माली शङ्खचक्रगदाब्जधृक् ॥ 474

नीलांबुजप्रतीकाशः सोममण्डलमध्यगः ।
पद्मस्य कर्णिकाग्रे वै अग्निमण्डलमर्चयेत् ॥ 475

शक्तेश्च मण्डलासीनं व्यालयज्ञोपवीतिनम् ।
चन्द्रार्धशेखरं त्र्यक्षं शुद्धस्फटिकनिर्मलम् ॥ 476

खड्गत्रिशूलबाणाक्षमालाभयकरान्वितम् ।
कमण्डलुधरं देवं वरारविन्दधारिणम् ॥ 477

दक्षवामक्रमात् सिंहगजचर्मपरिच्छदम् ।
क्षित्यादिशुद्धविद्यान्ततत्वव्याप्तिकमासनम् ॥ 47

संचिन्त्य देवदेवस्य पूजयेत्तदनन्तरम् ।

## पञ्चासननिर्णयः

चन्द्रज्ञाने—

अनन्तं पृथिवी ज्ञेयं आपस्सिंहासनं तथा ॥ 479

अग्निर्योगमिदं प्रोक्तं वायुः पद्मं तथैव च ।
आकाशं विमलं चैव पञ्चासनविधिं श्रृणु ॥ 480

सिंहासनं चतुष्कोणं अनन्ताख्यं त्रिकोणकम् ।
पद्मं च वर्तुलाकारं षट्कोणं विमलासनम् ॥ 481

योगासनं चाष्टकोणं आसनं परिकल्पयेत् ।

योगजे—

अनन्ताख्यासनं पूर्वं सिंहासनमतः परम् ॥ 482

योगासनं तृतीयं तु तुर्यं पद्मासनं भवेत् ।
पञ्चमं विमलं प्रोक्तं कल्पयेदुपरि क्रमात् ॥ 483

## आसनभेदकालः ॥

सुप्रभेदे—

आवाहनासनं योगं स्नाने सिंहासनं तथा ।
अर्चनायां महापद्मं विमलं भोजनासनम् ॥ 484

अनन्ताख्यं विनोदे स्यात् एतावत्परिकल्पयेत् ।

## अष्टत्रिंशत् कलान्यासः ॥

कारणे—

आधारशक्तिपद्मान्तं स्थिरासनमिति स्मृतम ॥ 485

योगपीठं विभाव्यैवं मूर्तिं तस्मिन् निवेशयेत् ।
मूर्तिमीश्वरतत्वान्तं लिङ्गं नाहे तु विन्यसेत् ॥ 486

वातुले—

अष्टत्रिंशत्कलान्यासमात्मार्थेऽपि च योजयेत्
अकारादिक्षकारान्तं मातृकां विन्यसेत्ततः ॥ 487

एवं न्यस्त्वा ततो मन्त्री विद्यादेहं प्रकल्पयेत् ।
या तस्य विमलाशक्तिः शिवस्य समयायिनी ॥ 488

सैव मूर्तिः क्रियाभेदात् सदाशिवतनुर्मता ।
क्षित्यादिकुटिलप्रान्तं मन्त्रसिंहासनस्थितम् ॥ 489

शुद्धस्फटिकसंकाशं द्वात्रिंशल्लक्षणान्वितम् ।

## ह्रस्वदीर्घे ॥

पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ॥ 490

सप्त रक्तं त्रिगंभीरं द्विविस्तीर्णं प्रशस्यते ।
बाहुनेत्रान्तरं चैव जानुनासं तथैव च ॥ 491

स्तनयोरन्तरं चैव पञ्चदीर्घं प्रशस्यते ।
ग्रीवा प्रजननं पृष्ठं ह्रस्वं जङ्घा प्रशस्यते ॥ 492

सूक्ष्माण्यङ्गुलिपर्वाणि केशादन्तनखानि च ।
कक्षं कुक्षिश्च वक्षश्च घ्राणस्कंधो ललाटिका ॥ 493

पाणिपादाधरोष्ठं च जिह्वा चक्षुस्त्वचः श्रुतिः ।
स्वरः सत्त्वंच नाभिश्च त्रिगंभीरं प्रशस्यते ॥ 494

शिरो ललाटिका चैव द्विविस्तीर्णं प्रशस्यते ।
पद्मासनस्थं पञ्चास्यं प्रतिवक्त्रं त्रिलोचनम् ॥ 495

दृक्क्रियेच्छाविशालाक्षं ज्ञानचन्द्रकलान्वितम् ।
धवलेशानवदनं पीतं तत्पुरुषाननम् ॥ 496

कृष्णाऽघोरमुखोपेतं रक्ताभोत्तरवक्त्रकम् ।
सुश्वेतं पश्चिमास्यैकं सद्योजातं समूर्तिकम ॥ 497

नागोपवीतिनं शान्तं जटाखण्डेन्दुमण्डितम् ।
दिव्यगन्धानुलिप्ताङ्गं दिव्यमालाविभूषितम् ॥ 498

शक्त्यसीशूलखट्वाङ्गं वरव्यग्रकराम्बुजम् ।
दक्षिणेऽधोऽथ वामस्थैर्डमरुं बीजपूरकम् ॥ 499

नागाक्षसूत्रनीलाब्जं बिभ्राणं पंचभिः करैः ।
संचिन्त्य मूर्तेरुपरि शक्तिमात्रविजृम्भणम् ॥ 500

लिंगाकारोपमर्देन भावने लिङ्गतां त्यजेत् ।
निष्कलं स्वप्रकाशं च संचिन्त्य परमं शिवम् ॥ 501

ब्रह्मादिकारणत्यागान्मन्त्री नीत्वा शिवास्पदम् ।

तदुक्तं ज्ञानरत्नावल्यां—

अकारश्च उकारश्च मकारो विन्दुरेव च ॥ 502

अर्धचन्द्रनिरोधी च नादो नादान्त एव च ।
शक्तिश्च व्यापिनी व्योमरूपिणी च अनन्तका ॥ 503

अनाश्रिता अनन्ता च समना चोन्मना तथा ।
समनान्तं पाशजालं तन्मन्यन्ते परशिवः ॥ 504

ततो ललाटमध्यस्थं स्फुरत्तारापतिप्रभम् ।
ब्रह्माङ्गेन समाकीर्णं शंकरं बिन्दुरूपकम् ॥ 505

पुष्पाञ्जलिगतं ध्यात्वा लक्ष्यमूर्तौ निवेशयेत् ।

## आवाहनादिपूजा ॥

आवाहिन्या हृदावाह्य स्थापिन्या स्थाप्य शंकरम् ॥ 506

सन्निधानान्तकं कृत्वा निष्ठुर्या च निरोधयेत् ।

सुप्रभेदे––

आवाह्य सद्यमंत्रेण स्थापयेत् गुह्यमन्त्रतः ॥ 507

बहुरूपेण सान्निध्यं पुरुषेण निरोधयेत् ।
सर्वावयवसंपूर्णं ईशानेन तु भावयेत् ॥ 508

सोमशंभौ––

सादरं संमुखीभावमावाहनमिहोच्यते ।
भक्त्या निवेशनं तत्र स्थापनं कथितं बुधैः ॥ 509

जगन्नाथ तवास्मीति यत्स्वीकारोपदर्शनम् ।
विभुत्वेपि तदीशस्य सन्निधानं न बाध्यते ॥ 510

आकर्मकाण्डपर्यन्तं सन्निधेयो परिक्षयः ।
स शंभोर्व्यापकत्वेपि निरोधः परिगीयते ॥ 511

सकलीकरणं कृत्वा मन्त्रैष्षड्भिरथैकताम् ।
कालकंठया फडंतेन विघ्नानुत्सार्य मुष्टिना ॥ 512

लिंगमुद्रां नमस्कारं हृदा बध्वावकुण्ठयेत् ।
शिवस्यानन्तबीजस्य बोधानन्दमयस्य च ॥ 513

अभक्तेष्वप्रकाशो यस्तद्भवेदवकुंठनम् ।
अंगानामङ्गिना साम्यं विदध्यादमृतीकृतिम् ॥ 514

अतो निबद्धयेन्मुद्रां नो परिभ्रामयेत् करम् ।

श्रीमन्मृगेन्द्रे—

ईष्टे येन जगत्सर्वं गुणेनोपरि वर्तिना ॥ 515

हमूर्ध्वसमदेशत्वात् मूर्ध्ना नावयवस्तनोः ।
तस्य तस्य तनुर्यापूस्तस्यामुषिति येन सः ॥ 516

तंत्राणां व्यंजनाच्चापि स तत्पुरुषवक्त्रकः ।
हृदयं बोधपर्यायस्सोस्याघोरश्शिवो यतः ॥ 517

परिग्रहस्याघोरत्वात् घोरोक्तिरुपचारतः ।
वामस्त्रिवर्गवामत्वात् रहस्यश्च स्वभावतः ॥ 518

वामं धाम परं गुह्यं यस्यासौ वामगुह्यकः ।

सद्योणूनां मूर्तयस्संभवन्ति यस्येच्छातस्तेन सद्योभिधानः ।
सद्योमूर्तिर्योगिनां वा विधत्ते सद्योमूर्तिं कृत्यशैघ्रान्नमूर्तेः ॥

हृदयं तस्य चिच्छक्तिः शिरश्चैश्वर्यमष्टधा ॥ 519

नान्याधीनं शिवत्वं यत् सा शिखोपरि वर्तिनी ।
अभेद्यं परमेशस्य तेजः कवचमिष्यते ॥ 520

प्रतापो दुस्सहश्चास्त्रमन्तरायापहारकम् ।

सर्वाभृतातृप्तिरनादिबोधस्वतंत्रता नित्यमलुप्तशक्तिः ।

अनंतशक्तिश्च विभोरनुज्ञा षडाहुरङ्गानि महेश्वरस्य ॥

अष्टत्रिंशत् कलोपेतो व्यक्तमूर्तिस्सदाशिवः ॥ 521

सकलस्तु भवेदेवं अन्यथा निष्कलश्शिवः ।
आहूय तस्य नाम्ना तु जनस्सन्निहितो भवेत् ॥ 522

तथा मन्त्रप्रयोगेण तत्र सन्निहितश्शिवः ।
यथा काष्ठगतो वह्निः व्यज्यते मथनादिभिः ॥ 523

तथा मन्त्रप्रभावेन भक्तयाभिव्यज्यते शिवः ।
आमूलाग्रस्थितस्याग्नेरभिव्यक्तिर्यथा तरौ ॥ 524

तद्वदेकत्र चिद्व्यक्तिर्व्यापकस्य न बाध्यते ।
यथात्मनस्तनुद्वारा स्यातामिह गमागमौ ॥ 525

तद्वन्मन्त्रतनुद्वारा शिवस्येष्टौ गतागतौ ।
स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम् ॥ 526

तावत् संप्रीतिभावेन लिङ्गेऽस्मिन् सन्निधीभव ।
आवाहनेन तन्मूर्तिः द्रवति द्रवहेमवत् ॥ 527

अंशुमति—

तस्मादावाहने काले चार्घ्यं दद्याद्विचक्षणः ।
पाद्यमाचमनं चार्घ्यं दूर्वापुष्पाक्षतादिकम् ॥ 528

सुस्वागतक्रियापूर्वमविकल्पेन कल्पयेत् ।

## पाद्यादिविनियोगस्थानम् ॥

सोमशंभौ—

नमस्स्वधा च स्वाहा च वषडन्तु यथाक्रमम् ॥ 529

हृत्पुरस्सरमुच्चार्य पाद्यादीनि निवेदयेत् ।
पाद्यं पादाम्बुजद्वन्द्वे वक्त्रेष्वाचमनीयकम् ॥ 530

अर्घ्यं शिरसि देवस्य पुष्पदूर्वाक्षतानि च ।
पाद्यं शिवपदप्राप्तिराह्लादमाचमनं भवेत् ॥ 531

शिवत्वव्यक्तिसंपत्त्यै चात्मनोऽर्घ्यं शिवस्य तु ।
स्थिरासने तमावाह्य मानसस्नानमाचरेत् ॥ 532

तत् पीठं वामहस्तेन स्पर्शयेदस्त्रमन्त्रतः ।
नवपुष्पं तु संगृह्य तत् पुष्पं तु विसर्जयेत् ॥ 533

मन्त्रतोयाभिषेकान्ते मन्त्रपुष्पं तु दापयेत् ।
मन्त्रपुष्पं ततो दत्वा मन्त्रान्नं च निवेदयेत् ॥ 534

अग्नेर्दीपनमेवं च शमनार्थं निवेद्य तम् ।

## मन्त्रान्नव्युत्पत्तिः ॥

मन्त्रं रहस्यमित्युक्तं अदनादन्नमुच्यते ॥ 535

रहस्यद्योतनं चैव मन्त्रान्नमिति कथ्यते ।

तथांशुमति—

शिवमन्त्रमनुस्मृत्य गन्धपुष्पं न्यसेत्ततः ॥ 536

गोलका घृतवारी च मकुटं चैव योजयेत् ।

करकङ्कणहाराद्यैर्नानारत्नं विभूषयेत् ॥ 537

## द्रव्यालाभे परिहारः ॥

द्रव्यालाभे मानसी तु दातव्या द्रव्यरूपिणी ।

दुकूलपट्टदेवांगैश्चित्रवस्त्रमथापि वा ॥ 538

अथ कार्पासवस्त्रैर्वा शुद्धिं कृत्वा तु संग्रहेत् ।

## वर्जितवस्त्रम् ॥

पुराणं छिन्नं तथा स्फोटमाखुदष्टं च वर्जयेत् ॥ 539

## नानावर्णवस्त्रधारणकालः ॥

पूर्वाह्ने सितवस्त्रं तु मध्याह्ने रक्तवस्त्रकम् ।

पीतवस्त्रं तु सायाह्ने संध्यायामे तु सर्वकम ॥ 540

## वस्त्रधारणफलम् ॥

शिवधर्मे—

वासांसि सुविचित्राणि सारवन्ति मृदूनि च ।
शुद्धानि च शिवे दद्यात् विकेशानि नवानि च ॥ 541

यावत्तद्वस्त्रतन्तूनां परिमाणं विधीयते ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥ 542

## उपवीतादिधारणमन्त्रः ॥

कवचेनोपवीतं स्यात् वस्त्रं वै हृदयेन तु ।
त्रिवृतं शुक्लपीतं वा पट्टवस्त्रादि निर्मितम् ॥ 543

यज्ञोपवीतं रुद्राय दत्वा वेदान्तगो भवेत् ।

## वासनाद्रव्यलेपनफलम् ॥

सुप्रभेदे—

कुङ्कुमागरुकस्तूरीकर्पूरचन्दनादिकैः ॥ 544

हिमांबुनामितैलेन कस्तूरीयक्षकर्दमैः ।
लिङ्गस्य लेपनं कुर्यात् दिव्यगन्धैस्सुगन्धिभिः ॥ 545

गोरोचनाकुंकुमचन्दनैर्वा कर्पूरकृष्णागरुदेवकाष्ठैः ।
कस्तूरिकाद्यैरभिलिप्य शंभुं प्राप्नोति पुण्यं हयमेधकोटयाः ॥ 546

गन्धानुलेपनात्पुण्यं द्विगुणं चन्दनस्य तु ।
चन्दनादगरौ ज्ञेयं पुण्यमष्टगुणाधिकम् ॥ 547

कृष्णागरोर्विशेषेण द्विगुणं फलमिष्यते ।
तस्माद्दशगुणं पुण्यं कुंकुमस्य विधीयते ॥ 548

देवदारुमयं गन्धं शिवाय विनिवेदयेत् ।
शिवलोकमवाप्नोति कल्पमेकं न संशयः ॥ 549

बिल्वमूलमयं गन्धं उमामहेश्वराय वै ।
महदैश्वर्यमाप्नोति अन्ते शिवपुरं व्रजेत् ॥ 550

आरग्वधमयं गन्धं लिपेन्मृत्युंजयं नरः ।
मृत्युजित्स भवेत् भक्तो गाणापत्यमवाप्नुयात् ॥ 551

तस्मात् सर्वोपचारेभ्यो गन्धपूजा विशिष्यते ।

सुप्रभेदे—

अगरुं चन्दनं चैव कोष्ठं कुंकुममेव वा ॥ 552

समं दद्यात्तदर्धं वा पादं कर्पूरसंयुतम् ।

## आभरणालंकारः, तत्फलं च ॥

शिवधर्मे—

शिवस्योपरि यो दद्यात् सर्वरत्नोपशोभितम् ॥ 553

मकुटं हृतवारिं वा तस्य पुण्यफलं शृणु ।
कोटिकोटिविमानैश्च सर्वकामसमन्वितैः ॥ 554

अभूतसंप्लवं यावत् आस्ते शिवपुरे सुखी ।
त्रुटिमात्रं तु यो दद्यात् हेमलिङ्गस्य मूर्ध्नि वै ॥ 555

इन्द्रस्यार्धासनं यायात् यावदिन्द्राश्चतुर्दश ।
एवं वित्तानुसारेण फलं ज्ञेयं समासतः ॥ 556

## भान्वादिवारालंकारः ॥

सुप्रभेदे—

माणिक्यमर्कवारे तु चन्द्रवारे तु मौक्तिकम् ।
प्रवालं कुजवारे तु बुधे मरतकं भवेत् ॥ 557

सुरेड्ये पुष्परागं स्यात् शुक्रे वज्रमिति स्मृतम् ।
इन्द्रनीलं तु सौरे स्यात् सर्वाण्येतानि यानि च ॥ 558

सर्ववारेषु योग्यानि भूषणानां विधिर्मतः ।

## पुष्पालंकारः ॥

तद्वर्णानि च पुष्पाणि वस्त्राणि च सुयोजयेत् ॥ 559

## अलंकारभागः ॥

पूजाभागं तु वैकांशं एकांशं वस्त्रवेष्टनम् ।
द्व्यंशमाभरणैर्भूष्यमेकांशं पुष्पशोभितम् ॥ 560

आत्मतत्वं न्यसेत् सव्ये विद्यातत्वं तु वामके ।
मध्यमे शिवतत्वं तु कल्पयेत् कल्पवित्तमः ॥ 561

## पत्रपुष्पविषयः ॥

शिवधर्मे—

पुष्पैरारण्यसंभूतैः पत्रैर्वा गिरिसंभवैः ।
अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ॥ 562

आत्मारामोद्भवैर्वापि पुष्पैस्संपूजयेच्छिवम् ।
मल्लिकोत्पलपद्मानि जातिपुन्नाचम्पकाः ॥ 563

अशोकश्वेतमन्दारकर्णिकाकुसुमानि च ।
करवीरार्कमन्दारशमीतगरकेसराः ॥ 564

कुशापामार्गकुमुमकदम्बद्रोणजान्यपि ।
सितकाञ्चनधुत्तूरं तथा लोहितकाञ्चनः ॥ 565

पलाशः पाटलीत्येते प्रशस्ताः प्रसवाः स्मृताः ।
बिल्वं तुलसिधत्तूरं कल्हारं हेमपुष्पकम ॥ 566

देवस्य शिरसि न्यस्तं क्षालयेत्तु पुनः पुनः ।

## पत्रोपयोगकालः ॥

तुलसी वत्सरान्तं स्यात् बिल्वं षाण्मासकं तथा ॥ 567

पद्मं द्वादशमासं तु अन्यपुष्पैकवारकम् ।
बिल्वापामार्गकश्चूतो दमनो मरुवोऽर्जुनः ॥ 568

नन्द्यावर्तश्च शम्यर्कस्तिलकस्तनमल्लिका ।
सौगंधिका सनागस्तिसिन्धुशेफालिकार्जुनैः ॥ 569

दूर्वादलशिखाङ्कोलगौरी सुरभिका शमी ।
जंबू कुशाग्र इत्येते प्रशस्याः पत्रसंग्रहाः ॥ 570

पूर्वोक्तकुसुमालाभे पत्रैरेतैश्शिवं यजेत् ।

## फलपूजा ॥

पत्राणामप्यलाभे तु फलैश्चापि प्रपूजयेत् ॥ 571

बीजापूरैश्च जंबीरैः कदलीदाडिमैश्शुभैः ।
फलं तृप्तिकरं सद्यः फलैरभ्यर्चयेच्छिवम् ॥ 572

## वारपत्रम् ॥

तुलसी बिल्वपत्रं च हेमपुष्पं च मौक्तिकम् ।
त्रिसन्ध्यं पूजयेल्लिङ्गं प्रक्षाल्य च पुनः पुनः ॥ 573

अर्कवारे तु बिल्वं स्यात् तुलसी सोमवारके ।
अङ्गारे च कपित्थं स्यात् मातुलुङ्गं बुधे तथा ॥ 574

बृहस्पतौ दांतवं च भार्गवे जंबुपत्रकम् ।
शनैश्चरे विष्णुक्रांतं वारपत्रमिहोच्यते ॥ 575

## पुष्पविशेषः ॥

यैस्तैर्वापि कुसुमैर्जलस्थलरुहैश्शिवम् ।
संपूज्य प्रोक्षितैर्भक्त्या शिवलोके महीयते ॥ 576

स्वयमुत्पाद्य पुष्पाणि यश्शिवं सम्यगर्चयेत् ।
तानि साक्षात् प्रगृह्णाति सद्भक्त्या सततं शिवः ॥ 577

## उत्तमादिपुष्पम् ॥

उत्तमारामपुष्पाणि मध्यमं वनसंभवम् ।
अधमं विक्रयं चैव याचकं निष्फलं भवेत् ॥ 578

## पत्रपुष्पफलादिकम् ॥

अर्कपुष्पसहस्रेभ्यः करवीरं विशिष्यते ।
तस्य मध्यस्थितं देवं लिङ्गपीठप्रकारतः ॥ 579

तत्पुष्पं हेमपुष्पं च पूजायां वत्सरे युतम् ।
निर्माल्यं न भवेत्तस्य इति शास्त्रस्य निश्चितम् ॥ 580

एकेन करवीरेण सितं वासितमेव च ।
नीलकण्ठं समभ्यर्च्य कुलकोटिं समुद्धरेत् ॥ 581

करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते ।

## बिल्वपत्राधिदेवताः ॥

इच्छाज्ञानक्रियाशक्ति बिल्वपत्रे त्रयं विदुः ॥ 582

दर्शनात् बिल्वपत्रस्य स्पर्शनाद्वन्दनादपि ।
अहोरात्रकृतं पापं नश्यते नात्र संशयः ॥ 583

शुष्कैः पर्युषितैः पत्रैरपि बिल्वस्य नारद ।
पूजयेत् गिरिजानाथं मुच्यते सर्वपातकैः ॥ 584

बिल्वपत्रैरखंडैश्च सकृल्लिङ्गं प्रपूजयेत् ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥ 585

## वर्जितबिल्वम् ॥

कीटकादिसदोषं तु लूतासूत्रं विवर्जयेत् ।

## पञ्चबिल्वम् ॥

कुन्दाख्यपत्रं शुकपत्रयुक्तं बिल्वं च निर्गुण्डि कपित्थपत्रम् ।
एतानि पञ्चापि च बिल्वपत्रं व्योमात्ममन्त्रैश्शिवमर्चयेत ॥ 586

बिल्वपत्रसहस्रेभ्यः पद्ममेकं विशिष्यते ।
पद्मपुष्पसहस्रेभ्यो बकपुष्पं विशिष्यते ॥ 587

बकपुष्पसहस्रेभ्य एकं धुत्तूरकं वरम् ।
धुत्तूरकसहस्रेभ्यो बृहत्पुष्पं विशिष्यते ॥ 588

बृहत्पुष्पसहस्रेभ्यो द्रोणपुष्पं विशिष्यते ।
द्रोणपुष्पसहस्रेभ्यो ह्यपामार्गं विशिष्यते ॥ 589

अपामार्गसहस्रेभ्यः कुशपुष्पं विशिष्यते ।
कुशपुष्पसहस्रेभ्यः श्रीमन्नीलोत्पलं वरम् ॥ 590

## नीलोत्पलविशेषः ॥

सर्वेषां पुष्पजातीनां प्रवरं नीलमुत्पलम् ।
नीलोत्पलसमं पुष्पं न भूतं न भविष्यति ॥ 591

नीलोत्पलसहस्रेभ्यो भक्तिरेका विशिष्यते ।

## सात्त्विकादिपुष्पम् ॥

श्वेतं रक्तं तथा नीलं सात्विकादीनि तानि च ॥ 592

पुष्पाणि पीतवर्णानि मिश्रकानि विनिर्दिशेत् ।
नीलोत्पलं विनान्यानि तामसानि विवर्जयेत् ॥ 593

## उदयादिकालपुष्पम् ॥

नन्द्यावर्तं श्रियावर्तं श्वेतार्कमुदयं ददेत् ।
करवीरं च पुष्पं च द्रोणं मध्याह्नके हितम् ॥ 594

मल्लिकाकृष्णधुत्तूरं सायाह्ने चम्पकं हितम् ।
कदंबकनका जाति कर्णिका चार्धरात्रके ॥ 595

## सात्विकादिपुष्पविशेषः ॥

द्रोणं च श्वेतपद्मं च जाती च बहुपर्णिका ।
नन्द्यावर्तं श्रियावर्तं मन्दारं शतपत्रिका ॥ 596

श्वेतार्कं मालती बिल्वं पुन्नागं कुरवं तथा ।
एवमादीनि पुष्पाणि सात्विकानि विनिर्दिशेत् ॥ 597

रक्तोत्पलं तथा पद्मं धुत्तूरं बृहती द्वयम् ।
पलाशपाटलादीनि राजसानि विनिर्दिशेत् ॥ 598

## वर्जितपुष्पम् ॥

कालोत्तरे—

करञ्जवकुलं काशं शिरीषं केतकी तथा ।
मन्दारदाडिमाजापं श्रीपर्णी च विभीतकम् ॥ 599

बन्धूककुन्दयूथानि कार्पासं निम्बकंटकम् ।
किंशुकं च मदन्दी च कुमुदानि विवर्जयेत् ॥ 600

अपक्वमतिपक्वं च मुकुळानि विवर्जयेत् ।
केशकीटोपविद्धानि लूतासूत्रावृतानि च ॥ 601

स्वयं पतितपुष्पाणि संयतान्यपि वस्त्रके ।
एकाहोषितपुष्पाणि त्यजेदुपहतानि च ॥ 602

## देवतावर्जितपुष्पम् ॥

नार्चयेदक्षतैर्विष्णुं न तुलस्या विनायकम् ।
न दूर्वया महेशानीं न केतक्या महेश्वरम् ॥ 603

निर्गन्धान्युग्रगन्धानि कुसुमानि विवर्जयेत् ।

## वर्जितपुष्पोपयोगकालः ॥

उत्सवादिषु यात्रायां परिवेषक्रियासु च ॥ 604

सकलानामलङ्कारे वर्ज्या ग्राह्याश्च सर्वदा ।

## नानादेवताराधनपुष्पविषयः ॥

कालोत्तरे—

कृष्णकानि च पुष्पाणि महिषाक्षी च पुष्पिका ॥ 605

शिंशुमारकपुष्पाणि उमादेवीं प्रपूजयेत् ।
देवारामोद्भवं पुष्पं गृहदेवाय नार्चयेत् ॥ 606

सुगन्धैर्युक्तपुष्पैर्यस्सम्यक् लिङ्गं प्रपूजयेत् ।
मालाभिर्वा सुघटितैरनन्तफलमाप्नुयात् ॥ 607

मालाभिर्वेष्टयेद्वेदिं लिङ्गं संपूजयेन्नरः ।
शिवो देव्या च पुत्रेण मोदते पूजयानया ॥ 608

लिङ्गवेदिर्भवेद्देवी लिङ्गं साक्षान्महेश्वरः ।
तयोस्संपूजनात् स्यातां देवी देवश्च पूजितौ ॥ 609

## पुष्पमण्टपं—तत्फलं च ॥

शिवस्योपरि यः कुर्यात् सुखदं पुष्पमण्टपम् ।
शोभितं पुष्पमालाद्यैरापीठान्तप्रलंबिभिः ॥ 610

अत्याश्चर्यमहायानैर्दिव्यपुष्पोपशोभितैः ।
सर्वैः परिवृतः श्रीमान् गच्छेत् शिवपुरं सुखी ॥ 611

## पत्रपुष्पच्छेदनपूजाफलम् ॥

पत्रच्छेदैस्तु संपूजा राक्षसानां विनाशनम् ।
पुष्पच्छेदैस्तु संपूजा सर्वसिद्धिकरी भवेत् ॥ 612

## लयांगभोगांगपूजा ॥

लयांगं पूर्वमभ्यर्च्य शिवब्रह्मांगकैस्सह ।

सोमशंभौ—

प्रणम्यादाय देवाज्ञां देवांगानि प्रपूजयेत् ॥ 613

ज्ञानरत्नावल्यां—

आत्मनश्शिवषाड्गुण्यप्राप्तिभोगांगमर्चनम् ।
अंगानां पुनरैक्यं च शिवसंयोगमात्मनः । 614

ईशानमीशपत्रे च पूर्वपत्रे नरं यजेत् ।
अघोरं दक्षिणे पत्रे वामदेवं तथोत्तरे ॥ 615

अजातं पश्चिमे पत्रे हृदयं वह्निपत्रके ।
ईशपत्रे शिरश्चूडा नैर्ऋते कवचं महत् ॥ 616

नेत्रपत्रे चतुर्दिक्षु हेतिराजं च भीषणम् ।

## 1. पञ्चब्रह्मपूजा ॥

विजये—

पञ्चब्रह्म षडङ्गानि देवस्य परितस्स्थितः ॥ 617

वक्त्रेभ्यस्तत्तदंगेभ्यो दीपाद्दीपमिवाहरेत् ।
स्फटिकाभं जगद्धेतुं त्रिनेत्रं चन्द्रमौलिनम् ॥ 618

सौम्यं प्रसन्नमीशानं त्रिशूलाभयपाणिनम् ।
पीताम्बरोपवीतं च नरं कनकसन्निभम् ॥ 619

मातुलंगाक्षसूत्रे च दधानं चन्द्रमौलिनम् ।
त्र्यक्षं मौलीन्दुभृत् सौम्यं कुण्डलालंकृतं ततः ॥ 620

बभ्रुश्मश्र शिरोजं च दंष्ट्रालुं विकटाननम् ।
कपालमालाभरणं सर्पवृश्चिकभूषणम् ॥ 621

खट्वांगं च कपालं च खेटकं पाशमेव च ।
वामहस्तचतुष्कोणदक्षहस्तचतुष्टये ॥ 622

त्रिशूलं परशुं खड्गं दण्डं चैवारिमर्दनम् ।
एवं नवांबुदाभासं अघोरं सर्वकामदम् ॥ 623

वामं रक्तं च सुरभिसाल्यवस्त्रोपवीतिनम् ।
तुंगनासारुणोष्णीषं खड्गखेटकपाणिनम् ॥ 624

सितस्रक् गंधभूषाढयं सितोष्णीषं सितांबरम् ।
सौम्यमौलीन्दुसंपन्नं बालाकारं त्रिलोचनम् ॥ 625

सद्योजातं सितास्यैकं वरदाब्जं भयानकम् ।
ईशानादीनि सद्यान्तं एवं ध्यात्वार्चयेत्सदा ॥ 626

धेनुपद्मत्रिशूलं च मकरं च स्रगाख्यकम् ।
ईशानादि क्रमेणैव पञ्चमुद्राः प्रदर्शयेत् ॥ 627

ईशानस्योत्तरे भागे नेत्रं संपूजयेत्ततः ।
अरुणाभं स्मरन्नेत्रं दृक्क्रियेच्छात्मकं विभोः ॥ 628

त्रितत्वरूपवह्नयादिमण्डलत्रितयाश्रयम् ।
हृदाद्यंगोक्तवदनं शरधार्याभिसंयुतम् ॥ 629

एकास्यं वा त्रिशूलादि हस्तयोग शिवोक्तितः ।
अग्नीशासृक्पवायूनां दिक्षु चत्वार्यनुक्रमात् ॥ 630

## षडङ्गपूजा ॥

कालोत्तरे--

हृदयं चन्द्रसंकाशं शिरश्चामीकरप्रभम् ।
शिखां सिन्दूरवर्णाभां कवचं भृंगभास्वरम् ॥ 631

नेत्रं विद्युत्प्रतीकाशं अस्त्रमग्निसमप्रभम् ।
हृदयादिषडङ्गानां नमोमुद्रां प्रदर्शयेत् ॥ 632

पद्मासनस्थानर्धेन्दुजटामकुटधारिणः ।
त्रिलोचनान् चतुर्बाहून् सर्वाभरणभूषितान् ॥ 633

शिवस्याभिमुखान् शक्तिशूलाभयकरान्वितान् ।
दंष्ट्राकरालमत्युग्रमस्त्रं चाग्निसमप्रभम् ॥ 634

हृदयादि षडङ्गानां नमोमुद्रां प्रदर्शयेत् ।
अम्बी गणांबी गङ्गा च गौरी चैव उमा तथा ॥ 635

वामी नीली च चक्रांगी पाशांगी खड्गकांबिका ।

## 2. विद्येशावरणम् ॥

कमलालये—

गर्भावरणमेवं तु विद्येशावरणं शृणु ॥ 636

अनन्तेशस्तथा सूक्ष्मः शिवोक्तः चैकनेत्रकः ।
एकरुद्रः त्रिमूर्तिश्च श्रीखंडश्च शिखण्डिकः ॥ 637

अष्ट विद्येश्वरा ह्येते त्रिणेत्राश्च चतुर्भुजाः ।
अभयवरदोपेतटंकशूलधरास्तथा ॥ 638

रक्तं कुन्दं तथा नीलं पीतं कृष्णं च कुंकुमम् ।
अरुणं त्वंजनप्रख्यं क्रमाद्विद्येशवर्णकम् । 639

जटामकुटसंयुक्ता उपवीतसमन्विताः ।
सर्वाभरणसंयुक्ताः शान्तवस्त्रसमन्विताः ॥ 640

भूमिः स्वाहा स्वधा क्षांतिः प्रभा पुष्टिः श्रुतिस्तथा ।
मेधा माया तथा चाष्टौ विद्येशानां तु शक्तयः 641

अनन्तादि शिखण्डयन्तान् पूर्वादिक्रमशो यजेत् ।
विद्येशावरणं एवं गणेशावरणं शृणु ॥ 642

## 3. गणेशावरणम् ॥

नन्दीश्वरो महाकालो भृंगी गणपतिस्तथा ।
वृषभः कार्तिकेयश्च पार्वती चंडनायकः ॥ 643

चतुर्भुजस्त्रिणेत्रस्तु नन्दीशः श्यामवर्णकः ।
अभयवरदोपेतो दंडशूलधरोग्रकः ॥ 644

महाकालस्त्रिणेत्रस्तु कृष्णवर्णश्चतुर्भुजः ।
अभयवरदोपेतस्तूग्रस्तोमरशूलधृत् ॥ 645

चतुर्भुजं त्रिणेत्रं तु भृंगीशं पिंगल प्रभम् ।
दक्षिणेभयटंकौ तु वामे वरदशूलधृत् ॥ 646

गजाननं त्रिणेत्रं च कुंकुमाभं चतुर्भुजम् ।
पाशदन्तौ तु सव्ये तु वामे त्वंकुशलड्डुकम् ॥ 647

नागयज्ञोपवीतं तु लंबोष्ठं च गणाधिपम् ।
वृषभं श्वेतवर्णं तु रक्तास्सर्वे खुरास्स्मृताः ॥ 648

सितकृष्णमयी चाक्षी द्वौ श्रृंगौ रक्तवर्णकौ ।
कर्णौ च रक्तवर्णाभौ वालाः पीतेन शोभिताः ॥ 649

घण्टामाला सुवर्णाभा स्थितं वा शयितं तु वा ।
रक्तवर्णो महासेनो द्विनेत्रश्च चतुर्भुजः ॥ 650

सव्ये त्वभयं वज्रं तु वामे च वरदाङ्कुशौ ।
द्विनेत्रो द्विभुजा श्यामा गौरी दक्षकरोत्पला ॥ 651

द्विनेत्रा द्विभुजश्चंडः श्यामो वै टङ्कहस्तकः ।
भद्रा च देवयोनी च कुन्दी काली च मन्त्रिणी ॥ 652

मालिनी च उमा चैव यामिनी चण्डान्तशक्तयः ।
पूर्वादीशानपर्यन्तं क्रमेणैव तु संयजेत् ॥ 653

सुप्रभेदे—

विद्येशानां गणेशानां कालकण्ठं तु दर्शयेत् ।
गणेशावरणं ह्येवं लोकेशावरणं श्रृणु ॥ 654

## 4. लोकपालावरणम् ॥

इन्द्रश्चाग्निर्यमश्चैव निर्ऋतीवरुणवायवः ।
सोमश्चैव तथेशानो लोकपालाः प्रकीर्तिताः ॥ 655

वज्रपाणिर्महावीरः सहस्राक्षो विशालदृक् ।
ललाटोरस्तलो यामः पीवरोरुर्महोदरः ॥ 656

प्रसन्नवदनः श्यामवर्णो रक्ताम्बरः सुखी ।
किरीटी कुंडली हारी केयूरादिविभूषितः ॥ 657

पृथुग्रीवो गजारूढो देवराजः शचीपतिः ।
अर्धचन्द्रमजासीनो वृद्धरूपो हुताशनः ॥ 658

तरुणादित्यसंकाशं तद्वस्त्रमुपवीतकम् ।
दण्डपाणिर्महादीप्तः कालाञ्जनसमच्छविः ॥ 659

महामहिषमारूढो दीप्ताग्निसमलोचनः ।
राक्षसेशो विशालाक्षः पीतवस्त्रः शवासनः ॥ 660

निर्ऋतिस्सुसंस्थितासीनः खड्गहस्तो महाबलः ।
केयूरी कुण्डली हारी पीतवासाः सुशोभनः ॥ 661

आसीनो वा स्थितो वापि मकरे वरुणः स्थितः ।
कुञ्चितभ्रूर्युवा वायुस्ताम्राक्षो धूमसन्निभः ॥ 662

मृगारूढो विधातव्यः सर्वाभरणभूषितः ।
एवं सदागतिः सर्वव्यापकोऽयं समीरणः ॥ 663

यक्षराजः कुबेरोऽथ तप्तकञ्चनसन्निभः ।
शंखपद्मनिधीयुक्तो गदाहस्तो निधीश्वरः ॥ 664

वृषारूढो महातेजा धवलः पिंगलेक्षणः ।
त्रिशूलपाणिरीशानस्त्रिणेत्रो लोकशंकरः ॥ 665

शची पुलोमजा चैव स्वाहा चेति तथा प्रभा ।
कालकंठी च नीली च नारी च सुसुकेतनी ॥ 666

पूर्वादीशानपर्यन्तं क्रमेणैव तु संयजेत् ।
चतुर्मुखं चतुर्बाहुं कमण्डल्वक्षधारिणम् ॥ 667

स्रुवदक्षिणहस्तं तु पताकावामहस्तकम् ।
अम्भोजासनकासीनं ब्रह्माणं होमसम्मुखम् ॥ 668

विष्णुश्चतुर्भुजो माली शंखचक्रगदाब्जधृक् ।
नीलाम्बुदप्रतीकाशो गरुडासनसंस्थितः ॥ 669

ईशानदक्षिणे भागे ब्रह्माणं च प्रपूजयेत् ।
निर्ऋतेरुत्तरे भागे विष्णुं संपूजयेत् क्रमात् ॥ 670

लोकेशावरणं ह्येवं अस्त्रेशावरणं शृणु ।

## 5. दशायुधावरणम् ॥

वज्रं शक्तिश्च दंडं च खड्गं पाशं तथांकुशम ॥ 671

गदा त्रिशूलं पद्मं च चक्रं चेति दशायुधम् ।
द्विभुजाश्च द्विनेत्राश्च सर्वाभरणभूषिताः ॥ 672

कृतांजलिपुटोपेताः करण्डमकुटान्विताः ।
तत्तद्धस्त्रप्रमाणेन अस्त्रमूर्ध्नि समन्विताः ॥ 673

नानावर्णमहाविद्युन्नीलजीमूतनीलकम् ।
पावनं पद्मरागं च तुषारं चैन्द्रनीलकम् ॥ 674

शारदाभ्रं च रक्तं च वज्रादीनां तु वर्णकम् ।

## स्त्रीपुन्नपुंसकदेवताः ॥

कामिके—

जाया शक्तिगदे विद्यात् पाशपद्मौ नपुंसकौ ॥ 675

शेषाः पुमानिति ख्याताः कीर्तितास्त्वस्त्र मूर्तयः ।
लोकेशानां तथा स्त्रीणां शूलमुद्रां प्रदर्शयेत् ॥ 676

ह्लादिनी हरणी चैव अरिष्टी मंगिनी तथा ।
ऋद्धा चैव निरुद्धी च जातकाशी स्वरूपिणी ॥ 677

अस्त्रशक्तिरिति प्रोक्ता अर्चयेद्देवसन्निधौ ।
विद्येश्वरा दलाग्रेषु पीठकंठे गणेश्वराः ॥ 678

पीठपादे तु लोकेशास्तदस्त्राणि शिलोपरि ।

## पञ्चावरणसंग्रहः ॥

तन्त्रसारे—

ब्रह्माङ्गकानां प्रथमावृतं स्यात् विद्येश्वराणां च गणेश्वराणाम् ।

दिक्पालकानां च दशायुधानां ईशस्य पञ्चावरणं क्रमेण ॥ 679

पश्चात् शिवाय मूलेन दत्वा पुष्पांजलित्रयम् ।
महामुद्रां दर्शयित्वा भक्त्या सर्वेश्वराय च ॥ 680

## पञ्चावरणधूपदीपाद्युपचारविभागः ॥

सोमशंभौ—

धूपं दीपं च नैवेद्यं तोयमाचमनीयकम् ॥ 681

करोद्वर्तनतांबूलमुखवासं च दर्पणम् ।
दद्याच्च परिवाराय मूलमन्त्रेण शंभवे ॥ 682

## प्रच्छन्नपटविषयः ॥

कमलालये—

देवानामर्चने काले प्रच्छन्नपटमुत्तमम् ।
वेदविक्रयिकैश्चापि ग्रन्थविक्रयिकैरपि ॥ 683

पापक्रूरपरिभ्रष्टनास्तिकैः श्रुतिदूषकैः ।
दुश्चर्मकुष्ठसंयुक्तैः शिवद्रव्यापहारिभिः ॥ 684

द्रव्यापहारी च गुरुद्रोही च पातकी ।
प्रमादाद्दर्शनं कृत्वा पूजायां निष्फलं भवेत् ॥ 685

तस्मात् पूजादिकाले तु नैवेद्यं चाभिषेचने ।
एवमादीनि काले तु प्रच्छन्नपटमारभेत् ॥ 686

## उत्तमादिनैवेद्यान्नम् ॥

कामिके—

शालीनां तण्डुलाः श्रेष्ठा यवव्रीह्यादि कन्यसम् ।
व्रीहीनामवशिष्टानां तण्डुलं चाधमं भवेत् ॥ 687

सिसतण्डुलकाये च ते सर्वे शाल्यः स्मृताः ।
इतरे व्रीहयः प्रोक्ताः फलं तेषां पृथक् पृथक् ॥ 688

इतरैकफलं चैव शाली दशगुणं भवेत् ।
प्रियङ्गुः शतशः प्रोक्ताः नीवारं तु सहस्रकम् ॥ 689

गोधूमं तु भवेल्लक्षं अनन्तं वैणवं भवेत् ।
भक्तो वित्तानुसारेण नैवेद्यं तु प्रकल्पयेत् ॥ 690

पत्रं पुष्पं फलं तोयं अन्नपानाद्यमौषधम् ।

## भोजनवस्त्वनिवेदनं निष्फलं, धनक्षयम् ॥

अनिवेद्य न भुंजीत भगवन्तं सदाशिवम् ॥ 691

अपूपकादि यद्द्रव्यं भोज्यं दत्वा शिवस्य तु ।
वर्धते तस्य तद्धान्यं फलपुष्पादिकं तथा ॥ 692

अदत्वा तु हरस्याथ भुक्तं तु क्षीयते धनम् ।

## नैवेद्यफलम् ॥

यावन्तस्तन्डुलास्तत्र नैवेद्यमपि कल्पयेत् ॥ 693

तावद्वर्षसहस्राणि शिवलोके महीयते ।

## नैवेद्यप्रमाणम् ॥

सूक्ष्मे—

द्विप्रस्थादिचतुर्द्रोणमात्मार्थे संप्रपूजयेत् ॥ 694

## उत्तमादिनैवेद्यप्रमाणम् ॥

अंशुमति—

उत्तमं द्व्याढकं प्रोक्तं षट्प्रस्थं मध्यमं भवेत् ।
अधमं चाढकं चैव नैवेद्यं त्रिविधं भवेत् ॥ 695

अथवान्यप्रकारेण आढकं चोत्तमं भवेत् ।
उत्तमादि त्रयं चैव कुडुपान्तं तदुच्यते ॥ 696

प्रस्थसार्धफलं चैव कुडुपाशनमुच्यते ।

## परिचारकनियमः ॥

प्रागुक्तविधिना पूर्वं स्नात्वा तु परिचारकः ॥ 697

शुक्लवस्त्रधरश्चैव शुक्लयज्ञोपवीतकः ।
पवित्रपाणिना कुर्यात् चरुपाकं यथाक्रमम् ॥ 698

## वस्त्रशुद्धिः ॥

वस्त्रपूतैश्च तोयैश्च जलद्रोणिं प्रपूरयेत् ।

## पात्रतण्डुलशुद्धिः ॥

पात्रशुद्धिं ततः कृत्वा क्षालयेत्तण्डुलान् हृदा ॥ 699
जलेनैव तु षट् कृत्वा निष्पीडय च मुहुर्मुहुः ।

## शुद्धिमंत्रः ॥

कामिके—

षडंगे क्षालनं कृत्वा सव्येन प्रक्षिपेज्जलम् । 700

## पाकलक्षणम् ॥

तंडुलस्य प्रमाणस्य अर्धाधिकसमं जलम् ।
प्रलिप्ते गोमयाद्यैस्तु प्रोक्षिते तत्र चानसे ॥ 701

धर्माधर्मभुजां चुल्लीं तण्डुलैरावयेद्धृदा ।
उद्धृत्य वामदेवेन स्थापयेद्धृदयेन तु ॥ 702

विन्यस्याग्निमघोरेण वक्त्रेणाग्निं प्रदीपयेत् ।
पिपीलिकादिसंजुष्टैः कोटरकृमिसंयुतैः ॥ 703

विष्फुलिंगयुतैश्चापि काष्ठैश्चापि न दीपयेत् ।
केशकीटापविद्धं च शर्करातुषसंयुतम् ॥ 704

अपक्वमतिपक्वं च नैवेद्यं परिवर्जयेत् ।
त्याज्यं तु वर्णगंधाभ्यां शीतलान्नं निवेदयेत् ॥ 705

## अशुद्धपाकफलम् ॥

सन्ताने—

तुषेण दारिद्रयं चैव पाषाणं व्याधिरेव च ।
केशेन मरणं विद्याद्वर्जयेत्तु विशेषतः ॥ 706

## षड्विधान्नविभागः ॥

हविश्च षड्विधं ध्येयं शुद्धं मुद्गान्नमेव च ।
पायसं दधिसंयुक्तं गौलं च मधुनाप्लुतम् ॥ 707

दधिमिश्रं गुलैर्मिश्रं मधुसंमिश्रकं हविः ।
एतेष्वेकमनेकं वा व्यंजनेन समन्वितम् ॥ 708

वीरतंत्रे—

पायसान्नोत्तमं वक्ष्ये मुद्गं वै तण्डुलार्धकम् ।
द्विगुणं क्षीरमित्युक्तं पाचयेत् पायसान्नकम् ॥ 709

गुळान्नं पाचयेद्विप्र क्षीरं वै तण्डुलार्धकम् ।
तण्डुलार्धं गुळं प्रोक्तं आज्यं चैव गुळार्धकम् ॥ 710

गुळान्नमिति विज्ञेयं कृसरान्नमथ श्रृणु ।
तिळं वै चूर्णितं तत्र तंडुलस्य चतुर्थकम् ॥ 711

तिलार्धं प्रक्षिपेदाज्यं कृसरान्नमिहोच्यते ।
तंडुलस्य चतुर्भागं मुद्गं तत्रैव योजयेत् ॥ 712

नालिकेरफलैर्युक्तं मुद्रान्नं तदिहोच्यते ।
शुद्धौदनसहस्रेभ्यः पायसान्नं विशिष्यते ॥ 713

पायसान्नसहस्रेभ्यः कृसरान्नं विशिष्यते ।
कृसरान्नसहस्रेभ्यो गुलान्नं च विशिष्यते ॥ 714

गुळान्नकसहस्रेभ्यो मुद्गान्नं तु विशिष्यते ।

## व्यंजनम् ॥

चातुले—

कुश्माण्डपनसालाबुकाळगं बृहतीद्वयम् ॥ 715

त्रपुषा कर्करी चैव सतुषं वितुषं तथा ।
एकैकमुपदंशानां प्रस्थस्यैकं पलं भवेत् ॥ 716

शिशुमूलं वल्लिमूलं कन्दमूलं च सूरणम् ।
आम्रं च तिंत्रिणी तत्र यथालाभं ग्रहेत् गुह ॥ 717

सर्वोपदंशका युक्ता मरीचिलवणान्विताः ।
जीरकादिसमोपेता यथायोगं पचेत् पृथक् ॥ 718

## पाकपात्रलक्षणम् ॥

चिन्त्यविश्वे—

स्मृत्यङ्गुलं तु विस्तारं विस्तारार्धेन वर्धयेत् ।
ओष्ठमेकाङ्गुलं प्रोक्तं स्वर्णतारादिभिर्भवेत् ॥ 719

तदर्धं मध्यमं ज्ञेयं तदर्धं कन्यसं भवेत् ।
सौवर्णं राजतं ताम्रं अथवा कदलीद्वयम् ॥ 720
शुद्धकांस्येन वा कुर्यात् पात्रमादाय बुद्धिमान् ।

## नैवेद्यस्थानशुद्धिः

सूक्ष्मे—

गोमयालेपनं कृत्वा देवाग्रे मण्डलं न्यसेत् ॥ 721
स्थलिकाक्षालनं कृत्वा नैवेद्यं च प्रपूरयेत् ।

## नैवेद्यविभागः ॥

व्यंजनं घृतकं चैव लवणैरुपदंशकैः ॥ 722
फलादिगुलसंयुक्तं क्षीरं दधि च मध्यमे ।
आज्यं घृतसमायुक्तमपिधानं तु वाससा ॥ 723

चिन्त्यविश्वे—

सूपापूपोपदंशाद्यैः फलैर्नानाविधैरपि ।
नैवेद्यं दापयेत्तस्माद्देवदेवस्य पूर्वके ॥ 724

सूक्ष्मे—

गण्डूषार्थं जलं देयं करसंपूर्णमानतः ।
एकत्रिपंचवारं वा विसृजेदस्त्रमंत्रतः ॥ 725

अंशुमति—

प्रत्येकपात्रे विन्यासमोदनेन प्रपूरयेत् ।
तस्योर्ध्वे विन्यसेत् पात्रं प्रोक्षयेत् हृदयेन तु ॥ 762

ताळत्रयं ततः कृत्वा दिग्बन्धं चावकुण्ठनम् ।
धेनुमुद्रां प्रदर्श्याथ पूर्वपात्रं विसर्जयेत् ॥ 727

भक्ष्यं भोज्यं च पेयं च लेह्यं चोष्यं च पंचधा ।
परिषिच्यास्त्रमन्त्रेण भोजनं हृदयेन तु ॥ 728

मध्यमाऽनामिका चैव अङ्गुष्ठाग्रेण योजयेत् ।
आचार्यहस्तमुद्धृत्य गौरीहस्ते निवेदयेत् ॥ 729

गौरी तु शिवहस्ते तु नैवेद्यं च निवेदयेत् ।
कपित्थस्य फलं चैव यथा कुंजरभक्षणम् ॥ 730

अन्तस्सारन्तु जिह्वायामेतत् ग्राह्यं तथेश्वरः ।
तत्पुष्पं तु विसृज्याथ हस्तप्रक्षालनं कुरु ॥ 731

## नैवेद्यपात्रसंख्या ॥

गणेश्वरादिबेराणां लिंगेनैव तु योजयेत् ।
अथवा एकपात्रस्थमोदनेन प्रदापयेत् ॥ 732

ज्ञानरत्नावल्यां—

भोगांगानां पृथक् देयं अभावादेकतो भवेत् ।

## नैवेद्यभागः ॥

सुप्रभेदे—

चतुर्भागैकभागेन परिवारबलिं ददेत् ॥ 733

## आचमनाद्युपचारः ॥

विश्वसारोत्तरे—

एलाचन्दनचन्द्राढ्यपानीयं चातिशीतलम् ।
पाटल्युत्पलपुष्पाद्यैः वासितं च सुगन्धिभिः ॥ 734

सुप्रभेदे—

पानीयं चाढकार्धं च अर्धार्धमथवा पुनः ।

कामिके—

तृप्तावाचमनं दद्यात् हस्तोद्वर्तनकं ततः ॥ 735

मुखवासं च तांबूलं देवयोग्यं प्रदापयेत् ।
एलालवङ्गकर्पूरजातितक्कोलचूर्णयुक् ॥ 736

मधुशार्करसंयुक्तं मुखवासमिदं भवेत् ।
गंधं पुष्पं च धूपं च दीपं नैवेद्यकं तथा ॥ 737

तांबूलं मूलमन्त्रेण दद्यात्तु परमेश्वरे ।

## नैवेद्यक्रमः ॥

कमलालये—

ईश्वरं पुरतः कृत्वा विघ्नेशाय निवेदयेत् ॥ 738

ईश्वरस्य निवेद्यान्ते सर्वदेवनिवेदनम् ।

## तांबूलम् ॥

पूगमेकं प्रतिप्रस्थं द्विगुणं त्रिगुणं तु वा ॥ 739

अथादितः क्रमेणैव पत्रं तत् त्रिगुणं भवेत् ।
शैलचूर्णं शंखचूर्णं कर्पूरेण च मिश्रितम् ॥ 740

शिवधर्मे—

पञ्चसौगंधिकोपेतं तांबूलं यो निवेदयेत् ।

## चन्दनं—तत्फलम् ॥

सुगंधदेहस्तेजस्वी सर्वावयवसुन्दरः ॥ 741

वर्षकोटिशतं दिव्यं शिवलोके महीयते ।

## फलनैवेद्यम् ॥

मातुलुंगफलादीनि सुपक्वानि निवेदयेत् ॥ 742

## धूपदीपम् ॥

कालोत्तरे—

हृन्मन्त्रेण पटं नीत्वा धूपं दीपं च दापयेत् ।

## घण्टाविभागः ॥

तंत्रसारे—

घण्टायां वासुदैवत्यं जिह्वायां तु सरस्वती ॥ 743
अनन्तो वलयं प्रोक्तं नाराचं मंत्रनादकम् ।
शूलं त्रिमूर्तिदैवत्यं वृत्ताकारं नभो भवेत् ॥ 744
नाभेरूर्ध्वं प्रकर्तव्यं महाघंटाप्रताडनम् ।
उत्तमं स्निग्धघोषं च मध्यमं मर्मरस्वरम् ॥ 745

अधमं घर्घराघोषं इत्येतन्मणिलक्षणम् ।
घंटाशब्देन गच्छंति दानवाश्च भयङ्कराः ॥ 746

आगच्छन्ति च सुप्रीताः शिवेन सह देवताः ।
तस्मात् सर्वप्रयत्नेन पूजाकाले सदा हरेत् ॥ 747

घण्टाया लक्षणं प्रोक्तं धूपस्य लक्षणं श‍ृणु ।

## उत्तमादिधूपम् ॥

अगरुश्चैकभागः स्यात् निर्यासं द्विगुणं भवेत् ॥ 748
चन्दनं त्रिगुणं प्रोक्तं मिळत्कर्पूरमिश्रितम् ।
उत्तमं धूपमाख्यातं मधुना च परिप्लुतम् ॥ 749

उशीरं चन्दनोपेतं मधुयुक्तं घृतप्लुतम् ।
भागं तत् पूर्ववत् प्रोक्तं मध्यमं धूपमुच्यते ॥ 750
गुल्गुलं घृतसंयुक्तं कन्यसं धूपमीरितम् ।
गुल्गुलुं घृतसंयुक्तं साक्षात् गृह्णाति शंकरः ॥ 751

मासार्धदानमात्रेण शिवलोके महीयते ।

## उत्तमादिदीपः ॥

गोघृतेन च तैलेन कर्पूरवर्तिदीपिकाम् ॥ 752

चतुस्त्रिद्वयंगुलायामा दीपज्वाला विशिष्यते ।
कपिलाघृतदीपस्य सिता रक्ता च तेन वा ॥ 753

अजाघृतेन वालाभे शुद्धतैलेन वा हिता ।
कपिलाया घृतं श्रेष्ठं मध्यमं त्वन्यजं घृतम् ॥ 754

अधमं स्यादजासर्पिः शुद्धतैलेन वा तथा ।
सात्त्विकं राजसं चैव तामसं च क्रमात् भवेत् ॥ 755

कर्पूरवर्तिकादीपं दापयेत् सर्वसिद्धिदम् ।
श्रेष्ठा युगाङ्गुलज्वाला मध्यमा तु गुणाङ्गुला ॥ 756

अधमा द्व्यंगुलज्वाला दीपा ह्येवं प्रकीर्तिताः ।

## वर्जितदीपः ॥

वृक्षबीजोद्भवैस्स्नेहैः शिवे दीपं विवर्जयेत् ॥ 757

## दीपपात्राधिदेवताः ॥

दीपपात्राधिदैवत्यं मुखे पावकमुच्यते ।
दण्डमीश्वरदैवत्यं पादं प्रजापतिस्तथा ॥ 758

नवशक्तिर्नवदीपं सप्तदीपस्य मातरः ।
पञ्चदीपे निवृत्यादि एकदीपे सरस्वती ॥ 759

## उपचारः ॥

सोमशंभौ—

दद्यादाचमनं पश्चात् स्वधान्तं शिवमन्त्रतः ।
दूर्वाक्षतकुशोपेतं बिल्वपत्रैस्समन्वितम् ॥ 760

दद्यात् पवित्रकं नित्यं मूलमंत्रसमायुतः ।
मुक्ताफलसमाकारान् दाडिमीबीजसन्निभान् ॥ 761

अक्षयं फलमाप्नोति अक्षतान् पूजयेत्सुधीः ।
पतनात् त्रायते यस्मात्तस्मादेतत् पवित्रकम् ॥ 762

स्तूयमानं विरिञ्चाद्यैः संतुष्टं भावयेच्छिवम् ।

**उत्तमादि-आरात्रिकसंख्या,तदधिदेवता च ॥**

आरात्रिकमथो वक्ष्ये सर्वदोषप्रशान्तये ॥ 763

नीराजनाय तन्त्रं तु वृत्तं वै सूर्यमण्डलम् ।
मध्यमं चाग्निदैवत्यं आरात्रिकाधिदेवता ॥ 764

नवदीपयुतं श्रेष्ठं पञ्चदीपं तु मध्यमम् ।
कन्यसं त्वेकदीपेन युतं पात्रक्रमं भवेत् ॥ 765

दीपमेवैकदीपे तु प्रोक्षयेदस्त्रमंत्रतः ।
आरात्रिकविहीने तु पावकेन भयं भवेत् ॥ 766

रसद्रव्यविहीने तु देवता कोपमाप्नुयात् ।
अन्यथा दीपहीने तु तोयहीने कुलक्षयम् ॥ 767

बध्वा तु सुरभिं पश्चात् दीपस्योपरि दर्शयेत् ।
उद्धृत्योपरि देवस्य त्रिः परिभ्रामयेद्धृदा ॥ 768

पादादिमूर्ध्निपयन्तं त्रिस्त्रिः भ्राम्य ततो न्यसेत् ।

## रक्षा ॥

अजिते—

ततो भस्म तु संगृह्य कर्पूरादिसुगन्धितम् ॥ 769

गृहीत्वा मुद्रया मृग्या भस्म लिंगोपरि त्रिधा ।
प्रक्षिपेद्दीपपात्रे तु ततो लिंगस्य मूर्धनि ॥ 770

ततो ललाटे मूलेन हृदयेनाथवा यजेत् ।
वृत्तं चैवोर्ध्ववक्त्रे तु त्रिपुण्ड्रं पूर्ववक्त्रके ॥ 771

त्रिशूलं दक्षिणे वक्त्रे पश्चिमे चतुरश्रकम् ।
उत्तरे चार्धचंद्रं तु इत्येवं योजयेच्छिवम् ॥ 772

फाललोचनमध्ये तु रक्षायाः किं प्रयोजनम् ।
ललाटनयनस्योर्ध्वे रक्षां देवस्य दापयेत् ॥ 773

## तिलकम् ॥

देवी व्यक्तस्वरूपा चेत् तिलकं च पुरोगळे ।

## दर्पणं-तदधिदेवता च ॥

अंशुमति—

जलोपस्पर्शनं कृत्वा दर्पणं दर्शयेत्ततः ॥ 774

दर्पणं शिवशक्तिस्तु तत्तेजश्च भवेच्छिवः ।
चन्द्रं तु मंडलं प्रोक्तं दण्डो दारक उच्यते ॥ 775

शिवधर्मे—

शिवाय पुरतो दद्यात् दर्पणं स्वच्छनिर्मितम् ।

कल्पायुतसहस्राणि शिवलोके महीयते ॥ 776

## छत्रं-तत्फलम्

शरच्चन्द्रांशुविमलं मुक्तादामोपशोभितम् ।
मणिदण्डमयं छत्रं दद्याद्वा कांचनामयम् ॥ 777

छत्रेण सविचित्रेण धार्यमाणेन शोभितः ।
विमानशतसंभोगैः चिरं शिवपुरे वसेत् ॥ 778

## चामरं-तत्फलम् ॥

शिवाय चामरं दद्यात् मणिदण्डविभूषितम् ।
हेमरौप्यादिदण्डं वा तस्य पुण्यफलं श्रृणु ॥ 779

चामरासक्तहस्ताग्रदिव्यस्त्रीपरिवारितः ।
महाभोगी विमानस्थः चिरं शिवपुरे वसेत् ॥ 780

## तालवृन्तं-तत्फलम् ॥

संवीज्य तालवृन्तेन स्कन्दगन्धैः प्रलेपितम् ।
वर्षकोटिसहस्रेभ्यो वायुलोके महीयते ॥ 781

## मयूरव्यजनं-तदधिदेवता च ॥

सूक्ष्मे——

मायूरव्यजनं दत्वा शिवायातीव शोभनम् ।
व्यजने तु रविः प्रोक्तः दण्डः पद्मभुजंगमः ॥ 782

चामरे वायुदैवत्यं कार्कोटो दण्ड उच्यते ।

## छत्रादिमन्त्रः ॥

अंशुमति—

छत्रं चामरकं चैव व्यजनं तालवृन्तकम् ॥ 783

पञ्च ब्रह्ममनुं स्मृत्वा योजयेत्तु क्रमेण तु ।

## पुराणादिश्रवणम् ॥

पुराणागमपञ्चाङ्गश्रवणाच्चापि तोषयेत् ॥ 784

## षोडशोपचाराः ॥

आवाहनासनं पाद्यं अर्घ्यं स्नानं च वस्त्रकम् ।
उपवीतं गन्धपुष्पं धूपदीपनिवेद्यकम् ॥ 785
आचमनं च पानीयं तांबूलं तु प्रदक्षिणम् ।
उपचारैः षोडशभिः महादेवं ततोऽर्चयेत् ॥ 786

## द्वादशोपचाराः ॥

कारणे—

आवाहनासनं तत्र स्यात् द्वादशकमुच्यते ।
पाद्यं तु पञ्चमात्रं स्यात् त्रिमात्रं आचमनं तथा ॥ 787

## उपचारादिकालप्रमाणम् ॥

एकमात्रं भवेदर्घ्यं षण्मात्रं गन्धमुच्यते ।
पुष्पं द्वादशमात्रं स्यात् धूपं पञ्चदशापि च ॥ 788

दीपं चैव तु षण्मात्रं नीराजनं तु षोडशम् ।
भस्मना दापयेत् पश्चात् सप्तमात्रं तु कथ्यते ॥ 789

व्यजनं तु त्रिमात्रं स्यात् चामरं च दशं भवेत् ।
छत्रं तु पंचमात्रं स्यात् मुनिमात्रं तु दर्पणम् ॥ 790

नैवेद्यं तु ततः कुर्यात् चतुर्विंशतिमात्रकम् ।

## उपचारप्रियदेवता ॥

अर्घ्यं देवप्रियार्थं स्यात् गन्धं ब्रह्मप्रियं भवेत् ॥ 791

पुष्पं वृद्धिप्रदं विद्धि धूपं वैश्वानरप्रियम् ।
दीपं कर्मप्रियं ज्ञेयं आरार्त्रिं तु जयप्रदम् ॥ 792

रक्षा चापि स्वरक्षार्थं भूपतेश्च विशेषतः ।
दर्पणं ज्ञानदं चैव छत्रं राज्ञो बलावहम् ॥ 793

चामरं शत्रुनाशं स्यात् गीतवाद्यं प्रियावहम ।
हविरस्नानं समृद्धिः स्यात् पानीयं प्राणरक्षकम् ॥ 794

तांबूलं श्रीप्रदं विद्यात् होमं रोगविनाशम् ।

## उपचारहीनफलम् ॥

गंधहीने भयोत्पत्तिः पुष्पहीने तु संकुलम् ॥ 795

धूपहीने ध्रुवं रोगो दीपहीने मतिक्षयः ।
नैवेद्यहीने दुर्भिक्षं अग्निहीने तु संकुलम् ॥ 796

मन्त्रहीने तु मरणं क्रियाहीने तु व्याधितम् ।
पूजाहीने तु वैकल्यं पुत्रस्त्रीभूमिनाशनम् ॥ 797

तस्मात् सर्वप्रयत्नेन विधिवत् पूजयेच्छिवम् ।

## उपचारविभागः ॥

गन्धं मूलफलादिकन्दकुसुमाद्यन्नादिकं पार्थिवं ।
चाप्यं वारिपयोघृतादिदधिकं चाग्नेयमिष्टं मणिः ।
दीपाद्याभरणादिमारुतमथो धूपं तथा चामरं
पाटागीतरवादिनाभसममी पञ्चोपचाराः शिवे ॥ 798
अर्घ्यपुष्पादिकं दत्वा जपेदष्टोत्तरं शतम् ॥

## आत्मरक्षा ॥

कालोत्तरे–

उभयोश्चन्द्रयोर्मध्ये स्वदेहं चिन्त्य यत्नतः ।
तेनामृतमयाद्देहास्त्ववध्या स्त्रिदशैरपि ॥ 799

आत्मरक्षा समाख्याता मन्त्ररक्षा निगद्यते ।

## मन्त्ररक्षा ॥

शक्तिगर्भे न्यसेन्मन्त्रं न पुंसि न शिवे तदा ॥ 800

अशक्ताः पुरुषस्थास्स्युः शिवस्थाश्शांततेजसः ।
तस्माच्छक्तिगता मन्त्रा भुक्तिमुक्तिफलप्रदाः ॥ 801

शक्तिराद्यफला भीमा शैवी शिवफलप्रदा ।
शिवादिभिन्ना सा ज्ञेया सर्वदा रविरश्मिवत् ॥ 802

मन्त्रमाता परा शक्तिः आद्या कुंडलिनी तु सा ।
हृत्प्रदेशे स्थिता नित्यं रविचन्द्राग्निसन्निभा ॥ 803

## त्रिनाडी ॥

एता त्रिधातुविज्ञेया इडा पिंग्यत्रिभेदतः ।
सुषुम्नान्तर्गता गूढा ज्ञाता गुरुमुखेन तु ॥ 804

आनाभि द्वादशान्तान्तं व्याप्ता प्राणेन वर्तते ।
त्रिशूलमार्गतो याति द्वादशान्तन्तु योगिनाम् ॥ 805

गमागमप्रभेदेन याति सा शाङ्करे पदे ।
परभावं समाश्रित्य परानन्दं समश्नुते ॥ 806

इति शक्त्यादिकं ज्ञात्वा मन्त्ररक्षाक्षमो भवेत् ।
शाक्तं बलं समाश्रित्य उपांशु जपमारभेत् ॥ 807

## जपविभागः ॥

द्विविधा शक्तिरुद्दिष्टा सूर्यसोमात्मना गुह ।
हृदयात्तु त्रिपुटयन्तं चरते पक्षवर्तिनी ॥ 808

दिने सूर्योदये प्राणे जप्तव्यं मुक्तिकांक्षिणा ।
चन्द्रोदये निशायां च जप्तव्यं भुक्तिमिच्छता ॥ 809

सौषुम्नेन मरुता जपस्सर्वार्थसिद्धिदः ।

## उत्तमादिजपप्रमाणम् ॥

षट्सहस्रिके—

शतेनाष्टोत्तरेणैव उत्तमं परिकीर्तितम् ॥ 810

तदर्धं मध्यमं शस्तं तदर्धं कन्यसं भवेत् ।

## रुद्राक्षविभागः, तद्धारणफलम् ॥

उन्मील्य नेत्राणि शरत्सहस्रं अघोरमस्त्रं रिपुनाशनार्थम् ।
तथा कुलं तस्य बभूवुरक्ष्णां त्रयं ततोऽश्रूण्यपतंश्च तेभ्यः ॥ 811

रुद्राक्षवृक्षा विटपैर्बभूवुः शिवाज्ञया सर्वजगद्धिताय ।
रुद्राक्षवृक्षास्तपनाक्षिजातास्ते द्वादश स्युः कपिलप्रभेदैः ॥ 812

चन्द्राक्षिजाः षोडश शुभ्रवर्णाः कृष्णा दश स्युः ज्वलनाक्षिजाताः ।
ब्राह्मं सितं कापिलवर्णयुक्तं क्षात्रं तु वैश्यं ह्युभयात्मकं च ॥ 813

कृष्णं च शूद्रं कथयन्ति बीजं रुद्राक्षवृक्षप्रभवन्तु जात्या ।
एकाननं शङ्कर एव साक्षात् रुद्राक्षबीजं विनिहन्ति हत्याम् ॥814

द्विवक्त्रबीजं बहुगोवधूघ्नं देवेशदैवत्यमलभ्यमक्षम् ।
आग्नेयमुक्तं वदनत्रयं यत् योषिद्वधघ्नं दधतः क्षणेन ॥ 815

चतुर्मुखं यच्चतुराननीयं नरस्य हत्यां क्षणतो निहन्ति ।
कालाग्निरुद्रं न तु पञ्चवक्त्रं अभक्ष्यदस्संगमपातकघ्नम् ॥ 816

स्कान्दं हि यत् षड्वदनं करेण दक्षेण धार्य द्विजहन्तृशुध्यै ।
सप्ताननं भोगिपतिह्यनन्तं स्तेयादिशुद्धिं विदधाति सद्यः ॥ 817

वैनायकं ह्यष्टमुखं सुवर्णं कूटं गुरुस्त्रीगमनाद्यघघ्नम् ।
नवाननं भैरव एव देवो भुक्तिं च मुक्तिं शिवतुल्यशक्तिम् 818

करोति वामेन करेण धार्यं हत्यायुतानां विनिहन्ति कोटिम् ।
हरि स्वयं यद्दशवक्त्रबीजं पिशाचभूतग्रहराक्षसाश्च ॥ 819

वेताळसर्वप्रतियोधसिंहव्याघ्रादिकांस्तांश्च निहन्ति शीघ्रम् ।
एकादशास्यं दश चैकरुद्रो धार्यं शिखायां विधिनानवद्यो॥ 820

नराश्वमेधायुतवाजपयसहस्रगोदानसहस्रतुल्यम् । 821

यद्वक्त्राणि दशद्वयेन कथितं तद्भास्करीयं स्मृतं
कंठस्थं रवितुष्टिकृद्ध्यमखैर्गोमेधपुण्यैः समम् ।
हस्त्यश्वखसृगालमूषिकखगक्लीबान्धनारीमृग–
व्यालर्क्षशुकभेकसर्पमहिषव्याघ्रादिदोषापहम् ॥ 822

यद्वक्त्राणि दशद्वयन्नतु लभेत्तत् कार्तिकेयं शुभं
सर्वं सिध्यति भोगभोग्यमतुलं सिध्येत्ततः पादुका।
इष्टार्थश्च रसारसायनमथ भ्रूणार्यमातापितृ–
स्त्रीकन्यावधतोऽपि शुध्यति दधन्नास्मात्परं विद्यते ॥ 823

पापिष्ठोऽपि नरोऽक्षमेकमपि यद्धत्ते स शुद्धो भवेत्
कुर्वन् वापि न लिप्यते न तु चिंत तत्तन्मुमुक्षोदितैः ।

पुच्छे पुच्छमुखे मुखं च सदृशैर्मुक्ताप्रवालान्तरैः
सौवर्णैर्मणिभिर्दधन्मखफली मर्त्योऽनवद्यो भवेत् ॥ 824

सहस्रं धारयेद्यस्तु रुद्राक्षाणां दृढव्रतः ।
प्रणमन्ति सुरास्सर्वे यथा रुद्रं तथैव तम् ॥ 825

अष्टोत्तरशतैर्माला रुद्राक्षैर्धार्यते यदि ।
क्षणे क्षणेऽश्वमेधस्य फलं प्राप्नोत्यसंशयः ॥ 826

रुद्राक्षमालां यो धत्ते कण्ठे हस्ततले सदा ।
शतमर्धं तदर्धं वा स मुक्तो नात्र संशयः ॥ 827

एकादश तु रुद्राक्षं मेरुहीनाक्षमालिका ।
अंगुष्ठमूले जपतः सद्यो मुक्तिः षडानन ॥ 828

रुद्राक्षं तु महाभूत्यै मुक्तिदं परमं शुभम् ।

## मिश्रमुखरुद्राक्षमालावर्जनम् ॥

एकवक्त्रैस्त्रिवक्त्रैर्वा चतुर्वक्त्रैश्च पञ्चभिः ॥ 829
षड् वक्त्रैश्चापि कर्तव्यं तस्मात् मिश्रं तु वर्जयेत् ।

## रुद्राक्षाधिदेवता ॥

रुद्राक्षस्य मुखं ब्रह्मा तन्नाळं विष्णुरुच्यते ॥ 830
रेखायामीश्वरं प्रोक्तं इत्येता अधिदेवताः ।

## सह· उत्तमादिरुद्राक्षमालाविभागः ॥

मुखे मुखं प्रकर्तव्यं मूलं मूलेन योजयेत् ॥ 831

धात्रीफलप्रमाणेन श्रेष्ठमेतदुदाहृतम् ।
बदरस्य प्रमाणेन चणकं मध्यमाधमौ ॥ 832

नवत्रितन्तुना प्रोतं कर्तव्यं पूर्ववच्छुभम् ।
नागपाशं तु सावित्रीं ब्रह्माख्यं वाथ ग्रन्थिनम् ॥ 833

ग्रन्थ्यूर्ध्वैकं तु मेर्वाख्यं कर्तव्य तं न लंघयेत् ।

## रुद्राक्षशुद्धिमन्त्रः ॥

क्षालयेत् सद्यमन्त्रेण वामदेवेन घर्षयेत् ॥ 834

धूपयेत् बहुरूपेण पुरुषेण तु मन्त्रयेत् ।
पञ्चमेनैव प्रत्येकं प्रत्येकं तु शतं शतम् ॥ 835

मेरुं च पञ्चमेनैव तथाघोरेण मन्त्रयेत् ।
मेरुं च पञ्चभिः पूज्य शिववच्च यथाक्रमम ॥ 836

## उत्तमादिजपविभागः ॥

कनिष्ठानामिकामध्ये पुष्पं संग्राह्य बुद्धिमान् ।
प्रच्छन्नपटमाच्छाद्य मूलमन्त्रमनुस्मरन् ॥ 837

वामहस्ते तु कुसुमं जपेद्दक्षिणपाणिना ।

मानसोपांशु भाष्याणां प्रथमं चोत्तमोत्तमम् ॥ 838

उपांशु मध्यमं प्रोक्तं अधमं भाष्यमेव हि ।
तस्मात् भाष्यं समुत्सृज्य मानसोपांशुना जपेत् ॥ 839

## मन्त्रोच्चारणभेदः- तत्फलं च ॥

भीमसंहितायां—

उपांशुयजने प्रोक्तं वाचिकं होमकर्मणि ।
मानसं तु जपेन्मन्त्रं मन्त्रमेवमुदाहृतम् ॥ 840

कालोत्तरे—

अङ्गुष्ठानामिका ग्राह्या जपं कुर्यात्तु मानसम् ।
शतकोटिगुणं पुण्यं लभते नात्र संशयः ॥ 841

अङ्गुष्ठमध्यमाभ्यां तु जपं कुर्यादुपांशुकम् ।
तथा लक्षफलं तस्य शतजापात् प्रजायते ॥ 842

अङ्गुष्ठतर्जनीभ्यां तु जपं भाष्यं प्रकल्पयेत् ।
अक्षराक्षरसन्धानं न भूतं न विलंबितम् ॥ 843

फलं सहस्रगुणितं प्राप्नुयान्नानृतं वचः ।
उत्कये सृष्टिमार्गेण घर्षयेदक्षसूत्रकम् ॥ 844

ऊर्ध्वमार्गेण मुक्त्यर्थं घर्षयेत्तु शनैश्शनैः ।
मेरुं न लंघयेन्मन्त्री लंघनाद्दोषभाग् भवेत् ॥ 845

सहस्रं बहुरूपस्य जप्तव्यं तेन शुद्ध्यति ।
प्रमादात् पतितं भूमौ जप्तव्यं तु शतद्वयम् ॥ 846

पतिते च तथान्यत्र प्रायश्चित्तं न चेष्यते ।
तथा मन्त्रं चाक्षसूत्रं गुरोरपि न दर्शयेत् ॥ 847

जपकाले तु गोप्तव्या जपमाला च षण्मुख ।
परदृष्टिगता माला यदि स्यान्निष्फलो भवेत् ॥ 848

## जपमालाधिदेवता

जपमाला च नक्षत्रं नायकं तु शशी भवेत् ।
ग्रन्थिशक्तिसमोपेता तन्तु ब्रह्माधिदेवता ॥ 849

## जपसंख्या

पंचविंशति मोक्षार्थं सप्तविंशति पौष्टिकम् ।
अष्टाविंशति काम्यार्थं पंचदश्याभिचारकम् ॥ 850

## अङ्गुल्यधिदेवताः ॥

मणिवंधे स्वयं ब्रह्मा अङ्गुष्ठे तु शतक्रतुः ।
तर्जन्यामीश्वरो ज्ञेयो मध्यमांगुलि केशवः ॥ 851

अनामिकायां नागश्च कनिष्ठे भास्करः स तु ।
यक्षकिन्नरगंधर्वाः सर्वदेवा दले स्थिताः ॥ 852

एवन्निश्चित्य पूर्वे तु पश्चात् पञ्चाक्षरं जपेत् ।

## जपविभागः ॥

अङ्गुष्ठा तर्जनी चैव ऐहिकामुष्मिकावहम् ॥ 853

अङ्गुष्ठा मध्यमा चैव सर्ववश्ये तु वै जपेत् ।
अङ्गुष्ठानामिका चैव आकर्षादीनि वै भवेत् ॥ 854

कनिष्ठांगुष्ठयोगेन विद्वेषोच्चाट मारणम् ।
अङ्गुष्ठानामिका चैव नित्यमेव जपेत् बुधः ॥ 855

अक्षसूत्रं विना वत्स जपं सर्वं च वर्जयेत् ।
तस्मात्सर्वप्रयत्नेन रुद्राक्षैर्जपमारभेत् ॥ 858

मेरुं प्रदक्षिणीकृत्य जपं कुर्यात् समाहितः ।
वश्याकर्षणकर्माणि शान्तिके पौष्टिकेपि च ॥ 857

रुद्राक्षमालया जप्ता सद्य एव च सिद्ध्यति ।
पश्चिमे कर्षणं चैव उत्तरे शांतिकं भवेत् ॥ 858

ऐन्द्रे तु पौष्टिकं विद्यात् आग्नेयं द्वेषणं भवेत् ।
याम्ये तु स्वर्गकामानां नैरृत्यां मोहनं विदुः ॥ 859

वारुण्यां शान्तिकं कृत्वा वायव्योच्चाटनं भवेत् ।
सौम्ये तु कर्षणं चैव ऐशान्यां मरणं ध्रुवम् ॥ 860

## नानाविधजपमाला ॥

रक्तवर्णं तु वीरश्रीः पिङ्गं वै स्तंभनं भवेत् ।

स्फटिकाभं च मुक्तिः स्यात् कृष्णं स्यादाभिचारकम् ॥ 861

अङ्गुलीजपमेकं तु रेखा दशगुणं भवेत् ।
इष्टोरष्टगुणं विद्यात् दीपे दशगुणं भवेत् ॥ 862

शङ्खे शतगुणं चैव पद्मरागसहस्रकम् ।
मणिभिर्दश साहस्रं स्फटिकं लक्षमुच्यते ॥ 863

पद्मं तु कोटिलक्षं तु सौवर्णं दशकोटिकम् ।
कुशग्रन्थी कोटियुक्ता रुद्राक्षं चाप्यनन्तकम् ॥ 864

## जपस्थानफलम् ॥

गृहेष्वेकफलं विद्यात् गोस्थाने च फलं दश ।
नदीतीरे शतं विद्यात् तीर्थे जपसहस्रकम् ॥ 865

समुद्रतीरे कोटी स्यात् दशकोटिश्शिवालये ।
सिद्धिस्थानेष्वनन्तं स्यात् स्थानमेतद्वरानने ॥ 866

## जपफलम् ॥

जपेन पापं क्षपयेदशेषं यत्तात्परं जन्मपरम्परासु ।
जपेन रोगं जयतेऽथ मृत्युं जपेन सिद्धिं लभते च मुक्तिम् ॥ 867

## नानाजपमन्त्रम्

मूलस्याष्टशतं जप्त्वा न भूतं न विलम्बितम् ।

चिन्त्यविश्वे—

हृदाभिमन्त्रितं वर्म वेष्टितं खड्गरक्षितम् ॥ 868

कुशपुष्पाक्षतोपेतमुद्रयोद्भवसंज्ञया ।
गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ॥ 869

सिद्धिर्भवतु मे येन त्वत्प्रसादात् त्वयि स्थिते ।
यत्किंचित् कर्म हे देव सदा सुकृतदुष्कृतम् ॥ 870

तन्मे शिवपदस्थस्य भुंक्ष्व क्षपय शंकर ।
शिवो दाता शिवो भोक्ता शिवस्सर्वमिदं जगत् ॥ 871

शिवो यजति सर्वत्र यश्शिवस्सोहमेव तु ।
इति श्लोकं पठित्वा तु दक्षहस्तेन शंभवे ॥ 872

मूलाणुनार्घ्यतोयेन वरहस्ते निवेदयेत् ।

कामिके—

ब्रह्माङ्गानां जपं कृत्वा दशांशं विनिवेदयेत् ॥ 873

अर्घ्यं पुष्पादिकं दत्वा स्तुत्वा च विविधैः स्तवैः ।

स्तोत्रम्—

देवस्याग्नेयदिग्भागे योगपीठं ततो यजेत् ॥ 874

श्रीमद्देशिकपादेभ्यः सशक्तिभ्यो नमो नमः ।
सदा पक्वात्मसंबोधकारणेभ्यो नमो नमः ॥ 875

देवस्य पश्चिमे भागे विद्यापीठं ततो यजेत् ।
सकलाज्ञानहं विश्वविज्ञानप्रदमीश्वरम् ॥ 876

विद्यापीठं समादृत्य मनोवाग्विग्रहैर्नमः ।
ततस्तु देवदेस्य दत्वा पुष्पांजलित्रयम् ॥ 877

स्तोत्रैस्संतोषयेदीशं भक्त्या परमया सह ।
नमस्ते देवदेवेश नमस्ते करुणाकर ॥ 878

नमस्ते पार्वतीनाथ नमस्ते भक्तवत्सल ।
नमस्ते सर्वजन्तूनां भुक्तिमुक्तिप्रदाव्यय ॥ 879

नमस्ते वेदवेद्याय नमस्ते शशिमौलये ।
नमस्ते परमानन्द नमस्ते कृत्तिवाससे ॥ 880

नमस्तेऽस्तु भस्मदिग्धांग नमस्ते त्रिपुरारये ।
नमस्ते भगवन् शंभो नमस्ते नागभूषण ॥ 881

नमस्तेऽस्तु महादेव प्रपन्नं पाहि मां प्रभो ।
ततस्तु देवदेवस्य दत्वा पुष्पांजलित्रयम ॥ 882

स्तोत्रैः संतोषयेदीशं भक्तया परमया सह ।
वरं वरेण्यं वरदं वरिष्ठं वरवाहनम् ॥ 883

वरमालाधरं देवं प्रणतोस्मि सदाशिवम् ॥
भूमिरापः शिखी वायुः खमात्मा चन्द्रभास्करौ ॥ 884

मनोबुद्धिरहंकारः परा प्रकृतिरेव च ।
यस्येच्छामनुवर्तन्ते भावाभावविकारिणीम् ॥ 885

तस्मै परमदेवाय पराय परमात्मने ।
महद्भ्यश्चापि महते महामायातिमायिने ॥ 886

सूक्ष्मेभ्योप्यतिसूक्ष्माय नमस्कृत्यामितात्मने ।
विश्वरूप नमस्तेस्तु आदिकालप्रवर्तक ॥ 887

सर्वज्ञाय नमस्तुभ्यं सर्वकर्त्रे नमोस्तु ते ।

## अग्निकार्यम् ॥

कामिके—

अग्निकार्यं यथा कार्यं अभिषेकादनंतरम् ॥ 888

यतस्तेन विनाचार्यदीक्षादौ नाधिकारिणः ।
हुतेनैव तु मुच्यन्ते साधका जन्मबन्धनात् ॥ 889

कालोत्तरे—

ततस्संप्रार्थ्य देवेशं होमागारं ततो व्रजेत् ।

## कुण्डः ॥

ज्ञानरत्नावल्यां—

वह्निकार्यं चिताकार्यं कुंडे वा स्थंडिलेपि वा ॥ 890

नित्यहोमे तु वेदाग्रमाग्नेय्यां हस्तमानकम् ।

विस्तारादुच्छ्रयादूर्ध्वं मेखलासहिता तथा ॥ 891

कुर्यात्कुण्डमथैशान्यां पूर्वे वा योगपीठतः ।
ऐष्टकं सुदृढं कुण्डं खातात् बाह्येंगुलं ततः ॥ 892

आद्या देवांगुलोच्छ्राया त्र्यंगुला द्व्यंगुला क्रमात् ।
मेखला च तदूर्ध्वे तु योनिरर्कांगुलायता ॥ 893

मङ्गलांकुरविस्तारा नेमिरर्धांगुलोन्नता ।
ओष्ठमंगुष्ठवत्सर्वं अश्वत्थदलवत् कुरु ॥ 894

पद्माकारं तथा नाभिं कुर्यात् कुण्डस्य मध्यमे ।
द्विभागं दलभागं तु एकभागं तु कर्णिका ॥ 895

कुण्डस्य लक्षणं प्रोक्तं स्थण्डिलं त्वधुनोच्यते ।

## स्थण्डिलम् ॥

शुद्धदेशोत्थसिकतैरनार्द्रैर्हस्तविस्तृतम ॥ 896

अङ्गुलत्रयमानोच्चं निम्ननिम्नोन्नतं न च ।

भीमरुद्रसंहितायां—

अग्निकार्यं तु सिकताभावे पांसुमृदापि वा ॥ 897

गोमयालेपनं कृत्वा चतुरश्रसमन्वितम् ।
कुण्डनाभिं पुरस्कुर्वन् उपविश्योत्तराननः ॥ 898

निरीक्षणं च कुण्डस्य प्रोक्षणं ताडनं कुशैः ।

कालोत्तरे—

विदध्यादस्त्रमंत्रेण वर्मणाभ्युक्षणं मनम् ॥ 899

खड्गेन खातमुद्धारं पूरणं समतामपि ।
कुर्वीत वर्मणा सेकं कुट्टनं तु शराणुना ॥ 900

संमार्जन समालेपं कलारूपप्रकल्पनम् ।
त्रिसूत्रपरिधानं च वर्मणाभ्यर्चनं हृदा ॥ 901

तिस्रः पूर्वाननाः कार्याः रेखैका चोत्तरानना ।
वज्रीकरणमस्त्रेण वज्राकारं कुशैस्त्रिभिः ॥ 902

हृदा चतुष्पथं कार्यं सोमेन्द्रास्यकुशद्वयात् ।
अक्षवाटाय कुंडौ च कवचेनांकुशान्न्यसेत् ॥ 903

विन्यस्य विष्टरं मध्ये दिव्यं सिंहासनं स्मरेत् ।
तन्मध्यमे तु संस्था'य वागीश्वरीं विशेषतः ॥ 904

## अग्न्यधिदेवताध्यानम् ॥

मृगेन्द्रे—

देवीमावाहयेद्विद्यां विधिवद्विश्वमातरम् ।
श्यामां ऋतुमतीं ध्यात्वा सद्वासोमाल्यभूषणाम् ॥ 905

प्रसन्नवदनां पद्मपत्राभनयनप्रभाम् ।
वागीश्वरं तु रक्ताभं त्रिणेत्रं च चतुर्भुजम् ॥ 906

अभयं वरदोपेतं पाशशूलधरान्वितम् ।
अतसीपुष्पसंकाशं तत्र देवीं सलक्षणाम् ॥ 907

तद्वद्वागीश्वरं देवं हृदा विन्यस्य पूजयेत् ।

कालोत्तरे—

वागीशी सा भवेद्गौरी वागीशः स्यान्महेश्वरः ॥ 908

इति ज्ञात्वा तु यत्नेन पूजयेद्विश्वमातरम् ।

कामिके—

वह्निं सदाश्रयानीतं शुद्धपात्रोपरिस्थिम् ॥ 909

क्रव्यादांशं परित्यज्य वीक्षणादिविशोधितम् ।
औदार्यं बैन्दवं भौमं एकीकृत्यानलत्रयम् ॥ 910

विन्यस्य वह्निचैतन्यं वह्निबीजेन देशिकः ।
संहितं मंत्रितं वह्निं धेनुमुद्राकृतिं कृतम् ॥ 911

रक्षितं होतृमंत्रेण कवचेनावकुंठितम् ।

सर्वज्ञानोत्तरे—

पूजितं त्रिः परिभ्राम्य कुंडस्योर्ध्वे प्रदक्षिणम् ॥ 912

शिवबीजमिति ध्यात्वा वागीशी गर्भगोलके ।
वागीश्वरेण देवेन क्षिप्यमाणं विभावयेत् ॥ 913

भूमिष्ठजानुको मन्त्री हृदात्म संमुखं क्षिपेत् ।
ततोन्तस्स्थितबीजस्य नाभिदेशे समूहनम् ॥ 914

संवृतिं परिधानं च शौचमाचमनं हृदा ।
गर्भाग्नेः पूजनं कृत्वा तद्रक्षार्थं शराणुना ॥ 915

बध्नीयाद्दर्भजं देव्याः कङ्कणं पाणिपल्लवे ।

## अग्निगर्भाधानादि-षोडशक्रियाः ॥

गर्भाधानाय संपूज्य सद्योजातेन पावकम् ॥ 916

तिलैर्हृदयमन्त्रेण जुहुयादाहुतित्रयम् ।
पुंसवनाय वामेन तृतीये मासि पूजनम् ॥ 917

आहुति त्रितयं कुर्यात् शिरसांबुकणान्वितम् ।
सीमन्तोन्नयने षष्ठे मासे संपूज्य रूपिणा ॥ 918

जुहुयादाहुतीस्तिस्रः शिखायां शिखयैव तु ।
वक्त्राङ्गकल्पनं कुर्यात् वक्त्रोद्घाटननिष्कृतिम् ॥ 919

जातकर्मणि वर्माद्य दशमे मासि पूर्ववत् ।
वह्निं सन्धुक्ष्य दर्भाद्यैः स्नानं गर्भमलापहम् ॥ 920

सुवर्णबन्धनं देव्याः कृतं ध्यात्वा हृदार्चयेत् ।
सद्यस्सूतकनाशाय प्रोक्षयेदस्त्रवारिणा ॥ 921

कुण्डं तु बहिरस्त्रेण ताडयेद्वर्मणार्चयेत् ।
अस्त्रणोत्तरपूर्वाग्रमेखलासु बहिः कुशान् ॥ 922

आस्तीर्य स्थापयेत्तेषु हृदा परिधिविष्टरान् ।

## अष्टदर्भाः ॥

कुशकाशा उशीरं च दूर्वावेणुयवास्तथा ॥ 923
विश्वामित्रं च मौञ्जी च अष्टदर्भाः प्रकीर्तिताः ।

## कुशदोषः ॥

कुशास्सुदेशजाः स्निग्धा नातिखर्वा न चायताः ॥ 924
शुकच्छायाः साग्रमूलाः सप्तवर्णा न तप्तजाः ।
पथि जाताश्चितास्थाने श्मशाने पितृतर्पणे ॥ 925
स्तरणासनपिण्डेषु न ग्राह्याः सप्तदेशजाः ।

## स्त्रीपुन्नपुंसकदर्भाः ॥

अग्रस्थूलं भवेन्नारी मूलस्थूलं नपुंसकम् ॥ 926
मूलाग्रं तु समं चैव पुंदर्भेति प्रकीर्तितम् ।

## तत्प्रयोजनकालः ॥

ज्ञानरत्नावल्यां —

स्त्रीलिंगा मृदवः श्यामाः यागकर्मसु शोभनाः ॥ 927
पुल्लिंगा हरिता ईषत्पक्षा बर्हिषदस्सदा ।
नियोज्याः शिवयागादौ प्रशस्ताः सौम्यकर्मसु ॥ 928
अधमाः कठिना ईषत् श्यामा दर्भा नपुंसकाः ।
रौद्रकर्मसु ते योज्या गर्हिताः सौम्यकर्मणि ॥ 929

## कुशाधिदेवता ॥

कुशमूले भवेत् ब्रह्मा कुशमध्ये तु केशवः ।
कुशाग्रे शङ्करश्चैव कुशानामधिदेवताः ॥ 930

## उत्तमादिकूर्चम् ॥

तत्वतिथि ग्रह संग्रह दर्भै रष्टशांगुल कूर्चसमानम् ।
अग्रयुगांगुल ग्रन्थि तदर्धं उत्तम मध्यम कन्यसकूर्चम ॥ 931

ऊर्ध्वकूर्चं पौष्टिकं च अधःकूर्चन्तु शान्तिकम् ।
अन्तःकूर्चं प्रकर्तव्यं अभिचारार्थमेव च ॥ 932

## कूर्चाधिदेवताः ॥

कूर्चमूले तु सविता कूर्चमध्ये तु वैष्णवी ।
कूर्चाग्रे सर्वतीर्थानि इत्येता अधिदेवताः ॥ 933

नवपञ्चत्रिसंयुक्तमग्रं तु चतुरंगुलम् ।
ग्रंथिरेकांगुलं प्रोक्तं वलयं द्व्यंगुलं भवेत् ॥ 934

द्विदर्भेणापि कर्तव्यं तप्तचामीकरेण वा ।
प्रदक्षिणपदग्रंथि अनामिकायां नियोजयेत् ॥ 935

## पवित्राधिदेवताः ॥

मूले तु पार्वती चैव ग्रंथौ चैव सरस्वती ।
अग्रे तु सर्वतीर्थानि पवित्रस्याधिदेवताः ॥ 936

## पवित्रप्रयोजनकालः ॥

सपवित्रकरेणैव कार्या स्यादर्चनक्रिया ।
तस्मात्सर्वप्रयत्नेन पवित्रं धारयेत् तुधीः ॥ 937

## परिधिविष्टरादिप्रमाणम् ॥

श्यामैः दर्भदलैः खरामगुणितैः बाहुः प्रमाणीकृता
वेण्या वाथ सुवर्तिताः समशिखाः सद्ग्रंथयो विष्टराः ।
तन्माना ऋजवः पलाशतरुजाः श्यामा परिध्यस्तथा
इध्माः षोडशकांगुलः समदपि प्रादेशमात्राव्रणाः ॥ 938

षट्त्रिंशत् संख्यदर्भैश्च ज्ञानखड्गं प्रकल्पयेत् ।
तालमात्रसमोपेतं कारयेद्वेणिबन्धवत् ॥ 939

ब्रह्माणं शङ्करं विष्णु अनन्तं च हृदार्चयेत् ।
पूर्वाद्युत्तरपर्यन्तं परिधिस्था ननु क्रमात् ॥ 940

इन्द्रादीशानपर्यन्तान् विष्टरस्थाननु क्रमात् ।

## अग्निरूपम् ॥

अग्नेरभिमुखी भूतान् निजदिक्षु हृदार्चयेत् ॥ 941

निवार्य विघ्नसंघातं बालकं पालयिष्यथ ।
शैवाग्निः कथ्यते तस्मात् श्रृणु विप्र समाहितः ॥ 942

पंचजिह्वासमायुक्तं सप्तजिह्वाविराजितम् ।
दशहस्तं त्रिणेत्रं च सर्वाभरणभूषितम् ॥ 943
रक्तवस्त्रपरीधानं पंकजोपरि संस्थितम् ।
बद्धपद्मासनासीनं दशायुधसमन्वितम् ॥ 944

## वक्त्रनामा ॥

कनका बहुरूपा चातिरक्ता च ततः परम् ।
सुप्रभा चैव रक्ता च कृष्गा चान्या हिरण्मयी ॥ 945
ऊर्ध्ववक्त्राः स्थितास्तिस्रः शेषाः पूर्वादितः क्रमात् ।

## होमस्थानम् ॥

कामिके—

अग्ने त्वामैश्वरं तेजः पावनं परमं यतः ॥ 946
तस्मात् त्वदीयहृत्पद्मे संस्थाप्य तर्पयामि तत् ।

## अष्टकर्मप्रयोगः ॥

कालोत्तरे—

ईशाने मुक्तये होमं पुरुषे चाणिमादिकम् ॥ 947
प्रायश्चित्तादिकं घारे तथा स्यात् क्रूरकर्म च ।
वश्याकर्षणमोहार्थं वामदेवे तु होमयेत् 948
नित्यकर्मविधानं तु वक्त्रेस्मिन् पश्चिमे हितम् ।
हिरण्या तप्तहेमाभा कनका रजतप्रभा ॥ 949

रक्तैरिकारण्यप्रख्या कृष्णा नीलमणिप्रभा ।
सुप्रभा मौक्तिकज्योत्स्ना सुरक्ता पद्मरागवम् ॥ 950

चन्द्रकान्तशरच्चन्द्रप्रभेव बहुरूपिणी ।
वश्याकर्षणयोराद्या कनका स्तंभने हिता ॥ 951

विद्वेषमोहयोरक्ता कृष्णा मरणकर्मणि ।
सुप्रभा शान्तिके प्रोक्ता सुरक्तोच्चाटने मता ॥ 952

एकैव बहुरूपा तु सर्वकामफलप्रदा ।
हिरण्याद्यास्त्वविज्ञाय यो जिह्वाः वह्निसन्निधौ ॥ 953

होतुं चोपक्रमेन्मूर्खः स भवेत् ब्रह्मघातकः ।
शतमर्घं तदर्धं वा विंशतिर्दश एव वा ॥ 954

शिवाद्दशांशकोंगानि तर्पयेच्च द्विजोत्तमः ।

## अग्निकार्यकाल प्रमाणम् ॥

एककालं द्विकालं वा त्रिकालं होममाचरेत् ॥ 955

## उत्तमादिहोमद्रव्यम ॥

समिदाज्यचरुलाजाः सर्षपाश्च तथा तिलाः ।
उत्तमं त्विति विख्यातं मध्यमं च ततः श्रृणु ॥ 956

समिदाज्यं चरुश्चैव सर्षपं मध्यमं विदुः ।
समिदाज्यं चरुश्चैव कन्यसं परिपठ्यते ॥ 957

घृतेन पयसा वाथ घृतैर्वा तिलमिश्रितैः ।
यवैश्च व्रीहिभिर्वापि गुग्गुलेन घृतेन वा ॥ 958

नित्यहोमः प्रकर्तव्यो यथावित्तानुसारतः ।

## अग्निस्वरूपम् ॥

पद्मस्थं पञ्चवक्त्रं दशभुजसहितं रक्तवर्णं त्रिणेत्रं
शूलं वज्रं च खड्गं त्रिशिखसृणिगदाटंकपाशाब्जचक्रम् ।
बिभ्राणं सव्यदक्षे करसरसिरुहे सप्तजिह्वासु दीप्तम्
ध्यायेत् स्वाहासमेतं प्रचुरनिजरुचिं कुण्डमध्ये शिवाग्निम् ॥959

गारुहाहवनीयदक्षिणा बालयौवनवृद्धस्वरूपगाः ।

## बालादिय्यग्निकार्यकालः ॥

स्थापकादिशिवोत्सवनित्यं पूजकादिशिवाग्निस्वरूपकम् ॥ 960

वृद्धरूपं प्रतिष्ठाग्निरुत्सवाग्निस्तु यौवनम् ॥

दीक्षाग्निः बालरूपं स्यात् अग्निरूपं प्रकीर्तितम् ।
चक्षुः कण्ठादिकं ज्ञात्वा होमयेद्देशिकोत्तमः ॥ 961

## आहुतिस्थानफलम् ॥

अग्निकंठे हुतं कुर्यात् व्याधी खटितमेव च ।
नासिकायां मनोदुःखं चक्षुर्ग्रामविनाशनम् ॥ 962

मूर्ध्नि स्थाने हुतं कुर्यात् राजराष्ट्रं विनश्यति ।
तस्मात् सर्वप्रयत्नेन जिह्वायां हुतमाचरेत् ॥ 963

यत्र काष्ठं तु तच्छ्रोत्रं यत्रधूमस्तु नासिका ।
काष्ठमल्पज्वलन्नेत्रं अनलं मूर्धमेव च ॥ 964

प्रज्वालनी ततो जिह्वा बुद्धिमान् हुतमाचरेत् ।
मुखपृष्ठपार्श्वे भुजहस्तपादौ कंठोष्ठतालुहृदिनासि लोचनम् ।
कंठे मूर्धे परकृद्धिदेशे यस्यांगमध्ये सर्वांशनाशम् ॥ 965

## नानाद्रव्याहुतिस्थानम् ॥

आज्यं वै कर्षमात्रं तु कर्तव्यं कर्मसिद्धये ।
तिलेन मृग्यां जुहुयात् यवादीन् कम्बुमुद्रया ।
पायसं व्यंजनादीनि पातकेन तु होमयेत् ॥ 966

खंडत्रयं तु मूलानां फलानां स प्रमाणतः ।
हविष्यं ग्रासमात्रेण ताम्बूलं विनिवेदयेत् ॥ 967

आज्याभावे तिलैर्होमः कर्तव्यः कृष्णवर्णकैः ।
ब्रीहिभिर्वा समिद्भिर्वा दध्नावापि यवैस्तु वा ॥ 968

श्रीफलैर्बिल्वपत्रैर्वा पुष्पैर्याज्ञीयकैः शुभैः ।
अन्यैर्वापि विधातव्यो होमः सर्वार्थसिद्धिदः ॥ 969

## मंत्रः ॥

स्वाहान्तं चैव होमे स्यात् पूर्णा स्याद्वौषडन्तिका ।
ऊर्ध्ववक्त्रे महासेन तस्मिन् पूर्णाहुतिः स्मृता ॥ 970

## अग्निकार्यफलम् ॥

अप्रदीप्तेन होतव्यः सधूमे चाप्यनिन्धने ।
प्रदीप्तलेलिहानेन होमे वह्नौ प्रसिध्यति ॥ 971

निर्धूमे होमकर्मात्र प्रशस्तं नान्यथा शुभम् ।

ज्ञानरत्नावल्यां—

रवश्च शरदाशब्दस्तथा सिद्धिमिव ध्वनिः ॥ 972

रवरोष्ट्रमहिषादीनां रूपश्चात्र न सिध्यते ।
प्रदीप्ते दक्षिणावर्ते होमस्सर्वार्थसिद्धिदः ॥ 973

पद्मरागद्युतिस्तेषां राक्षारससमप्रभः ।
बालार्कवर्णं हुतभुक् जयार्थं शस्यते नृणाम् ॥ 974

## होमवासनाफलम् ॥

सुगन्धद्रव्यगन्धोग्निः घृतगन्धश्च शोभनम् ।
आयुषः पद्मगन्धश्च बिल्वगन्धश्च षण्मुख ॥ 975

नीलोत्पलसमो गन्धः सौभाग्ये शस्यते सदा ।
हूयमानस्सदा वह्निः करीन्द्राम्बुदनिस्वनः ॥ 976

तदा होतुर्विजानीयात् कर्मसिद्धिरभीप्सिता ।
जीमूतवल्लरीशंखमृदंगध्वनिरूपकः ॥ 977

सद्योग्निसिद्धये होतुरतोन्यश्च विपर्ययः ।
चित्रकारो भृगुज्येष्ठो ध्वजचामरसन्निभः ॥ 978

वृषकुञ्जरयानेन तुल्योग्निः पुष्टिदः सदा ।

## पूर्णाहुतिः ॥

प्रदक्षिणत्रयं कृत्वा नमस्कृत्वा च भक्तितः ॥ 979

विसर्जयेत्ततो देवं पुनःपूजा विधानतः ।
ततो वह्निं समभ्यर्च्य फडंतास्त्रेण शम्बरात् ॥ 980

भास्वरान् परिधिस्थांश्च पूरकेण हृदाणुना ।
श्रद्धया परमात्मीये स्थापयेत्तान् हृदम्बुजे ॥ 981

विष्टराणि समादाय ग्रन्थि मुक्त्वा विसर्जयेत् ।
परिस्तरणमानीय आज्येनैव तु सेचयेत् ॥ 982

## तिलकं, तत्फलं च ॥

एकदर्भं समादाय शेषमग्रादिकं दहेत् ।
तदेकमग्नौ निक्षिप्य तत्भस्मतिलकं कुरु ॥ 983

तत्भस्म तु ललाटे तु नेत्रमन्त्रेण धारयेत् ।
तत्भस्म धारणं पुंसामायुः श्रीकीर्तिवर्द्धनम् ॥ 984

विजयं रोगनाशार्थं सर्वकामफलप्रदम् ।
सर्वपाकाग्रमाकृत्वा कृत्वा मण्डलकद्वयम् ॥ 985

## बलिः ॥

अन्तर्बहिर्बलिं दद्यात् आग्नेय्यां कुण्डसन्निधौ ।
ततः शिवान्तिकं गत्वा पूजाहोमादिकर्मकम् ॥ 986
गृहाण भगवन् पुण्यफलमित्यभिधीयते ।

## मन्त्रप्रमाणम् ॥

होमसंख्यानि मन्त्राणि चप्त्वा दशगुणं तथा ॥ 987
तज्जपं वरहस्ते तु तत् पुष्पं तु समर्पयेत् ।

## प्रार्थना ॥

यत् कृतं तत् करिष्यामि तत्सर्वं शुकृतं तव ॥ 988
विश्वगोप्ता त्वमेवात्र नान्यो नाथो हि मे शिव ।

कामिके—

इति विज्ञाप्य देवेशं प्रदक्षिणं च समाचरेत् ॥ 989

## प्रदक्षिणं-तत्फलं च ।

पूजां कृत्वादि यश्शंभोर्न करोति प्रदक्षिणम् ।
सा पूजा निष्फला तस्य स च पूजाविडम्बकः ॥ 990

भक्त्या करोति यः सम्यक् केवलं तु प्रदक्षिणम् ।
पूजा सर्वा कृता तेन स सम्यकु शिवपूजकः ॥ 991
तस्मात् सर्वप्रयत्नेन प्रदक्षिणं समाचरेत् ।

## योगपीठपूजा ॥

देवस्याग्नेयदिग्भागे योगपीठं ततो यजेत् ॥ 992

## गुरुपूजा ॥

कर्णिकादलसंयुक्तं तन्मध्ये स्वगुरून्यजेत् ।
तत्रासनं तु संकल्प्य मूर्तिं तस्योपरि न्यसेत् ॥ 993

## शिवपूजा ॥

शिवमावाहयेत्तत्र सब्रह्मांगसमन्वितम् ।
पुष्पगंधादिभिः पूज्य हृन्मन्त्रेण प्रयत्नतः ॥ 994

## विद्यापीठपूजा ॥

शिवं सुपूज्य विधिवत् विद्यां संपूजयेत्ततः ।

शिवधर्मोत्तरे—

गुरुं च शिवविद्यां च तुल्यमेतत् त्रयं यतः ॥ 995
यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः ।
शिवविद्यागुरूणां च पूजायां सदृशं फलम् ॥ 996
अथ सन्निहितं चाथ पूर्ववत् पूजयेद् गुरुम् ।
त्रिधा प्रदक्षिणं कृत्वा दंडवत् प्रणमेत् क्षितौ ॥ 997

गच्छन्तं पृष्ठतो यायात् विशान्तमनुसंव्रजेत् ।
तद्वचो नानुयुञ्जीत शयानं न प्रबोधयेत् ॥ 998

लभ्यते शाश्वतं ज्ञानं गुरुपादाभिवन्दनात् ।
देवालये गुरुर्यत्र तिष्ठते चेत् षडानन ॥ 999

## प्रथमं गुरुवन्दनं, तत्फलं च ॥

पूर्वं गुरुं वन्दयित्वा पश्चाद्देवं हि वन्दयेत् ।
शिवलोपे निष्कृतिश्चास्ति गुरुलोपे न निष्कृतिः ॥ 1000

## गुरुपुत्रस्य आचार्यत्वं, तत्फलं च ॥

पदसहस्रिकायां—

गुरुपुत्रं यदा योग्यं त्यक्त्वान्यं यदि कल्पयेत् ।
निष्फला तस्य वै दीक्षा महाकल्पं व्रजत्यधः ॥ 1001

## गुरुलक्षणम् ॥

चिन्त्यविश्वे—

ज्ञानहीनं गुरुं प्राप्य कुर्वन् मुक्तिं न चाप्नुते ।
तस्मात्सर्वप्रयत्नेन संश्रयेत् ज्ञानपारगम् ॥ 1002

मधुलुब्धो यथा भृङ्गः पुष्पात्पुष्पं वनान्तरे ।

## अयोग्यगुरुशिष्यविशेषः ॥

ज्ञानलुब्धस्तथा शिष्यो गुरोः गुर्वन्तरं व्रजेत् ॥ 1003

तल्लब्ध्वा विसृजेत् शिष्योऽप्यधः पतति निश्चयम् ।

## गुर्वादिस्वरूपम् ॥

षट्सहस्रे—

शिववद्धि गुरुः पूज्यः पितृवद्देशिकः पुनः ॥ 1004

साधकस्तद्वदेवाहुः पुत्रका गात्रवत् सदा ।
मित्रवत् समयस्थाश्च द्रष्टव्याः शिवमिच्छता ॥ 1005

ये कुर्वन्ति गुरोः मत्तां समयी पुत्रकादिषु ।

## गुरुविशेषः ॥

तस्मात् स्थानात् व्रजेद्दूरं सद्योजातं शतं स्मरेत् ॥ 1006

यो मोहाच्चैव पापिष्ठो गुरुणा शपथं वदेत् ।
ददाति वान्यो दुष्टात्मा तावुभौ नरकं व्रजेत् ॥ 1007

प्रणम्य पुष्पकात्तेन यत्नात् संपूजयेत् गुरुम् ।
गोसहस्रफलं प्राप्य गुरोः पादाभिवन्दनात् ॥ 1008

वन्देयमात्मनः श्रेष्ठान् गुरुभ्रातृगणानपि ।
अन्यानपि च संशुद्धान् शैवान् तपोधनान् ॥ 1009

दीक्षाभिषेकज्येष्ठे न कनिष्ठस्य कदाचन ।
तपो विद्याधिकस्यापि कर्तव्यं नाभिवन्दनम् ॥ 1010

अंशुमति—

गुरुः पिता गुरुर्माता गुरुर्देवो गुरुस्सुहृत् ।
गुरोर्न परमं किंचिदित्याह भगवांञ्छिवः ॥ 1011

इति विज्ञाप्य देवेशं ततोष्टपुष्पिकार्चयेत् ।

## अष्टपुष्पम् ॥

पंकजार्कपलाशं च नन्द्यावर्तं च मल्लिका ॥ 1012
करवीरबकं चैव नीलोत्पलमथाष्टकम् ।

## तत्पुष्पप्रयोजनम् ॥

आसने प्रथमं पुष्पं दातव्यं शुद्धतेजसा ॥ 1013
मूर्तिदानं हृदा कार्यं पुष्पेणैवापरेण तु ।
पञ्चपुष्पप्रदानेन पञ्चाङ्गानि प्रपूजयेत् ॥ 1014
शिवं तथाष्टमेनैव नेत्रहीनाष्टपुष्पिका ।
एतानि चाष्ट पुष्पाणि सर्वसाधारणानि तु ॥ 1015
प्रातर्मध्याह्नसायाह्ने तथा चास्तमिते रवौ ।
पूजयेत् परया भक्त्या ह्यष्टपुष्पविधानतः ॥ 1016

## पूजार्हकमानुष्यः ॥

दरिद्राणामनाथानां बालस्त्रीबालिशेषु च ।
भोगिनां भोगिरक्तानां तथा ध्यानार्पितात्मनाम् ॥ 1017

शिवशास्त्रानुरक्तानां नानासिद्धिहितात्मनाम् ।
अनुरक्तविरक्तानां कथिता चाष्टपुष्पिका ॥ 1018

## अष्टपुष्पपूजासमयः ॥

आवाहनार्घ्यपूजासु स्नाने धूपे विलेपने ।
निवेद्ये च विसर्गे च पुष्पमष्टौ सुयोजयेत् ॥ 1019

## प्रार्थना ॥

स्वामिन् क्षुद्रेण दासेन मलीमसधिया मया ।
कदर्थितोसि यद् भक्तिलेशात् प्रीतः क्षमस्व तत् ॥ 1020

ततः पूर्ववदभ्यर्च्य स्तुत्वा स्तोत्रैः प्रणम्य च ।
अर्घ्यं पराङ्मुखं दत्वा क्षमस्वेत्यभिधाय च ॥ 1021

नाराचमुद्रयास्त्रेण फडन्तेनाणुसंचयम् ।
संहृत्य दिव्यया लिंगे भूमिमन्त्रेण योजयेत् ॥ 1022

स्थण्डिले त्वर्चिते देवमन्त्रसंघातमात्मनि ।

## गणेशादिपूजा ॥

अंशुमति—

गणेश्वरादिबेराणां वस्त्रेणैव तु वेष्टयेत् ॥ 1023

फेटकस्यैकपार्श्वे तु विन्यसेदस्त्रमन्त्रतः ।
शिवमन्त्रमनुस्मृत्य लिङ्गं संगृह्य देशिकः ॥ 1024

चित्रवस्त्रेण संवेष्ट्य फेटके मध्यमे न्यसेत् ।
अपिधानं तु संयोज्य भीमरुद्रं स्मरेत्ततः ॥ 1025
नियोज्य विधिवत्तेन चंडास्त्रजसमा भवेत् ।

### चण्डपूजा ॥

मण्डले चण्डमावाह्य तद्रूपं भावयेत्ततः ॥ 1026
आसनं मूर्तिमूलेन केवलं मूलमन्त्रतः
अभ्यर्च्य देवदत्तानां मूलमन्त्रेण दापयेत् ॥ 1027

### ताम्बूलाद्युपचारः ॥

लेह्यचोष्यान्नपानादि ताम्बूलं स्रग्विलेपनम् ।
निर्माल्यभोजनं तुभ्यं प्रदत्तं तु शिवाज्ञया ॥ 1028

### प्रार्थना ॥

सर्वमेतत् क्रियाकाण्डं मया चंड तवाज्ञया ।
न्यूनाधिकं कृतं मोहात् परिपूर्णं तदस्तु मे ॥ 1029
इति विज्ञाप्य चण्डेशमर्चयित्वा यथाविधि ।
पूरकान्वितमूलेन मन्त्रनाम नियोजयेत् ॥ 1030

### तत्फलम् ॥

प्रत्यहं पूजयेद्यस्तु न स पापैः प्रलिप्यते ।

## चण्डेश्वरपूजानियमः ॥

ननु बाणलिंगे चले लोहरत्नलिंगे स्वयंभुवि प्रतिमासु च सर्वासु न चंडादिकृतिर्भवेत् इति नैव चण्डार्चनमिति केचित् वदंति। सत्यम्। एतन्मतान्तरं प्रणीतम्। शैवे पुनरसर्वत्र पूजनीयमेवेति नियमः ॥

तथा च कालोत्तरे—

स्थिरे चले तथा रत्ने मृदा दारौ च कल्पिते।
लोहे चित्रमये बाणे स्थितचण्डो नियामकः ॥ 1031

ततश्चावश्यं चण्डः पूज्य एव।

## निर्माल्योपयोगः ॥

कामिके—

स्वेष्टलिङ्गे च यद्दत्तं चरुपात्रे न संशयः।
नैवेद्यं भ्रातृपुत्राणां भगिनीनां च दापयेत् ॥ 1032

कारणे—

स्फाटिकं चैव लिङ्गं च रत्नलिङ्गं च लौहकम्।
तन्निवेदितनिर्माल्यं निर्माल्यं तु प्रकल्पयेत् ॥ 1033

बालानां युवतीनां च दापयेत् बलवर्धनम्।
तत् प्राशयेत् स्वयं प्राज्ञो नान्यस्यैव तु दापयेत् ॥ 1034

## निर्माल्यभक्षणफलम् ॥

शुद्धे शिवप्रसादे च शुचित्वं यो न भावयेत्।

सोपि याति नरो घोरं नरकं कालमक्षयम् ॥ 1035

## षड्विधनिर्माल्यम् ॥

कामिके—

देवस्वं देवताद्रव्यं नैवेद्यं च निवेदितम् ।
चण्डद्रव्यं बहिः क्षिप्तं निर्माल्यं षड्विधं भवेत् ॥ 1036

## देवद्रव्यविभागः ॥

देवस्वग्रामभूम्यादि दासीदासाश्वतुष्टयम् ।
हेमरूप्यकरत्नादि देवद्रव्यमिति स्मृतम् ॥ 1037

## नैवेद्यविभागः ॥

यत्संकल्प्य च देवाय पत्रं पुष्पं फलं जलम् ।
अन्नपानादि तत्सर्वं नैवेद्यमिति कीर्तितम् ॥ 1038

एतत् त्रितयनिर्माल्यमनर्हमिति कथ्यते ।
प्रमादात् भोजनं कुर्वन् भूमौ स स्यादमङ्गळः ॥ 1039

किंचित् द्रव्यापहारेण नरकं यात्यसौ नरः ।
शिवोपभुक्तं स्रग्गंधमन्नपानादिसंयुतम् ॥ 1040

निवेदितमिति प्रोक्तं सर्वपापहरं भवेत् ।
स्थापितं विधिना लिङ्गं सर्वदेवासुरैर्नरैः ॥ 1041

एतत् त्रिविधनिर्माल्यं चण्डेशाधिकृतं विदुः ।
बहिः क्षिप्तमनर्हं स्यात् अन्यत् द्रव्यत्वकारणात् ॥ 1042

पिशाचानां च सर्वेषां अधिकारोऽत्र देवता ।
निर्माल्ये षड्विधे भोज्यं त्वेकमेव तवोदितम् ॥ 1043

केवलद्रव्यस्य भोज्यत्वे निषेधः, किन्तु शिवनिवेदितस्यापि ।

## निर्माल्यविनियोगफलम् ॥

तदुक्तं शिवरहस्ये—

न धारयेत् क्वचिच्छंभोर्निर्माल्यं न च भक्षयेत् ।
निर्माल्यलङ्घनं दानं भक्षणं नरकं व्रजेत् ॥ 1044

क्रव्यादो जायते दानात् मातस्तत्र च भक्षणात् ।
लङ्घने सिद्धिहानिः स्यात् गंधोपादानतो वृकः ॥ 1045

चण्डालस्तु यथा दाहे विक्रये शबरो भवेत् ।

स्पर्शनाच्च कथं भोज्यं शिवप्रसादमिति चेत्, सत्यम् ।

शिवप्रसादं शुद्धं तद्भक्तानामेव भोज्यं नाभक्तानामिति ।

तदुक्तं शैवपुराणे—

निर्माल्यं निर्मलं शुद्धं निर्मलत्वादनिन्दितम् ।
तस्मादभोज्यं निर्माल्यं प्राकृतैरशिवात्मकैः ॥ 1046

लोभान्न धारयेच्छंभोर्निर्माल्यं न च भक्षयेत् ।
जिह्वाचापलसंयुक्तः शिवसंस्कारवर्जितः ॥ 1047

शिवनिर्माल्यभोजी च रौरवं नरकं व्रजेत् ।

अत्र शिवसंस्कारवर्जितानामेव शिवनिवेदितमिति पावन-
समभोज्यमिति निर्धार्यते ॥

तदुक्तं शिवागमे —

अभक्तानामशुद्धानां मदन्यासक्तचेतसाम् ।
अभोज्यमिति निर्दिष्टन्नान्यथा परमेश्वरि ॥ 1048

तद्भक्तदीक्षितानां तु मामेव भजतां सदा ।
पुण्यातिशययुक्तानां भोज्यमात्मविशुद्धये ॥ 1049

सर्वसिद्धिकरं चैव शिवनिर्माल्यमुत्तमम् ।
भक्तिमान् धारयेन्नित्यं मलदेही न धारयेत् ॥ 1050

मद्भुक्तशिष्टनिर्माल्यं भेषजं इति कथ्यते ।
संसाररोगहरणात् भेषजं भिषगीश्वरः ॥ 1051

शिवप्रसादहेतुत्वात् प्रसाद इति गीयते ।
मह्यं निवेदितं शुद्धमशुद्धमितरं शिवे ॥ 1052

## न निर्माल्यम् ॥

स्नानतोयं च गंधं च भस्म तांबूलमेव च ।
एतत्सर्वं न निर्माल्यं धारयेत् भक्षयेत् बुधः ॥ 1053

## भुक्तियोग्यनिर्माल्यम् ॥

वायव्यसंहितायां—

ततः स्वयं तु भुंजीत शुद्धमन्नं यथासुखम् ।
निवेदितं च देवाय तच्छेषं वात्मशुद्धये ॥ 1054

स्कान्दे–

शिष्टाश्शान्ताश्च रुद्रेण भुक्तमेव हि भुञ्जते ।
घ्रातमेव हि जिघ्रन्ति पीतमेव पिबन्ति च ॥ 1055

## निर्माल्यभक्षणफलम् ॥

निर्माल्यं परमं ज्ञानं निर्माल्यं परमामृतम् ।
निर्मलत्वाच्च निर्माल्यं नृणां नैर्मल्यकारणम् ॥ 1056

यथा क्रिया विधातव्या प्रभूता जायते पुरा ।
तां तां कुर्यान्महादेव समर्पणधिया सुधीः ॥ 1057

उपवाससहस्राणि प्राजापत्यशतानि च ।
शिवप्रसादसिद्धस्य कोट्यंशेनापि नो समम् ॥ 1058

कूर्मपुराणे–

यः श्राद्धकाले हरभुक्तशेषं ददाति भक्त्या पितृदेवतानाम् ।
तेनैव पिण्डेन तिलैर्विमिश्रमाकल्पकोट्या पितरस्सुतृप्ताः ॥ 1059

शिवपुराणे–

प्राणाग्निहोत्रं यः कुर्यात् शिवस्यैव प्रसादतः ।
अश्वमेधायुतं पुण्यं सिध्यर्थं च लभेन्नरः ॥ 1060

लैङ्गे–

फलं पुष्पं सुगन्धं च वस्त्राण्याभरणानि च ।
शिवार्पितानि स्वीकुर्यादन्यथा किल्बिषी भवेत् ॥ 1061

ब्रह्माण्डपुराणे पितामहेश्वरसंवादे—

नैवेद्यं पुरतो न्यस्तं दर्शनं स्वीकृतं मया ।
रसान् भक्तस्य जिह्वाग्रे अश्नामि कमलोद्भव ॥ 1062

## प्रसादभोजननामविवरणम् ॥

इतिहासे—

इदं प्रसादं भुंजानो विरिंचिः किल जैमिनिः ।
विष्णुः परशुरामोपि शिवेन परिदीक्षिताः ॥ 1063

पादादोकप्रसादान्ननिर्माल्यान्ननिषेवकः ।
वसिष्ठोपि गरिष्ठोऽभूत् प्रसादस्य प्रभावतः ॥ 1064

तस्मात् पादोदकं पेयं प्रसादान्नं च भुज्यताम् ।

## पादोदकाभिषेकजलभुक्तिफलम् ॥

आदित्यपुराणे—

स्नापयित्वा विधानेन यो लिङ्गं स्नपनोदकम् ॥ 1065
त्रिः पिबेत् त्रिविधं पापं तस्यै चाशु प्रणश्यति ।

कामिके—

भक्षयेद्यो नरो भक्त्या पवित्रमतिशुद्धिदम् ॥ 1066
शुद्धः स्यात् ब्राह्मणस्तस्य पापं क्षिप्रं विनश्यति ।

ब्रह्माण्डपुराणे—

अकालमृत्युशमनं सर्वव्याधिविनाशनम् ॥ 1067

सर्वपापप्रशमनं शंभोः पादोदकं शुभम् ।
शंभोः पादोदकं पीत्वा पश्चादशुचिशंकया ॥ 1068

य आचामति मोहेन तं विद्यात् ब्रह्मघातकम् ।

वैद्यशास्त्रे–

निर्माल्यसलिलं पीत्वा देवदेवस्य शूलिनः ॥ 1069

क्षयापस्मारकुष्ठाद्यैर्विमुक्तो नात्र संशयः ।

## नानाविधनिर्माल्यभुक्तिफलम् ॥

कारणे–

विनायकस्य निर्माल्यं विप्रादीनां प्रशस्यते ॥ 1070

सुब्रह्मण्यस्य निर्माल्यं भोजनं च जयार्थिनाम् ।
तथा देव्याश्च निर्माल्यं सर्वेषां भोजनं ततः ॥ 1071

सकलानां तु नैवेद्यं सर्वेषां भोजनं भवेत् ।
भास्करस्य तु नैवेद्यं भुक्तं व्याधिक्षयं भवेत् ॥ 1072

गुरुपुस्तकनागानां वह्नेर्योनिगणेश्वरे ।
पार्वतीयक्षमातॄणां न निर्माल्यं शिवे यथा ॥ 1073

किंच सर्वेषामनिश्चितमपि शिवनिर्माल्यस्वीकरणमशक्य-
परिहारमेव । यदि परिजिहीर्षन्ति तेषामुपवास एव शरणम् ॥

तथा हि—

गंगानङ्गरिपोर्जटाविगलिता यन्मौलिपुष्पं शशी

केशात्तस्य वियत्ततो निपतिता वृष्टिर्जगज्जीवनम् ।

रुद्रोऽग्निश्शत्र सर्वमनसस्तज्जिह्वया पच्यते

ये निर्माल्यजहासव त्रिभुवने तैः केन वा जीव्यते ॥ 1074

अलमतिविस्तरेण; प्रकृतमनुसरामः—

निर्माल्यापनये स्थानं लिम्पेत् गोमयवारिणा ।

प्रोक्ष्यास्त्रवारिणा स्थानं विसृज्यार्घ्यकरादिकम् ॥ 1075

प्रक्षाल्य सम्यगाचम्य न्यासं कुर्यात् यथोचितम् ।

एवं कराङ्गविन्यासं कृत्वा पूजाफलार्थकम् ॥ 1076

एकविंशतिवारं च घोरमन्त्रं जपेत्ततः ।

शिवाष्टशतजप्तेन पूजायास्तु विशुध्यति ॥ 1077

## कपिलापूजा ॥

पूर्वोक्तविधिना गावः समालोक्य समर्चयेत् ।

सुप्रभेदे—

अमृतमथनोत्पन्ने सुरभे लोकधारिणि ॥ 1078

इमं ग्रासं गृहाण त्वं इदं मे व्रतमुत्तमम ।

नित्यं परगवे दद्यात् गृहीत्वा दुर्लभं व्रतम् ॥ 1079

रक्षन्ति च भयात् घोरात् स्पर्शनात् पापनाशनाः ।
वन्दिता च वसिष्ठेन विश्वामित्रेण जह्नुना ॥ 1080

कपिले हर मे पापं यन्मया दुष्कृतं कृतम् ।
गावो ममाग्रतो नित्यं गावः पृष्ठत एव मे ॥ 1081

गावो मे हृदये वापि गवां मध्ये वसाम्यहम् ।
एतन्नरो जपेन्मन्त्री त्रिसन्ध्यं नियतश्शुचिः ॥ 1082

विमुक्तः सर्वपापेभ्यः शिवलोकं स गच्छति ।
मध्याह्नसमयं यावत् कृत्वा स्वाध्यायमीप्सितम् ॥ 1083

अर्चयेत् परमेशानं कृत्वा स्नानादि पूर्ववत् ।
पूर्वार्चिते तथा देवे प्रदद्यादष्टपुत्रिकाम् ॥ 1084

इति शिवार्चनविधिः परिसमाप्ता ।

—()—

## 3. शिवालयदर्शनविधिः ॥

### लिङ्गदर्शनम् ॥

अंशुमति–

शिवालयं प्रविश्याथ लिङ्गदर्शनमेव च ।
प्रदक्षिणनमस्कारं यथा संख्याविधानतः ॥ 1085

लिङ्गस्य दर्शनं कृत्वा स्वगृहं प्रविशेत्ततः ।

## भोजनादि ॥

शैवपुराणे–

स्वगृहादेव संकल्प्य यात्रां व्याघ्रपुरस्य तु ॥ 1086

देवदेवं समभ्यर्च्य भोजयित्वा द्विजानपि ।
संप्रार्थ्य तैरनुज्ञातो निर्गच्छेत् भक्तिसंयुतः ॥ 1087

परान्नं वर्जयेद्धीमान् तथा नैव प्रतिग्रहम् ।
कामक्रोधादिकान् दोषान् विशेषेण विवर्जयेत् ॥ 1088

## वपनम् ॥

उपवासदिनं कुर्यात् कारयेद्वपनं तथा ।

## स्नानम् ॥

स्नानं तु विधिवत् कुर्यात् ध्यात्वा देवं त्रियंबकम् ॥ 1089

## हिरण्यश्राद्धम् ॥

कृत्वा हिरण्यश्राद्धं तु पिण्डं दत्वा विधानतः ।
यथाशक्ति धनं धान्यं वस्त्रं चान्यत् तथैव च ॥ 1090

दद्यात्तु शिवभक्तेभ्यो वित्तशाठ्यं न कारयेत् ।
अनुग्रहाय लोकानां लिङ्गभूताः प्रतिष्ठिताः ॥ 1091

## शिवतीर्थस्नानविशेषः ॥

तेषामेव समीपस्थं यद्यत्तोयं षडानन ।

तत्तीर्थं परमं पुण्यं तत्र स्नात्वा शिवं व्रजेत् ॥ 1092

## स्थूललिङ्गगोपुरदर्शनफलम् ॥

दूरतः शिखरं दृष्ट्वा नमस्कुर्यात्तु यो नरः ।
मुच्यते सर्वपापेभ्यो निर्मोकादिव पन्नगः ॥ 1093

देवालयात् प्रदृश्यन्ते विमाना गोपुरान्विताः ।
यावद्देशेषु परितः तावत् कैलासभूतलम् ॥ 1094

## शिवालयवाद्यघोषविशेषः ॥

श्रूयन्ते वाद्यघोषाश्च यावद्दूरात् शिवालयात् ।
तावत् शिवपुरं साक्षात् अनवद्ये मनोन्मनि ॥ 1095

स्थूललिङ्गं नमस्कृत्य आलयं तु प्रवेशयेत् ।
स्थूललिङ्गं विमानं स्यात् सूक्ष्मलिङ्गं सदाशिवः ॥ 1096

बलिपीठं भद्रलिङ्गं लिङ्गत्रयमिहोच्यते ।

## अङ्गलिङ्गभावः ॥

सूक्ष्मे–

देहः प्रासादमित्युक्तं देही लिङ्गमिति स्मृतम् ॥ 1097

उभयोरन्तरं नास्ति तस्मादित्थं विभावयेत् ।

## शिवसान्निध्यस्थानम् ॥

बेरलिङ्गे विमाने च भूतपीठे शिवालये ॥ 1098

शिवसन्निहितो नित्यं नमयेत् तत्र तं सदा ॥

## मूर्तिजीवस्थानम् ॥

अन्यत्र—

लिङ्गस्य मूर्ध्नि उभयोः पश्चात् त्रयस्त्रिशन्मूर्तिप्रतिमा हृदि स्यात्(?)।
शत्तयाकृतिः शैलजलोहजानां तनौ वसंति ततस्स जीवः ॥ 1099

शूलस्य मध्ये वृषशृङ्गकाग्रे पद्मस्य मध्ये शिखरस्य कुक्षौ ।
स्थूपेश्च कुंभौ वसुमूर्तिहस्तौ रयादिसततं.सजीवः कुमारः ॥(?) 1100

## दर्शनकाले वस्त्राच्छादनफलम् ॥

अंशुमति—

वस्त्रेणाच्छाद्य देहं स्वं यो नरः प्रणमेतु माम् ।
त्रिजन्म जायते मूकः सप्तजन्मसु निर्धनः ॥ 1101

## जपहोमादिस्थानम् ॥

स्वायंभुवे—

अग्रतः पृष्ठतो वामे गर्भागारे तथैव च ।
जपहोमनमस्कारं न विदध्यात् कदाचन ॥ 1102

प्रत्यङ्मुखे चोत्तरदिङ्मुखे च वामे स्थितेन्यत्र तदन्यपार्श्वे ।
ईशानपूजाप्रणतीश्च कुर्यात् दोषाय नो चेन्न फलाय वा स्यात् ॥ 1103

## प्रच्छन्नपटकालदर्शनफलम् ॥

प्रच्छन्नपटकाले न कर्तव्यं लिङ्गदर्शनम् ।

मुखपञ्च समवक्त्र समनासि नयनं दशकण्ठ दशबाहु दशशूल वरधृक् ।
दलमेक हृदयं त्वतिरिक्त वर्णद्वयपादमिति भूत बलि पीठ बलिभुक् ॥ 1111

## ध्वजदण्डदर्शनविधानम् ॥

ध्वजदण्डनमस्कारं कुर्यात् ध्यानपुरस्सरम् ।
एकास्यपादं द्विकरं त्रिणेत्रं रोमावली राजित दर्भमालम् ॥ 1112
श्वेताङ्गरूपं स्वकनासिकाया मारूढपद्मासन दण्डरूपम् ।

## पशुपतिपाशविधानम् ॥

उत्सवे विशेषोक्ति—

पतिरतंभमिति ख्यातं पशून् खगमिति स्मृतम् ।
रज्जुः पाशमिति प्रोक्तं त्रिविधास्ते भवन्ति च ॥ 1113

ब्रह्माण्डपुराणे—

ईश्वराभिमुखं देवं आसीनं वृषनायकम् ।
प्रणम्य प्रार्थयेद्देवं कुसुमाभ्यर्चितांघ्रिकम् ॥ 1114

## शिवार्चनफलम् ॥

अन्तः प्रवेशे शिवदर्शने च शिवार्चने तत्फलसिद्धिलाभे ।
देह्यभ्यनुज्ञां भगवन् प्रसन्नस्त्वत्पादपद्मप्रणताय मह्यम् ॥ 1115

इति संप्रार्थ्य धर्मेशः पशोः पशुपतेः पुरः ।

## अष्टाङ्गादिनमस्कारः, तत्फलं च ॥

प्रणम्य दंडवद् भूमौ साष्टाङ्गं कुसुमं क्षिपेत् ॥ 1116

अंशुमति—

पशोः पशुपतेरग्रे दण्डवत् पतिते भुवि ।

पतन्ति पातकास्सर्वे नोत्तिष्ठन्ति पुनस्सह ॥ 1117

देहसंसक्तरेणूनां यावत्संख्याभिगण्यते ।

तावद्वर्षसहस्राणि शिवलोके महीयते ॥ 1118

अष्टाङ्गं चैव पञ्चाङ्गं त्र्यङ्गं चैकाङ्गुलं वरम् ।

## अष्टाङ्गविधानम् ॥

उरसा शिरसा दृष्टिवचसा मनसा तथा ॥ 1119

पद्भ्यां दोर्भ्यां च पाणिभ्यां प्रणामोऽष्टाङ्गमीरितम् ।

शिरो हस्तौ च कंठौ च चिबुकं बाहुयुग्मकम् ॥ 1120

अष्टांगं च नमस्कारं पञ्चाङ्गं च ततः श्रृणुः ।

## पञ्चाङ्गम् ॥

शिरो हस्तौ च बाहू च कृत्वा जानुनि संस्थिते ॥ 1121

इदं पञ्चाङ्गमेवोक्तं त्रियङ्गं च ततः श्रृणु ।

## त्र्यङ्गम् ॥

हस्तौ बध्वा तु मुकुलः मूर्ध्नि देशे नियोजयेत् ॥ 1122

त्रियङ्गलक्षणं चैव नमस्कारस्य संख्यया ।

## एकाङ्गम् ॥

एकाङ्गं तु नमस्कारं शिरसैव कृतं भवेत् ॥ 1123

नमस्कारसंख्या ॥

त्रीणि पञ्चापि सप्तापि नव द्वादश संख्यया ।

नमस्कारस्थानं, तत्फलं च ॥

भक्त्या कृत्वा नमस्कारं शिवस्याग्रे ततो नरः ॥ 1124

अश्वमेधस्य यज्ञस्य लभते फलमुत्तमम् ।
भक्तिहीनैनरैर्जाड्यात् अपि बाधा शिवे कृता ॥ 1125

नमस्क्रिया सकृद्वापि सर्वपापहरी भवेत् ।
तस्माल्लिङ्गं सकृद्भक्तया यो लिङ्गं प्रणमेन्नरः ॥ 1126

सर्वान् कामानवाप्नोति शिवेन सह मोदते ।

प्रदक्षिणक्रमः ॥

अंशुमति–

प्रदक्षिणक्रमं वक्ष्ये श्रूयतां रविसत्तम ॥ 1127

सर्वपापहरं चैव सर्वदानफलप्रदम् ।
सर्वरोगविनाशार्थं प्रदक्षिणमथाचरेत् ॥ 1128

प्रदक्षिणपदव्युत्पत्तिः ॥

प्रच्छिनत्ति भयं सर्वं दकारो मोक्षसिद्धिदः ।
क्षिकारात् क्षीयते रोगो णकारं श्रीप्रदायकम् ॥ 1129

प्रदक्षिणार्णसंयोगात् प्रदक्षिणमिति स्मृतम् ।

पश्चात् पदान्तरं गच्छेत् करौ चलनवर्जितौ ॥ 1130

स्तुतिर्वाचि हृदि ध्यानं चतुरङ्गं प्रदक्षिणम् ।
आसन्नप्रसवा नारी तैलपूर्णं यथा घटम् ॥ 1131

वहन्ती शनकैर्याति तथा कुर्यात् प्रदक्षिणम् ।

## प्रदक्षिणकालफलम् ॥

पूर्वाह्णे व्याधिनाशः स्यात् मध्याह्ने वाञ्छितार्थदम् ॥ 1132

सायाह्ने सर्वपापघ्नं अर्धयामे विमुक्तिदम् ।
अष्टम्यां च चतुर्दश्यां पञ्चदश्यां त्रिजन्मनि ॥ 1133

आर्द्रायामर्कवारे च करणे विष्टिसंज्ञके ।
अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ॥ 1134

संक्रमे चोत्सवे चैव स्तुत्वा कृत्वा प्रदक्षिणम् ।
प्रणमेद्वं शिवं भक्त्या सर्वान् कामानवाप्य सः ॥ 1135

लभेच्छतगुणं पुण्यं केवलं नात्र संशयः ।
एवमुक्तेषु कालेषु भक्तिश्रद्धासमन्वितः ॥ 1136

सूर्योदयं समारभ्य यावदस्तं रवेर्भवेत् ।
तावत् प्रदक्षिणं कृत्वा सर्वान् कामानवाप्नुयात् ॥ 1137

अथाहोरात्रकं वापि कालेष्वेतेषु यो नरः ।
प्रदक्षिणं प्रकुर्वीत सोऽत्यन्तफलमश्नुते ॥ 1138

दूरमार्गात् समागम्य फलाशारहितोऽपि यः ।
कृत्वा प्रदक्षिणीकृत्य प्रणमेल्लिङ्गमव्ययम् ॥ 1139

तस्य मार्गात्समुद्भूता या गतिश्चापि केशव ।
प्रदक्षिणफलं नृणां ददात्येव न संशयः ॥ 1140

प्रवासी पथि कृत्वा तु शिवलिङ्गे प्रदक्षिणम् ।
नमस्कृत्वा तु पूर्वोक्तं फलं पञ्चगुणं भवेत् ॥ 1141

उत्सवे बलिकाले तु यः करोति प्रदक्षिणम् ।
पदे पदेऽश्वमेधस्य फलमाप्नोति मानवः ॥ 1142

## प्रदक्षिणस्थानफलम् ॥

अजिते—

गर्भगेहे च कस्योक्तं दीक्षितस्यैव बाह्यके ।
प्रदक्षिणं नृणां नोक्तमन्तर्मण्डलतस्सदा ॥ 1143

अन्तस्सारकृतं प्रोक्तं फलमेकं प्रदक्षिणम् ।
त्रिगुणं मध्यहारे तु मर्यादायां चतुर्गुणम् ॥ 1144

महामर्यादिकं चैव कृतं पञ्चगुणं भवेत् ।
क्षेत्रावधि कृतं बाह्ये भवेच्छतगुणं नृणाम् ॥ 1145

## प्रदक्षिणसंख्याफलम् ॥

स्वायम्भुवे—

एकविंशतिसंख्यातमुत्तमं तु प्रदक्षिणम् ।
एकहस्तनमस्कारं हन्ति पुण्यं पुरातनम् ॥ 1146

शतं सहस्रमयुतं नियुतं प्रयुतं तु वा ।
कोटिं वा कारयेद्यस्तु सिध्यर्थं तु प्रदक्षिणम् ॥ 1147

## मानुषादिलिङ्गप्रदक्षिणसंख्या ॥

मानुषस्य तु लिङ्गस्य फलमुक्तं प्रदक्षिणम् ।
नमस्कारेण तस्माद्वै द्विगुणं चार्षिके भवेत् ॥ 1148

त्रिगुणं दैविके लिङ्गे फलं गाणेश्वरे च तत् ।
चतुर्गुणं समुद्दिष्टं फलं पञ्चगुणं भवेत् ॥ 1149

स्वयंभूतस्य लिङ्गस्य तथा संस्पर्शने शनैः ।

## नानादेवताप्रदक्षिणसंख्या ॥

स्मृतिसंग्रहे–

एकं विनायके कुर्यात् द्वे सूर्ये त्रीणि शंकरे ॥ 1150
चत्वारि देव्या विष्णोश्च सप्ताश्वत्थप्रदक्षिणम् ।

ब्रह्मनारदीये–

राजन् प्रदक्षिणैकेन मुच्यते ब्रह्महत्यया ।
द्वितीयेनाधिकारी स्यात् तृतीयेनैन्द्रसंपदः ॥ 1151

## सोमसूत्रप्रदक्षिणम् ॥

प्रदक्षिणप्रकारस्य लक्षणं शृणु सुव्रत ।
सव्यं चैवापसव्यं च तथा सव्यापसव्यकम् ॥ 1152

सव्यं प्रदक्षिणं प्रोक्तं अपसव्याप्रदक्षिणम् ।
सव्यापसव्यतः सोमसूत्रालङ्घनतः कृतम् ॥ 1153

प्रासादस्य तु विस्तारं तन्मानं सोमसूत्रकम् ।
लिङ्गमूलस्य पार्श्वे तु योजयेत् सौम्यदेशके ॥ 1154

## छायादोषः ॥

यावत् सूत्रान्तमेत्र स्यात् वर्जयेत्तु प्रदक्षिणम् ।
शंभोः प्रदक्षिणं कुर्यात् सोमसूत्रं न लङ्घयेत् ॥ 1155

लङ्घनादेकमेकं स्यात् अलंघ्यमततत्रयम् ।
महाधामस्य सूत्रेण महच्छायां च लंघयेत् ॥ 1156

छायाधस्तात् प्रकर्तव्यं विमाने तु प्रदक्षिणम् ।
छायातिलङ्घने प्राप्ते कथं कुर्यात् प्रदक्षिणम् ॥ 1157

अन्ते त्र्यंश विहायादौ संचरे दूयवंशके बुधः ।
लिङ्गच्छायां तु पीठं स्यात् प्रासादं प्रतिमास्तथा ॥ 1158

उत्सवे बलिकाले च तथैव गुरुसेविते ।
प्रदक्षिणक्रियाकाले छायादोषो न विद्यते ॥ 1159

सोमसूत्रत्रयं यत्र यत्र वा विष्णुमन्दिरम् ।
अपसव्यं न कुर्वीत कुर्यादेव प्रदक्षिणम् ॥ 1160

वृषं चण्डं वृषं चैव सोमसूत्रं पुनर्वृषम् ।

चण्डं च सोमसूत्रं च पुनश्चण्डं पुनर्वृषम् ॥ 1161

एवं सव्यापसव्यं तु प्रदक्षिणमिहोदितम् ।
अङ्गप्रदक्षिणं कुर्वन् कृत्वा भूमौ निजां तनुम् ॥ 1162

दण्डवत् बाहुयुग्मेन सह बध्वा कृताञ्जलिः ।
कृत्वा दण्डनमस्कारं शिवाग्रे तु सकृन्नरः ॥ 1163

प्रदक्षिणमथो कुर्यादेकं वा त्रयमेव वा ।
पञ्च वा सप्त वा चैव सर्वपापनिवृत्तये ॥ 1164

उत्थाय प्रणतिं भूयो भूयः कृत्वा समापयेत् ।
प्रदक्षिणसहस्रं स्यादेकमेवं प्रदक्षिणम् ॥ 1165

## सव्यापसव्यप्रदक्षिणफलम् ॥

स्वायंभुवे–

सव्यं तु भोगदं ज्ञेयं अपसव्यं तु मुक्तिदम् ।
सव्यापसव्यमार्गेण शान्तिमुक्तिफलप्रदम् ॥ 1166

यत्र यत्रावृतौ किन्तु बलिपीठवृषस्थितिः ।
तत्र तत्रावृतौ कुर्यात् तत् प्रधानं प्रदक्षिणम् ॥ 1167

यत्र प्रदक्षिणं कृत्वा बलिपीठेशयोस्तु वा ।
नान्तरागमनं कुर्यात् तत्तदावरणे सुधीः ॥ 1168

द्वितीयावरणद्वारपालकौ गणनायकौ ।
नत्वाभ्यर्च्यान्तः प्रविश्य स्तुत्वैवं शिवभक्तिमान् ॥ 1169

एकं सव्यं त्वसव्यं दशशतशतके द्वे च लक्षे वृषाद्यं
नत्वा नत्वा च कोटिप्रणतिपरिवृतं सप्तकोट्यः शिवस्य ।
कोटेर्लक्षं तदङ्गैर्महति दशशतं प्राङ्गणे शूककाक्ष्यात्
प्रादक्षिण्यक्रमेयं प्रतिपदमवहामोक्षदोक्तानवद्ये ॥ 1170

पञ्चमावरणं शंभोः कृतं कोटिप्रदक्षिणम् ।
सप्तसंधिद्वीपायां कृतं कोटिप्रदक्षिणम् ॥ 1171

इति शिवालयदर्शनविधिः परिसमाप्ता ॥

—()—

## 4. पाकविधिः ॥

विधिं माध्याह्निकं कृत्वा रम्ये भोजनमन्दिरे ।
विविक्ते गोमयालिप्ते विशुद्धे पाकमानयेत् ॥ 1172

ततो मृत्युञ्जयेनैव वौषडन्तेन सप्तधा ।
जप्तैस्सदर्भगंधैस्तैः सिञ्चोक्तं वारिबिन्दुभिः ॥ 1173

सर्वपाकाग्रमुद्धृत्य शिवायार्धं निवेदयेत् ।
अन्यार्धं चुल्लिकाहोमविधानायोपकल्पयेत् ॥ 1174

होमं चैव गुरुर्भागमित्ययं सततं विदुः ।
शिवाग्निगुरुविप्रेभ्यः सर्वपाकाग्रमन्वहम् ॥ 1175

यो निवेद्यात्मना भुंक्ते स रुद्रो नात्र संशयः ।
अनिवेद्य च यो भुंक्ते स भुंक्ते किल्बिषं नरः ॥ 1176

शिवाग्निगुरुनैवेद्ये यावत् सिक्थानि संख्यया ।
तावद्वर्षसहस्राणि दाता शिवपुरे वसेत् ॥ 1177

## पाककारणं, तत्फलं च ॥

शिवधर्मोत्तरे—

देवाग्न्यतिथिभिक्षार्थं पचेन्न त्वात्मकारणम् ।
आत्मार्थे यः पचेन्मोहान्नरकाय स जीवति ॥ 1178

## भोजनविधिः ॥

शिवधर्मे —

धौतपादः समाचान्तस्थानमासाद्य पूर्वकम् ।
शिवभक्तैः सदाचारैः शुद्धशैवतपोधनैः ॥ 1179

परस्परमसंकीर्णैरुपविष्टैरनाकुलैः ।
सवर्णैरेकया पंक्त्या भुञ्जीतात्ममना मुनिः ॥ 1180

## भोजनपात्रम् ॥

सौवर्णे राजते ताम्रे लोहपात्रसुसंस्कृते ।
आचार्यः साधकः पुत्रः समयी च यथाक्रमम् ॥ 1181

अग्रे परिहृतिं कृत्वा परितो भस्मरेखया ।

चतुर्दिगाननो मौनी भुंजीयान्नान्यथा मनाः ॥ 1182

शुद्धं कांस्यं तदा भस्म·शोधयेत्सप्तधा पुनः ।
मन्त्रिते बहुरूपेण पत्रैर्वा निन्दितैस्ततः ॥ 1183

पलाशपद्मिनीचूतमधूककदलीदलैः ।
रंभापद्मपलाशाम्रमधुकैः पनसैर्दलैः ॥ 1184

कुंभीचंपकपुन्नागकुटजादिसमुद्भवैः ।

## निषिद्धपत्रम् ॥

वटाश्वत्थार्कवाताग्निस्नुहिभल्लातकोद्भवैः ॥ 1185

एवमादिभिरन्यैश्च निषिद्धे तु न भोजयेत् ।

## युक्तपत्रम् ॥

सदण्डे साग्रके रंभापत्रे वामाग्रशोधिते ॥ 1186

आज्याभिघारिते पत्रे भोक्तव्यं तुल्यजातिभिः ।

## भोजनकालमंत्रः, तत्क्रिया च.॥

जानुबद्धकरो मौनी बद्धवीरासनोऽथवा ॥ 1187

लग्नवामकरः पत्रे पूर्वंत्रन्मन्त्रितौदनः ।
औदरं ज्वालयित्वा च हेतिमन्त्रेण पावकम् ॥ 1188

अन्नं पवित्रमश्नीयात् सूपयुक्तं घृतप्लुतम् ।

आपोशनं पुरोदाय प्राणाद्यैः प्रणवादिभिः ॥ 1189

स्वाहान्तैराहुतीः पञ्च दत्वा दीप्तोदरानलम् ।

" नाग-कूर्म - कृकर - देवदत्त - धनंजय-उपप्राणवायुभ्यः स्वाहा " ।

एवं निवेद्य नागादीन् पुरुषेण पिबेज्जलम् । 1190

प्राणापान व्यानोदानानां प्राणाहुतिं विधाय,

ग्रासैः परिमितैर्भागभागं तोयेन पूरयेत् ।

प्राणसंचारणायांशमुदरस्य न पूरयेत् ॥ 1191

अगस्त्यमच्युतफलं त्वाष्ट्रमामलकं तथा ।

यस्योदरे प्रवर्तन्ते तस्य सन्निहितश्शिवः ॥ 1192

## वर्जितोपदंशः, तत्फलं च ॥

अलाबु वर्तुलाकारं वृत्ताङ्गं श्वेतकं तथा ।

उपोतकीं लतारूपां रक्तशिग्रुं च वर्जयेत् ॥ 1 93

कालशाकं महाशाकं द्रोणशाकमुपोतकीम् ।

कदलीकन्दवन्या च शृङ्गिबेरं च शस्यते ॥ 1194

कन्दर्कं मधुशिग्रुं च पलाण्डुं लशुनामिषम् ।

पञ्जनं हस्तदत्तं च लवणं परिवर्जयेत् ॥ 1195

पर्वतोग्रोग्रतपसा अश्वमेधस्य यत्फलम् ।

फलं प्राप्नोत्ययत्नेन मधुमांसविवर्जनात् ॥ 1196

सर्वदोषाश्रयं मद्यं अतिदूरात् विवर्जयेत् ।
क्व मद्यं क्व शिवे भक्तिः क्व मांसं क्व शिवार्चनम् ॥ 1197

मद्यमांसप्रतिष्ठानां दूरे तिष्ठति शंकरः ।
तस्मिन् निषिद्धं सन्त्यज्य शिवभक्तान् प्रपूजयेत् ॥ 1198

## माहेशादिभोजनफलम् ॥

एकं प्राकृतभोजने तु दशकं विप्रे विशेषज्ञके
माहेशे च शतं गुणं तु समये साहस्रकं तत्फलम् ।
पुत्रे चाप्ययुतं च साधकजने लक्षं गुरोर्भोजने
कोटी चेति शिवागमेषु गदितं दाता फलं चाश्नुते ॥ 1199

## भोजनदोषः ॥

नाग्नस्योर्ध्वं पिबेद्वारि नाप्रक्षालितपाणिना ।
मक्षिकानखकेशादिदुष्टं त्यजत्वाल्पभोजनम् ॥ 1200

## दोषपरिहारः ॥

भस्म संस्पृश्य भोक्तव्यं शुद्धान्नं नान्यचेतसा ।
दधिक्षीरघृतं चैव तैलं मधु गुलं तथा ॥ 1201

नालिकेरफलं रंभासलिलं चोपदंशकम् ।
केशादिमिश्रं दुष्टं हि न प्रद्यं विततं च यत् ॥ 1202

तावन्मात्रं समुद्धृत्य भस्मक्षेपेण शुद्ध्यति ।
मरीचं क्रमुकं धान्यं गुळं च रजनी तथा ॥ 1203

दधिक्षीरघृतं चैव पाकदोषो न विद्यते ।
अप्रक्षालितहस्तेन पुरुषेण जलं पिबेत् ॥ 1204

गत्वान्यत्र तु शुद्ध्येच्च पादहस्तं समं ततः ।
गण्डूषैष्षोडशैश्चैव शुद्धिं कृत्वा यथाविधि ॥ 1205

अङ्गुष्ठेन पतत्तोयं पादाङ्गुष्ठेन सेचयेत् ।
पश्चात्तु सकलीकृत्य अन्नदोषनिवृत्तये ॥ 1206

मुद्रां तु नामिना सान्तं बध्नीयात् परिवाहयाम् ।
पश्चात् गंधैश्च तांबूलैः लेपयेत् भक्षयेद् गृही ॥ 1207

## चन्दनं, तांबूलं च ॥

तदुक्तं—

प्रत्युषसि भुक्तसमये वरयुवतीनां च संगमे चरमे ।
राजन् विद्वन्मध्ये तांबूलं यो न खादति स पशुः ॥ 1208

तांबूलं कटुतिक्तमिश्रमधुरं क्षारं कषायान्वितं
वातघ्नं कृमिनाशनं कफहरं कायाग्निसंदीपनम् ।
स्त्रीसंभाषणभूषणं शुचिकरं शोकस्य विच्छेदनं
तांबूले विहितास्त्रयोदश गुणाः स्वर्णेऽप्यमी दुर्लभाः ॥ 1209

अखण्डितं च क्रमुकं अप्रक्षालितपर्णकम् ।
अशोधितं च यच्चूर्णं आयुःस्त्रीपुत्रनाशनम् ॥ 1210

अनिधाय मुखे पत्रं पूगं खादति यो नरः ।
सप्त जन्म दरिद्रः स्यात् तच्छान्त्यै च स्मरेच्छिवम् ॥ 1211

पर्णाग्रं पर्णपृष्ठं च पार्श्वं चैव सिरां त्यजेत् ।
क्रमुकाग्रं च पृष्ठं च त्यक्त्वान्यं च सुखं हितम् ॥ 1212

भक्षयेत्तु च तांबूलं आरोग्यं लभते ध्रुवम् ।

अंशुमति--

धर्मसंकीर्तनं चैव पुराणश्रवणं ततः ॥ 1213

नित्याचाराः समाख्येताः यावज्जीवन्तमाश्रये ॥

इति सकलागमसारसंग्रहे शिवालयदर्शनभोजन-
तांबूलविधिः संपूर्णः ॥

—*—

## उच्छिष्टं नास्तीति वचनम् ॥

मक्षिका मशका बालाः स्त्रीमुखं वेदबिन्दुवत् ।
इक्षुदण्डतिलाः सोम नोच्छिष्टं मनुरब्रवीत् ॥

रजकानां पटं शुद्धं यादवानं घृतं पयः ।
रतिकाले मुखं स्त्रीणां आखेटो मृगया शुचिः ॥

देवोच्छिष्टं तु निर्माल्यं गुरूच्छिष्टं तथैव च ।
अन्योच्छिष्टं तु भस्मानां गलोच्छिष्टं तु मन्त्रकम् ॥

मधुनी माक्षिकोच्छिष्टं भृंगोच्छिष्टं तु पुष्पकम् ।
वत्सोच्छिष्टं तु दुग्धानां मत्स्योच्छिष्टं तु तोयकम् ॥

उच्छिष्टमष्टधा प्रोक्तं शुद्धद्रव्यमिति स्मृतम् ।
सन्यासमुपवासं च प्रायश्चित्तव्रतं तथा ॥

तीर्थयात्राश्च गमनं शैवाः पंच विवर्जिताः ।
आरग्वधे च बिल्वे च लिङ्गे च गुरुबेरके ॥

शिवयोगिशरीरेषु नित्यं सन्निहितः शिवः ॥

श्रीमत्कण्णप्पदेशिकेभ्यो नमः ॥

श्रीमद्बोधकदेशिकेभ्यो नमः ॥

—*—

## दक्षिणभारत अर्चक सङ्घम्

कौमारसंहिता ॥

कुमारतन्त्रम् ॥

सकलागमसार सङ्ग्रहः ॥

कामिकागमः ॥

(पूर्वम् - उत्तरम्)

बोधायनपूर्वप्रयोगादर्शः ॥

(एते मुद्रणे वर्तन्ते)

## दक्षिणभारत अर्चक सङ्घम्

कौमारसंहिता ॥

कुमारतन्त्रम् ॥

सकलागमसार सङ्ग्रहः ॥

कामिकागमः ॥

(पूर्वम्-उत्तरम्)

बोधायनपूर्वप्रयोगादर्शः ॥

(एते मुद्रणे वर्तन्ते)

---

Solar Works, Madras-600001.